# Taittiriya AraNyaka

# तैत्तिरीय-आरण्यक

## Document Information

Text title : Taittiriya Aranyaka

File name : taittirIyaAraNyaka.itx

Category : veda, svara

Location : doc_veda

Transliterated by : Muralidhara B A muraliba at gmail.com

Description-comments : See Samhita and Brahmana as separate files

Acknowledge-Permission: Professor Anathakrishna

Latest update : August 6, 2023

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

August 6, 2023

*sanskritdocuments.org*

# Taittiriya AraNyaka

# तैत्तिरीय-आरण्यक

# तैत्तिरीय-आरण्यक

## तैत्तिरीय-आरण्यक - १

प्रश्ने२एगळु १ रिंद ६
॥ श्री गुरुभ्यो नमः ॥ हरिः ओ(४)म् ॥

### आरण्यके प्रथमः प्रश्नः १

० भद्रं कर्णेभिः शृणुयाम देवाः । भद्रं पश्येमाक्षभिर्यजत्राः । स्थिरैरङ्गैस्तुष्टुवाँ संस्तनूभिः । व्यशेम देवहितं यदायुः । स्वस्ति न इन्द्रो वृद्धश्रवाः । स्वस्ति नः पूषा विश्ववेदाः । स्वस्तिनस्ताक्ष्र्यो अरिष्टनेमिः । स्वस्ति नो बृहस्पतिर्दधातु । ओं शान्तिः शान्तिः शान्तिः ॥
१ ओं भद्रं कर्णेभिः शृणुयाम देवाः । भद्रं पश्येमाक्षभिर्यजत्राः । स्थिरैरङ्गैस्तुष्टुवाँ संस्तनूभिः । व्यशेम देवहितं यदायुः । स्वस्ति न इन्द्रो वृद्धश्रवाः । स्वस्ति नः पूषा विश्ववेदाः । स्वस्तिनस्ताक्ष्र्यो अरिष्टनेमिः । स्वस्ति नो बृहस्पतिर्दधातु । आपमापामपः सर्वाः । अस्मादस्मादितोऽमुतः ॥ ०। १। १। १॥
२ अग्निर्वायुश्च सूर्यश्च । सह संचस्करर्द्धिया । वाय्वश्वा रश्मिपतयः । मरीच्यात्मानो अद्रुहः । देवीर्भुवनसूवरीः । पुत्रवत्वाय मे सुत । महानाम्नीर्महामानाः । महसो महसस्स्वः । देवीः पर्जन्यसूवरीः । पुत्रवत्वाय मे सुत ॥ ०। १। १। २॥
३ अपाश्म्युष्णिमपा रक्षः । अपाश्म्युष्णिमपारघम् । अपाघ्रामप चावर्तिम् । अपदेवीरितो हित । वज्रं देवीरजीताग्श्च । भुवनं देवसूवरीः । आदित्यानदितिं देवीम् । योनिनोर्ध्वमुदीषत । शिवा नः शन्तमा भवन्तु । दिव्या आप ओषधयः । सुमृडीका सरस्वति । मा ते व्योम संदृशि ॥ ०। १। १। ३॥ अमुतः सुतौषधयो द्वे च ॥ १॥
४ स्मृतिः प्रत्यक्षमैतिह्यम् । अनुमानश्चतुष्टयम् । एतैरादित्यमण्डलम् । सर्वैरेव विधास्यते । सूर्यो मरीचिमादत्ते । सर्वस्माद्भुवनादधि । तस्याः पाकविशेषेण । स्मृतं कालविशेषणम् । नदीव प्रभवात्काचित् । अक्षय्याथ्स्यन्दते यथा ॥ ०। १। २। ४॥

५ तान्नद्योऽभिसमायन्ति । सोरुस्सती न निवर्तते । एवन्नानासमुत्थानाः । कालास्संवथ्सर२ँ श्रिताः । अणुशश्च महशश्च । सर्वे समवयन्त्रितम् । सतैस्सर्वैः समाविष्टः । ऊरुस्सन्न निवर्तते । अधिसंवथ्सरं विद्यात् । तदेव लक्षणे ॥ ०। १। २। ५॥

६ अणुभिश्च महद्भिश्च । समारूढः प्रदृश्यते । संवथ्सरः प्रत्यक्षेण । नाधिसत्त्वः प्रदृश्यते । पटरो विक्लिधः पिङ्गः । एतद्वरुणलक्षणम् । यत्रैतदुपदृश्यते । सहस्रं तत्र नीयते । एक२ँ हि शिरो नाना मुखे । कृथ्स्नं तदृतुलक्षणम् ॥ ०। १। २। ६॥

७ उभयतस्सप्तेन्द्रियाणि । जल्पितं त्वेव दिह्यते । शुक्लकृष्णे संवथ्सरस्य । दक्षिणवामयोः पार्श्वयोः । तस्यैषा भवति । शुक्रं ते अन्यद्यजतं ते अन्यत् । विषुरूपे अहनी द्यौरिवासि । विश्वा हि माया अवसि स्वधावः । भद्रा ते पूषन्निह रातिरस्त्विति । नात्र भुवनम् । न पूषा । न पशवः । नादित्यस्संवथ्सर एव प्रत्यक्षेण प्रियतमं विद्यात् । एतद्वै संवथ्सरस्य प्रियतम२ँ रूपम् । योऽस्य महानर्थ उत्पथ्स्यमानो भवति । इदं पुण्यं कुरुष्वेति । तमाहरणं दद्यात् ॥ ०। १। २। ७॥ यथा लक्षण ऋतुलक्षणं भुवन२ँ सप्त च ॥ २॥

८ साकंजाना२ँ सप्तथमाहुरेकजम् । षडुद्यमा ऋषयो देवजा इति । तेषामिष्टानि विहितानि धामशः । स्थात्रे रेजन्ते विकृतानि रूपशः । को नु मर्या अमिथितः । सखा सखायमब्रवीत् । जहाको अस्मदीषते । यस्तित्याज सखिविद२ँ सखायम् । न तस्य वाच्यपि भागो अस्ति । यदी२ँ शृणोत्यलक२ँ शृणोति ॥ ०। १। ३। ८॥

९ न हि प्रवेद सुकृतस्य पन्थामिति । ऋतुर्ऋतुना नुद्यमानः । विननादाभिधावः । षष्टिश्च त्रि२ँ शका वल्गाः । शुक्लकृष्णौ च षाष्टिकौ । सारागवस्त्रैर्जरदक्षः । वसन्तो वसुभिस्सह । संवथ्सरस्य सवितुः । प्रैषकृत्प्रथमः स्मृतः । अमूनादयतेत्यन्यान् ॥ ०। १। ३। ९॥

१० अमूग्श्च परिरक्षतः । एता वाचः प्रयुज्यन्ते । यत्रैतदुपदृश्यते । एतदेव विजानीयात् । प्रमाणं कालपर्यये । विशेषणं तु वक्ष्यामः । ऋतूनां तन्निबोधत । शुक्लवासा रुद्रगणः । ग्रीष्मेणाऽऽवर्तते सह । निजहन्पृथिवी२ँ सर्वाम् ॥ ०। १। ३। १०॥

११ ज्योतिषाऽप्रतिख्येन सः । विश्वरूपाणि वासा२ँसि । आदित्यानां निबोधत । संवथ्सरीणं कर्मफलम् । वर्षाभिर्ददता२ँ सह । अदुःखो दुःखचक्षुरिव । तद्मा पीत इव दृश्यते । शीतेनाव्यथयन्निव । रुरुदक्ष इव दृश्यते । ह्लादयते ज्वलतश्चैव । शाम्यतश्चास्य चक्षुषी । या वै प्रजा भ्र२ँश्यन्ते । संवथ्सराता भ्र२ँश्यन्ते । याः प्रतितिष्ठन्ति । संवथ्सरे ताः प्रतितिष्ठन्ति । वर्षाभ्य इत्यर्थः ॥

०। १। ३। ११॥ शृणोत्यन्यान्सर्वामेव षट्च ॥ ३॥
१२ अक्षिदुःखोत्थितस्यैव । विप्रसन्ने कनीनिके । आङ्क्ते चाद्गणं नास्ति । ऋभूणां तन्निबोधत । कनकाभानि वासाꣳसि । अहतानि निबोधत । अन्नमश्नीत मृज्मीत । अहं वो जीवनप्रदः । एता वाचः प्रयुज्यन्ते । शरद्यत्रोपदृश्यते ॥ ०। १। ४। १२॥
१३ अभिधून्वन्तोऽभिघ्नन्त इव । वातवन्तो मरुद्गणाः । अमुतो जेतुमिषुमुखमिव । सन्नद्धास्सह ददृशे ह । अपध्वस्तैर्वस्तिवर्णैरिव । विशिखासः कपर्दिनः । अक्रुद्धस्य योथ्स्यमानस्य । क्रुद्धस्येव लोहिनी । हेमतश्चक्षुषी विद्यात् । अक्ष्णयोः, क्षिपणोरिव ॥ ०। १। ४। १३॥
१४ दुर्भिक्षं देवलोकेषु । मनूनामुदकं गृहे । एता वाचः प्रवदन्तीः । वैद्युतो यान्ति शैशिरीः । ता अग्निः पवमाना अन्वैक्षत । इह जीविकामपरिपश्यन् । तस्यैषा भवति । इहेह वस्स्वतपसः । मरुतस्सूर्यत्वचः । शर्म सप्रथा आवृणे ॥ ०। १। ४। १४॥ दृश्यत इवाऽऽवृणे ॥ ४॥
१५ अतिताम्राणि वासाꣳसि । अष्टिवज्रिशतघ्नि च । विश्वे देवा विप्रहरन्ति । अग्निजिह्वा असश्चत । नैव देवो न मर्त्यः । न राजा वरुणो विभुः । नाग्निर्नेन्द्रो न पवमानः । मातृक्कच्चन विद्यते । दिव्यस्यैका धनुरार्त्निः । पृथिव्यामपरा श्रिता ॥ ०। १। ५। १५॥
१६ तस्येन्द्रो वम्रिरूपेण । धनुर्ज्यामछिनथ्स्वयम् । तदिन्द्रधनुरित्यज्यम् । अभ्रवर्णेषु चक्षते । एतदेव शंयोर्बार्हस्पत्यस्य । एतद्रुद्रस्य धनुः । रुद्रस्य त्वेव धनुरार्त्निः । शिर उत्पिपेष । स प्रवर्ग्योऽभवत् । तस्माद्यस्सप्रवर्ग्येण यज्ञेन यजते । रुद्रस्य स शिरः प्रतिदधाति । नैनꣳरुद्र आरुको भवति । य एवं वेद ॥ ०। १। ५। १६॥ श्रिता यजते त्रीणि च ॥ ५॥
१७ अत्यूर्ध्वाक्षोऽतिरश्चात् । शिशिरः प्रदृश्यते । नैव रूपं न वासाꣳसि । न चक्षुः प्रतिदृश्यते । अन्योन्यं तु न हि२ꣳस्रातः । सतस्तद्देवलक्षणम् । लोहितोऽक्ष्णि शारशीर्ष्णिः । सूर्यस्योदयनं प्रति । त्वं करोषिन्यञ्जलिकाम् । त्वं करोषि निजानुकाम् ॥ ०। १। ६। १७॥
१८ निजानुका मेन्यञ्जलिका । अमी वाचमुपासतामिति । तस्मै सर्व ऋतवो नमन्ते । मर्यादाकरत्वात्प्रपुरोधाम् । ब्राह्मण आप्नोति । य एवं वेद । स खलु संवथ्सर एतैस्सेनानीभिस्सह । इन्द्राय सर्वान्कामानभिवहति । स द्रप्सः । तस्यैषा भवति ॥ ०। १। ६। १८॥

१९ अवद्रप्सो अꣳशुमतीमतिष्ठत् । इयानः कृष्णो दशभिः सहस्रैः । आवर्तमिन्द्रः शच्या धमन्तम् । उपस्नुहि तं नृमणामथद्रामिति । एतयैवेन्द्रः सलावृक्या सह । असुरान्परिवृश्चति । पृथिव्यꣳशुमती । तामन्ववस्थितः संवथ्सरो दिवं च । नैवं विदुषाऽऽचार्यान्तेवासिनौ । अन्योन्यस्मै द्रुह्याताम् । यो द्रुह्यति । भ्रश्यते स्वर्गाल्लोकात् । इत्यृतुमण्डलानि । सूर्यमण्डलान्याख्यायिकाः । अत ऊर्ध्वꣳ सनिर्वचनाः ॥ ०। १। ६। १९॥ नि जानुकां भवति द्रुह्यातां पञ्च च ॥ ६॥

२० आरोगो भ्राजः पटरः पतङ्गः । स्वर्णरो ज्योतिषीमान् विभासः । ते अस्मै सर्वे दिवमातपन्ति । ऊर्जं दुहाना अनपस्फुरन्त इति । कश्यपोऽष्टमः । स महामेरुं न जहाति । तस्यैषा भवति । यत्ते शिल्पं कश्यप रोचनावत् । इन्द्रियावत्पुष्कलं चित्रभानु । यस्मिन्थ्सूर्या अर्पितास्सप्त साकम् ॥
०। १। ७। २०॥

२१ तस्मिन्राजानमधिविश्रयेममिति । ते अस्मै सर्वे कश्यपाज्ज्योतिर्लभन्ते । तान्थ्सोमः कश्यपादधि निर्धमति । भ्रस्ताकर्मकृदिवैवम् । प्राणो जीवानीन्द्रियजीवानि । सप्त शीर्षण्याः प्राणाः । सूर्या इत्याचार्याः । अपश्यमहमेतान्थ्सप्त सूर्यानिति । पञ्चकर्णो वाथ्स्यायनः । सप्तकर्णश्च प्लाक्षिः ॥ ०। १। ७। २१॥

See the note below about placing th before sapta

२२ आनुश्रविक एव नौ कश्यप इति । उभौ वेदयिते । न हि शेकुमिव महामेरुं गन्तुम् । अपश्यमहमेतथ्सूर्यमण्डलं परिवर्तमानम् । गार्ग्यः प्राणत्रातः । गच्छन्त महामेरुम् । एकं चाजहतम् । भ्राजपटरपतङ्गा निहने । तिष्ठन्नातपन्ति । तस्मादिह तप्तितपाः ॥ ०। १। ७। २२॥

२३ अमुत्रेतरे । तस्मादिहातप्तितपाः । तेषामेषा भवति । सप्त सूर्या दिवमनुप्रविष्टाः । तानन्वेति पथिभिर्दक्षिणावान् । ते अस्मै सर्वे घृतमातपन्ति । ऊर्जं दुहाना अनपस्फुरन्त इति । सप्तर्त्विजस्सूर्या इत्याचार्याः । तेषामेषा भवति । सप्त दिशो नानासूर्याः ॥ ०। १। ७। २३॥

२४ सप्त होतार ऋत्विजः । देवा आदित्या ये सप्त । तेभिः सोमाभीरक्षण इति । तदप्याम्नायः । दिग्भ्राज ऋतून् करोति । एतयैवावृता सहस्रसूर्यताया इति वैशंपायनः । तस्यैषा भवति । यद्याव इन्द्र ते शतꣳशतं भूमीः । उत स्युः । नत्वा वज्रिन्थ्सहस्रꣳ सूर्याः ॥ ०। १। ७। २४॥

२५ अनुनजातमष्ट रोदसी इति । नानालिङ्गत्वादृतूनां नानासूर्यत्वम् । अष्टौ तु व्यवसिता इति । सूर्यमण्डलान्यष्टात ऊर्ध्वम् । तेषामेषा भवति । चित्रं देवानामुदगादनीकम् । चक्षुर्मित्रस्य वरुणस्याग्नेः । आप्रा द्यावापृथिवी अन्तरिक्षम् । सूर्य आत्मा जगतस्तस्थुषश्चेति ॥ ०। १। ७। २५॥

साकं प्लाक्षिस्तिस्त्रितपा नानासूर्याः सूर्या नव च ॥ ७॥

२६ क्वेदमभ्रन्निविशते । क्वायꣳ संवथ्सरो मिथः । क्वाहः क्वेयन्देव रात्री । क्व मासा ऋतवः श्रिताः । अर्धमासा मुहूर्ताः । निमेषास्त्रुटिभिस्सह । क्वेमा आपो निविशन्ते । यदीतो यान्ति संप्रति । काला अप्सु निविशन्ते । आपस्सूर्ये समाहिताः ॥ ०। १। ८। २६॥

२७ अभ्राण्यपः प्रपद्यन्ते । विद्युथ्सूर्ये समाहिता । अनवर्णे इमे भूमी । इयं चासौ च रोदसी । कि२ꣳस्विदत्रान्तरा भूतम् । येनेमे विधृते उभे । विष्णुना विधृते भूमी । इति वथ्सस्य वेदना । इरावती धेनुमती हि भूतम् । सूयवसिनी मनुषे दशस्ये ॥ ०। १। ८। २७॥

२८ व्यष्टभ्नाद्रोदसी विष्णवेते । दाधर्थ पृथिवीमभितो मयूखैः । किन्तद्विष्णोर्बलमाहुः । का दीप्तिः किं परायणम् । एको यद्धारयद्देवः । रेजती रोदसी उभे । वाताद्विष्णोर्बलमाहुः । अक्षराद्दीप्तिरुच्यते । त्रिपदाद्धारयद्देवः । यद्विष्णोरेकमुत्तमम् ॥ ०। १। ८। २८॥

२९ अग्नयो वायवश्चैव । एतदस्य परायणम् । पृच्छामि त्वा परं मृत्युम् । अवमं मध्यमश्चतुम् । लोकञ्च पुण्यपापानाम् । एतत्पृच्छामि संप्रति । अमुमाहुः परं मृत्युम् । पवमानं तु मध्यमम् । अग्निरेवावमो मृत्युः । चन्द्रमाश्चतुरुच्यते ॥ ०। १। ८। २९॥

३० अनाभोगाः परं मृत्युम् । पापास्संयन्ति सर्वदा । आभोगास्त्वेवं संयन्ति । यत्र पुण्यकृतो जनाः । ततो मध्यममायन्ति । चतुमग्निं च संप्रति । पृच्छामि त्वा पापकृतः । यत्र यातयते यमः । त्वं नस्तद्ब्रह्मन् प्रब्रूहि । यदि वेत्थासतो गृहान् ॥ ०। १। ८। ३०॥

३१ कश्यपादुदितास्सूर्याः । पापान्निर्घ्नन्ति सर्वदा । रोदस्योरन्तर्देशेषु । तत्र न्यस्यन्ते वासवैः । तेऽशरीराः प्रपद्यन्ते । यथाऽपुण्यस्य कर्मणः । अपाण्यपादकेशासः । तत्र तेऽयोनिजा जनाः । मृत्वा पुनर्मृत्युमापद्यन्ते । अद्यमानास्स्वकर्मभिः ॥ ०। १। ८। ३१॥

३२ आशातिकाः क्रिमय इव । ततः पूयन्ते वासवैः । अपैतं मृत्युं जयति । य एवं वेद । स खल्वैवं विद्ब्राह्मणः । दीर्घश्रुत्तमो भवति । कश्यपस्यातिथिस्सिद्धगमनस्सिद्धागमनः

। तस्यैषा भवति । आ यस्मिन्थ्सप्त वासवाः । रोहन्ति पूर्व्या रुहः ॥ ०। १। ८। ३२॥
३३ ऋषिर्ह दीर्घश्रुत्तमः । इन्द्रस्य घर्मो अतिथिरिति । कश्यपः पश्यको भवति । यथ्सर्वं परिपश्यतीति सौक्ष्म्यात् । अथाग्नेरष्टपुरुषस्य । तस्यैषा भवति । अग्ने नय सुपथा राये अस्मान् । विश्वानि देव वयुनानि विद्वान् । युयोध्यस्मज्जुहुराणमेनः । भूयिष्ठान्ते नम उक्तिं विधेमेति ॥ ०। १। ८। ३३॥ समाहिता दशस्ये उत्तममुच्यते गृहान्थ्स्वकर्मभिः पूर्व्या रुह इति ॥ ८॥
३४ अग्निश्च जातवेदाश्च । सहोजा अजिराप्रभुः । वैश्वानरो नर्यापाश्च । पङ्क्तिराधाश्च सप्तमः । विसर्पेवाऽष्टमोऽग्नीनाम् । एतेऽष्टौ वसवः, क्षिता इति । यथर्त्वेवाग्नेरर्चिर्वर्णविशेषाः । नीलार्चिश्च पीतकार्चिश्चेति । अथ वायोरेकादशपुरुषस्यैकादशस्त्रीकस्य । प्रभ्राजमाना व्यवदाताः ॥ ०। १। ९। ३४॥
३५ याश्च वासुकिवैद्युताः । रजताः परुषाः श्यामाः । कपिला अतिलोहिताः । ऊर्ध्वा अवपतन्ताश्च । वैद्युत इत्येकादश । नैनं वैद्युतो हिनस्ति । य एवं वेद । स होवाच व्यासः पाराशर्यः । विद्युद्वधमेवाहं मृत्युमैच्छमिति । न त्वकामꣳ हन्ति ॥ ०। १। ९। ३५॥
३६ य एवं वेद । अथ गन्धर्वगणाः । स्वानभ्राट् । अङ्घारिर्बम्भारिः । हस्तस्सुहस्तः । कृशानुर्विश्वावसुः । मूर्धन्वान्थ्सूर्यवर्चाः । कृतिरित्येकादश गन्धर्वगणाः । देवाश्च महादेवाः । रश्मयश्च देवा गरगिरः ॥ ०। १। ९। ३६॥
३७ नैनं गरो हिनस्ति । य एवं वेद । गौरीमिमाय सलिलानि तक्षती । एकपदी द्विपदी सा चतुष्पदी । अष्टापदी नवपदी बभूवुषी । सहस्राक्षरा परमे व्योमन्निति । वाचो विशेषणम् । अथ निगदव्याख्याताः । ताननुक्रमिष्यामः । वराहवस्स्वतपसः ॥ ०। १। ९। ३७॥
३८ विद्युन्महसो धूपयः । श्वापयो गृहमेधाश्चेत्येते । ये चेमेऽशिमिविद्विषः । पर्जन्यास्सप्त पृथिवीमभिवर्षन्ति । वृष्टिभिरिति । एतयैव विभक्तिविपरीताः । सप्तभिर्वातैरुदीरिताः । अमून् लोकानभिवर्षन्ति । तेषामेषा भवति । समानमेतदुदकम् ॥ ०। १। ९। ३८॥
३९ उच्चैत्यवचाहभिः । भूमिं पर्जन्या जिन्वन्ति । दिवं जिन्वन्त्यग्नय इति । यदक्षरं भूतकृतम् । विश्वे देवा उपासते । महर्षिमस्य गोप्तारम् । जमदग्निमकुर्वत । जमदग्निराप्यायते । छन्दोभिश्चतुरुत्तरैः । राज्ञस्सोमस्य तृप्तासः ॥ ०। १। ९। ३९॥
४० ब्रह्मणा वीर्यावता । शिवा नः प्रदिशो दिशः । तच्छंयोरावृणीमहे । गातुं यज्ञाय

। गातुं यज्ञपतये । दैवीस्वस्तिरस्तु नः । स्वस्तिर्मानुषेभ्यः । ऊर्ध्वं जिगातु भेषजम् । शन्नो अस्तु द्विपदे । शं चतुष्पदे । सोमपा३ असोमपा३ इति निगदव्याख्याताः ॥ ०। १। ९। ४०॥ व्यवदाता हन्ति गरगिरस्तपस उदकं तृप्तासश्चतुष्पद एकं च ॥ ९॥
४१ सहस्रवृदियं भूमिः । परं व्योम सहस्रवृत् । अश्विना भुज्यू नासत्या । विश्वस्य जगतस्पती । जाया भूमिः पतिर्व्योम । मिथुनन्ता अतुर्यथुः । पुत्रो बृहस्पती रुद्रः । सरमा इति स्त्रीपुमम् । शुक्रं वामन्यद्यजतं वामन्यत् । विषुरूपे अहनी द्यौरिव स्थः ॥ ०। १। १०। ४१॥
४२ विश्वा हि माया अवथः स्वधावन्तौ । भद्रा वां पूषणाविह रातिरस्तु । वासात्यौ चित्रौ जगतो निधानौ । द्यावाभूमी चरथः सꣳ सखायौ । तावश्विना रासभाश्वा हवं मे । शुभस्पती आगतꣳसूर्यया सह । त्युग्रोह भुज्युमश्विनोदमेघे । रयिन्न कश्चिन्ममृवां २ अवाहाः । तमूहथुर्नौभिरात्मन्वतीभिः । अन्तरिक्षप्रुड्भिरपोदकाभिः ॥ ०। १। १०। ४२॥
४३ तिस्रः, क्षपस्त्रिरहाऽतिव्रजद्भिः । नासत्या भुज्युमूहथुः पतङ्गैः । समुद्रस्य धन्वन्नार्द्रस्य पारे । त्रिभीरथैः शतपद्भिः षडश्वैः । सवितारं वितन्वन्तम् । अनुबध्नाति शाम्बरः । आपपूरुषम्बरश्चैव । सविताऽरेपसो भवत् । त्यꣳ सुतृप्तं विदित्वैव । बहुसोम गिरं वशी ॥ ०। १। १०। ४३॥
४४ अन्वेति तुग्रो वक्रियान्तम् । आयसूयान्थ्सोमतृप्सुषु । स संग्रामस्तमोद्योऽत्योतः । वाचो गाः पिपाति तत् । स तद्गोभिस्स्तवाऽत्येत्यन्ये । रक्षसाऽनन्विताश्च ये । अन्वेति परिवृत्यास्तः । एवमेतौ स्थो अश्विना । ते एते द्युःपृथिव्योः । अहरहर्गर्भन्दधाथे ॥ ०। १। १०। ४४॥
४५ तयोरेतौ वथ्सावहोरात्रे । पृथिव्या अहः । दिवो रात्रिः । ता अविसृष्टौ । दम्पती एव भवतः । तयोरेतौ वथ्सौ । अग्निश्चादित्यश्च । रात्रेर्वथ्सः । श्वेत आदित्यः । अह्नोऽग्निः ॥ ०। १। १०। ४५॥
४६ ताम्रो अरुणः । ता अविसृष्टौ । दम्पती एव भवतः । तयोरेतौ वथ्सौ । वृत्रश्च वैद्युतश्च । अग्नेर्वृत्रः । वैद्युत आदित्यस्य । ता अविसृष्टौ । दम्पती एव भवतः । तयोरेतौ वथ्सौ ॥ ०। १। १०। ४६॥
४७ उष्मा च नीहारश्च । वृत्रस्योष्मा । वैद्युतस्य नीहारः । तौ तावेव प्रतिपद्येते । सेयꣳ रात्री गर्भिणी पुत्रेण संवसति । तस्या वा एतदुल्बणम् । यद्रात्रौ रश्मयः । यथा गोर्गर्भिण्या उल्बणम् । एवमेतस्या उल्बणम् । प्रजयिष्णुः प्रजया च पशुभिश्च भवति । य एवं वेद । एतमुद्यन्तमपियन्तं चेति । आदित्यः पुण्यस्य वथ्सः । अथ पवित्रांगिरसः

॥ ०। १। १०। ४७॥ स्थोऽपोदकाभिर्वशी दधाथे अग्निस्तयोरेतौ वथ्सौ भवति चत्वारि च ॥ १०॥
४८ पवित्रवन्तः परिवाजमासते । पितैषां प्रत्नो अभिरक्षति व्रतम् । महस्समुद्रं वरुणस्तिरोदधे । धीरा इच्छेकुर्धरुणेष्वारभम् । पवित्रं ते विततं ब्रह्मणस्पते । प्रभुर्गात्राणि पर्येषि विश्वतः । अतप्ततनूर्न तदामो अश्नुते । शृतास इद्वहन्तस्तथ्समाशत । ब्रह्मा देवानाम् । असतस्सद्ये ततक्षुः ॥ ०। १। ११। ४८॥
४९ ऋषयस्सप्तात्रिश्च यत् । सर्वेऽत्रयो अगस्त्यश्च । नक्षत्रैः शंकृतोऽवसन् । अथ सवितुः श्यावाश्वस्यावर्तिकामस्य । अमी य ऋक्षा निहितास उच्चा । नक्तं ददृश्रे कुहचिद्दिवेयुः । अदब्धानि वरुणस्य व्रतानि । विचाकशच्चन्द्रमा नक्षत्रमेति । तथ्सवितुर्वरेण्यम् । भर्गो देवस्य धीमहि ॥ ०। १। ११। ४९॥
५० धियो यो नः प्रचोदयात् । तथ्सवितुर्वृणीमहे । वयन्देवस्य भोजनम् । श्रेष्ठꣳसर्वधातमम् । तुरं भगस्य धीमहि । अपागूहत सविता तृभीन् । सर्वान्दिवो अन्धसः । नक्तन्तान्यभवन्दृशे । अस्थ्यस्थ्ना संभविष्यामः । नाम नामैव नाम मे ॥ ०। १। ११। ५०॥
५१ नपुꣳसकं पुमाग्स्र्यस्मि । स्थावरोऽस्म्यथ जङ्गमः । यजेऽयक्षि यष्टाहे च । मया भूतान्ययक्षत । पशवो मम भूतानि । अनूबन्ध्योऽस्म्यहं विभुः । स्त्रियस्सतीः । ता उ मे पुꣳस आहुः । पश्यदक्षण्वान्नविचेतदन्धः । कविर्यः पुत्रस्स इमा चिकेत ॥ ०। १। ११। ५१॥
५२ यस्ता विजानाथ्सवितुः पिता सत् । अन्धो मणिमविन्दत् । तमनङ्गुलिरावयत् । अग्रीवः प्रत्यमुञ्चत् । तमजिह्वा असश्चत । ऊर्ध्वमूलमवाक्छाखम् । वृक्षं यो वेद सम्प्रति । न स जातु जनः श्रद्दध्यात् । मृत्युर्मा मारयादिति । हसितꣳ रुदितंगीतम् ॥ ०। १। ११। ५२॥
५३ वीणापणवलासितम् । मृतंजीवं च यत्किंचित् । अङ्गानि स्नेव विद्धि तत् । अतृष्यग्ग्स्तृष्य ध्यायत् । अस्माज्जाता मे मिथू चरन् । पुत्रो निर्ऋत्या वैदेहः । अचेता यश्च चेतनः । स तं मणिमविन्दत् । सोऽनङ्गुलिरावयत् । सोऽग्रीवः प्रत्यमुञ्चत् ॥ ०। १। ११। ५३॥
५४ सोऽजिह्वो असश्चत । नैतमृषिं विदित्वा नगरं प्रविशेत् । यदि प्रविशेत् । मिथौ चरित्वा प्रविशेत् । तथ्सम्भवस्य व्रतम् । आतमग्ने रथन्तिष्ठ । एकाश्वमेकयोजनम् । एकचक्रमेकधुरम् । वातध्राजिगतिं विभो । न रिष्यति न व्यथते ॥ ०। १। ११। ५४॥

५५ नास्याक्षो यातु सज्जति । यच्छ्वेतान्रोहिताꣳश्चाग्नेः । रथे युक्ताऽधितिष्ठति । एकया च दशभिश्च स्वभूते । द्वाभ्यामिष्टये विꣳशत्या च । तिसृभिश्च वहसे त्रिꣳशता च । नियुद्भिर्वायविहिता विमुञ्च ॥ ०। १। ११। ५५॥ ततक्षुर्धीमहि नाम मे चिकेत गीतं प्रत्यमुञ्चद्व्यथते सप्त च ॥ ११॥

५६ आतनुष्व प्रतनुष्व । उद्धमाऽऽधम सन्धम । आदित्ये चन्द्रवर्णानाम् । गर्भमाधेहि यः पुमान् । इतस्सिक्तꣳ सूर्यगतम् । चन्द्रमसे रसङ्कृधि । वारादञ्जनयाग्रेऽग्निम् । य एको रुद्र उच्यते । असंख्यातास्सहस्राणि । स्मर्यते न च दृश्यते ॥ ०। १। १२। ५६॥

५७ एवमेतन्निबोधत । आमन्द्रैरिन्द्र हरिभिः । याहि मयूररोमभिः । मा त्वा केचिन्नियेमुरिन्न पाशिनः । दधन्वेव ता इहि । मा मन्द्रैरिन्द्र हरिभिः । यामि मयूररोमभिः । मा मा केचिन्नियेमुरिन्न पाशिनः । निधन्वेव तां २ इमि । अणुभिश्च महद्भिश्च ॥ ०। १। १२। ५७॥

५८ निघृष्वैरसमायुतैः । कालैर्हरित्वमापन्नैः । इन्द्रायाहि सहस्रयुक् । अग्निर्विभ्राष्टिवसनः । वायुः श्वेतसिकद्रुकः । संवथ्सरो विषूवर्णैः । नित्यास्तेऽनुचरास्तव । सुब्रह्मण्योꣳ सुब्रह्मण्योꣳ सुब्रह्मण्योम् । इन्द्रागच्छ हरिव आगच्छ मेधातिथेः । मेष वृषणश्वस्य मेने ॥ ०। १। १२। ५८॥

५९ गौरावस्कन्दिन्नहल्यायै जार । कौशिकब्राह्मण गौतमब्रुवाण । अरुणाश्वा इहागताः । वसवः पृथिविक्षितः । अष्टौ दिग्वाससोऽग्नयः । अग्निश्च जातवेदाश्चेत्येते । ताम्राश्वास्ताम्ररथाः । ताम्रवर्णास्तथाऽसिताः । दण्डहस्ताः खादग्दतः । इतो रुद्राः पराङ्गताः ॥ ०। १। १२। ५९॥

६० उक्त२ꣳ स्थानं प्रमाणञ्च पुर इत । बृहस्पतिश्च सविता च । विश्वरूपैरिहागताम् । रथेनोदकवर्त्मना । अप्सुषा इति तद्द्वयोः । उक्तो वेषो वासाꣳसि च । कालावयवानामितः प्रतीच्या । वासात्या इत्यश्विनोः । कोऽन्तरिक्षे शब्दङ्करोतीति । वासिष्ठो रौहिणो मीमाꣳसाञ्चक्रे । तस्यैषा भवति । वाश्रेव विद्युदिति । ब्रह्मण उदरणमसि । ब्रह्मण उदीरणमसि । ब्रह्मण आस्तरणमसि । ब्रह्मण उपस्तरणमसि ॥ ०। १। १२। ६०॥ दृश्यते च मेने पराङ्गताश्चक्रे षट् च ॥ १२॥

( अपक्रामत गर्भिण्यः )

६१ अष्टयोनीमष्टपुत्राम् । अष्टपत्नीमिमां महीम् । अहं वेद न मे मृत्युः । नचामृत्युरघाऽहरत् । अष्टयोन्यष्टपुत्रम् । अष्टपदिदमन्तरिक्षम् । अहं वेद न मे मृत्युः

। नचामृत्युरघाऽहरत् । अष्टयोनीमष्टपुत्राम् । अष्टपत्नीममून्दिवम् ॥ ०। १। १३। ६१॥
६२ अहं वेद न मे मृत्युः । नचामृत्युरघाऽऽहरत् । सुत्रामाणं महीमूषु । अदितिर्द्यौरदितिरन्तरिक्षम् । अदितिर्माता स पिता स पुत्रः । विश्वे देवा अदितिः पञ्चजनाः । अदितिर्जातमदितिर्जनित्वम् । अष्टौ पुत्रासो अदितेः । ये जातास्तन्वः परि । देवां २ उपप्रैथ्सप्तभिः ॥
०। १। १३। ६२॥
६३ परा मार्ताण्डमास्यत् । सप्तभिः पुत्रैरदितिः । उपप्रैत्पूर्व्यं युगम् । प्रजायै मृत्यवे तत् । परा मार्ताण्डमाभरदिति ।ताननुक्रमिष्यामः । मित्रश्च वरुणश्च । धाता चार्यमा च । अꣳशश्च भगश्च । इन्द्रश्च विवस्वाग्श्चेत्येते । हिरण्यगर्भो हꣳसः शुचिषत् । ब्रह्मजज्ञानं तदित्पदमिति । गर्भः प्राजापत्यः । अथ पुरुषः सप्तपुरुषः ॥ ०। १। १३। ६३॥ अमून्दिवꣳसप्तभिरेते चत्वारि च ॥ १३॥
( यथास्थानं गर्भिण्यः )
६४ योऽसौ तपन्नुदेति । स सर्वेषां भूतानां प्राणानादायोदेति । मा मे प्रजाया मा पशूनाम् । मा मम प्राणानादायोदगाः । असौ योऽस्तमेति । स सर्वेषां भूतानां प्राणानादायास्तमेति । मा मे प्रजाया मा पशूनाम् । मा मम प्राणानादायाऽस्तङ्गाः । असौ य आपूर्यति । स सर्वेषां भूतानां प्राणैरापूर्यति ॥ ०। १। १४। ६४॥
६५ मा मे प्रजाया मा पशूनाम् । मा मम प्राणैरापूरिष्ठाः । असौ योऽपक्षीयति । स सर्वेषां भूतानां प्राणैरपक्षीयति । मा मे प्रजाया मा पशूनाम् । मा मम प्राणैरपक्षेष्ठाः । अमूनि नक्षत्राणि । सर्वेषां भूतानां प्राणैरपप्रसर्पन्ति चोथ्सर्पन्ति च । मा मे प्रजाया मा पशूनाम् । मा मम प्राणैरपप्रसृपत मोथ्सृपत ॥ ०। १। १४। ६५॥
६६ इमे मासाश्चार्धमासाश्च । सर्वेषां भूतानां प्राणैरपप्रसर्पन्ति चोथ्सर्पन्ति च । मा मे प्रजाया मा पशूनाम् । मा मम प्राणैरपप्रसृपत मोथ्सृपत । इम ऋतवः । सर्वेषां भूतानां प्राणैरपप्रसर्पन्ति चोथ्सर्पन्ति च । मा मे प्रजाया मा पशूनाम् । मा मम प्राणैरपप्रसृपत मोथ्सृपत । अयꣳ संवथ्सरः । सर्वेषां भूतानां प्राणैरपप्रसर्पति चोथ्सर्पति च ॥ ०। १। १४। ६६॥
६७ मा मे प्रजाया मा पशूनाम् । मा मम प्राणैरपप्रसृप मोथ्सृप । इदमहः । सर्वेषां भूतानां प्राणैरपप्रसर्पति चोथ्सर्पति च । मा मे प्रजाया मा पशूनाम् । मा मम प्राणैरपप्रसृप मोथ्सृप । इयꣳरात्रिः । सर्वेषां भूतानां प्राणैरपप्रसर्पति चोथ्सर्पति च ।

मा मे प्रजाया मा पशूनाम् । मा मम प्राणैरपप्रसृप मोथ्सृप । ओं भूर्भुवस्स्वः । एतद्वो मिथुनं मानो मिथुनꣳ रीढ्वम् ॥ ०। १। १४। ६७॥
प्राणैरापूर्यति मोथ्सृपत चोथ्सर्पति च मोथ्सृप द्वे च ॥ १४॥
६८ अथादित्यस्याष्टपुरुषस्य । वसूनामादित्यानाग् स्थाने स्वतेजसा भानि । रुद्राणामादित्यानाग् स्थाने स्वतेजसा भानि । आदित्यानामादित्यानाग् स्थाने स्वतेजसा भानि । सताꣳसत्यानाम् । आदित्यानाग् स्थाने स्वतेजसा भानि । अभिधून्वतामभिघ्नताम् । वातवतां मरुताम् । आदित्यानाग् स्थाने स्वतेजसा भानि । ऋभूणामादित्यानाग् स्थाने स्वतेजसा भानि । विश्वेषान्देवानाम् । आदित्यानाग् स्थाने स्वतेजसा भानि । संवथ्सरस्य सवितुः । आदित्यस्य स्थाने स्वतेजसा भानि । ओं भूर्भुवस्स्वः । रश्मयो वो मिथुनं मा नो मिथुनꣳ रीढ्वम् ॥ ०। १। १५। ६८॥ ऋभूणामादित्यानाग् स्थाने स्वतेजसा भानि षट् च ॥ १५॥
६९ आरोगस्य स्थाने स्वतेजसा भानि । भ्राजस्य स्थाने स्वतेजसा भानि । पटरस्य स्थाने स्वतेजसा भानि । पतङ्गस्य स्थाने स्वतेजसा भानि । स्वर्णरस्य स्थाने स्वतेजसा भानि । ज्योतिषीमतस्य स्थाने स्वतेजसा भानि । विभासस्य स्थाने स्वतेजसा भानि । कश्यपस्य स्थाने स्वतेजसा भानि । ओं भूर्भुवस्स्वः । आपो वो मिथुनं मा नो मिथुनꣳ रीढ्वम् ॥ ०। १। १६। ६९॥ आरोगस्य दश ॥ १६॥
७० अथ वायोरेकादशपुरुषस्यैकादशस्त्रीकस्य । प्रभ्राजमानानाꣳ रुद्राणाग् स्थाने स्वतेजसा भानि । व्यवदातानाꣳ रुद्राणाग् स्थाने स्वतेजसा भानि । वासुकिवैद्युतानाꣳ रुद्राणाग् स्थाने स्वतेजसा भानि । रजतानाꣳ रुद्राणाग् स्थाने स्वतेजसा भानि । परुषाणाꣳ रुद्राणाग् स्थाने स्वतेजसा भानि । श्यामानाꣳ रुद्राणाग् स्थाने स्वतेजसा भानि । कपिलानाꣳ रुद्राणाग् स्थाने स्वतेजसा भानि । अतिलोहितानाꣳ रुद्राणाग् स्थाने स्वतेजसा भानि । ऊर्ध्वानाꣳ रुद्राणाग् स्थाने स्वतेजसा भानि ॥ ०। १। १७। ७०॥
७१ अवपतन्तानाꣳ रुद्राणाग् स्थाने स्वतेजसा भानि । वैद्युतानाꣳ रुद्राणाग् स्थाने स्वतेजसा भानि । प्रभ्राजमानीनाꣳ रुद्राणीनाग् स्थाने स्वतेजसा भानि । व्यवदातीनाꣳ रुद्राणीनाग् स्थाने स्वतेजसा भानि । वासुकिवैद्युतीनाꣳ रुद्राणीनाग् स्थाने स्वतेजसा भानि । रजतानाꣳ रुद्राणीनाग् स्थाने स्वतेजसा भानि । परुषाणाꣳ रुद्राणीनाग् स्थाने स्वतेजसा भानि । श्यामानाꣳ रुद्राणीनाग् स्थाने स्वतेजसा भानि । कपिलानाꣳ

रुद्राणीनाग् स्थाने स्वतेजसा भानि । अतिलोहितीनाँ रुद्राणीनाग् स्थाने स्वतेजसा भानि । ऊर्ध्वानाँ रुद्राणीनाग् स्थाने स्वतेजसा भानि । अवपतन्तीनाँ रुद्राणीनाग् स्थाने स्वतेजसा भानि । वैद्युतीनाँ रुद्राणीनाग् स्थाने स्वतेजसा भानि । ओं भूर्भुवस्स्वः । रूपाणि वो मिथुनं मा नो मिथुनँ रीढ्वम् ॥ ०। १। १७। ७१॥

ऊर्ध्वानाँ रुद्राणाग् स्थाने स्वतेजसा भान्यतिलोहितीनाँ रुद्राणीनाग् स्थाने स्वतेजसा भानि पञ्च च ॥ १७॥

७२ अथाग्नेरष्टपुरुषस्य । अग्नेः पूर्वदिश्यस्य स्थाने स्वतेजसा भानि । जातवेदस उपदिश्यस्य स्थाने स्वतेजसा भानि । सहोजसो दक्षिणदिश्यस्य स्थाने स्वतेजसा भानि । अजिराप्रभव उपदिश्यस्य स्थाने स्वतेजसा भानि । वैश्वानरस्यापरदिश्यस्य स्थाने स्वतेजसा भानि । नर्यापस उपदिश्यस्य स्थाने स्वतेजसा भानि । पङ्क्तिराधस उदग्दिश्यस्य स्थाने स्वतेजसा भानि । विसर्पिण उपदिश्यस्य स्थाने स्वतेजसा भानि । ओं भूर्भुवस्स्वः । दिशो वो मिथुनं मा नो मिथुनँ रीढ्वम् ॥ ०। १। १८। ७२॥

स्वरेकश्च ॥ १८॥ एतद्रश्मय आपो रूपाणि दिशः पञ्च ॥

७३ दक्षिणपूर्वस्यान्दिशि विसर्पी नरकः । तस्मान्नः परिपाहि । दक्षिणाऽपरस्यान्दिश्यविसर्पी नरकः । तस्मान्नः परिपाहि । उत्तरपूर्वस्यान्दिशि विषादी नरकः । तस्मान्नः परिपाहि । उत्तरापरस्यान्दिश्यविषादी नरकः । तस्मान्नः परिपाहि । आयस्मिन्थ्सप्त वासवा इन्द्रियाणि शतक्रतवित्येते ॥ ०। १। १९। ७३॥ दक्षिणपूर्वस्यां नव ॥ १९॥

७४ इन्द्रघोषा वो वसुभिः पुरस्तादुपदधताम् । मनोजवसो वः पितृभिर्दक्षिणत उपदधताम् । प्रचेता वो रुद्रैः पश्चादुपदधताम् । विश्वकर्मा व आदित्यैरुत्तरत उपदधताम् । त्वष्टा वो रूपैरुपरिष्टादुपदधताम् । संज्ञानं वः पश्चादिति । आदित्यस्सर्वोऽग्निः पृथिव्याम् । वायुरन्तरिक्षे । सूर्यो दिवि । चन्द्रमा दिक्षु । नक्षत्राणि स्वलोके । एवा ह्येव । एवा ह्यग्ने । एवा हि वायो । एवा हीन्द्र । एवा हि पूषन् । एवा हि देवाः ॥ ०। १। २०। ७४॥ दिक्षु सप्त च ॥ २०॥

७५ आपमापामपः सर्वाः । अस्मादस्मादितोऽमुतः । अग्निर्वायुश्च सूर्यश्च । सह सञ्चस्करर्द्धिया । वाय्वश्वा रश्मिपतयः । मरीच्यात्मानो अद्रुहः । देवीर्भुवनसूवरीः । पुत्रवत्त्वाय मे सुत । महानाम्नीर्महामानाः । महसो महसस्स्वः ॥ ०। १। २१। ७५॥

७६ देवीः पर्जन्यसूवरीः । पुत्रवत्त्वाय मे सुत । अपाऽश्न्युष्णिमपारक्षः ।

अपाऽश्र्युष्णिमपारघम् । अपाघ्रामपचाऽवर्तिम् । अपदेवीरितो हित । वज्रन्देवीरजीताग्श्च । भुवनन्देवसूवरीः । आदित्यानदितिन्देवीम् । योनिनोर्ध्वमुदीषत ॥ ०। १। २१। ७६॥

७७ भद्रं कर्णेभिः शृणुयाम देवाः । भद्रं पश्येमाक्षभिर्यजत्राः । स्थिरैरङ्गैस्तुष्टुवाꣳ सस्तनूभिः । व्यशेम देवहितं यदायुः । स्वस्ति न इन्द्रो वृद्धश्रवाः । स्वस्ति नः पूषा विश्ववेदाः । स्वस्तिनस्ताक्ष्र्यो अरिष्टनेमिः । स्वस्ति नो बृहस्पतिर्दधातु । केतवो अरुणासश्च । ऋषयो वातरशनाः । प्रतिष्ठाꣳ शतधा हि । समाहितासो सहस्रधायसम् । शिवा नः शन्तमा भवन्तु । दिव्या आप ओषधयः । सुमृडीका सरस्वति । मा ते व्योम संदृशि ॥ ०। १। २१। ७७॥

स्वरुदीषत वातरशना षड्च ॥ २१॥

७८ योऽपां पुष्पं वेद । पुष्पवान्प्रजावान्पशुमान्भवति । चन्द्रमा वा अपां पुष्पम् । पुष्पवान्प्रजावान्पशुमान्भवति । य एवं वेद । योऽपामायतनं वेद । आयतनवान्भवति । अग्निर्वा अपामायतनम् । आयतनवान्भवति । योऽग्नेरायतनं वेद ॥ ०। १। २२। ७८॥

७९ आयतनवान्भवति । आपो वा अग्नेरायतनम् । आयतनवान्भवति । य एवं वेद । योऽपामायतनं वेद । आयतनवान्भवति । वायुर्वा अपामायतनम् । आयतनवान्भवति । यो वायोरायतनं वेद । आयतनवान्भवति ॥ ०। १। २२। ७९॥

८० आपो वै वायोरायतनम् । आयतनवान्भवति । य एवं वेद । योऽपामायतनं वेद । आयतनवान्भवति । असौ वै तपन्नपामायतनम् । आयतनवान्भवति । योऽमुष्य तपत आयतनं वेद । आयतनवान्भवति । आपो वा अमुष्य तपत आयतनम् ॥ ०। १। २२। ८०॥

८१ आयतनवान्भवति । य एवं वेद । योऽपामायतनं वेद । आयतनवान्भवति । चन्द्रमा वा अपामायतनम् । आयतनवान्भवति । यश्चन्द्रमस आयतनं वेद । आयतनवान्भवति । आपो वै चन्द्रमस आयतनम् । आयतनवान्भवति ॥ ०। १। २२। ८१॥

८२ य एवं वेद । योऽपामायतनं वेद । आयतनवान्भवति । नक्षत्राणि वा अपामायतनम् । आयतनवान्भवति । यो नक्षत्राणामायतनं वेद । आयतनवान्भवति । आपो वै नक्षत्राणामायतनम् । आयतनवान्भवति । य एवं वेद ॥ ०। १। २२। ८२॥

८३ योऽपामायतनं वेद । आयतनवान्भवति । पर्जन्यो वा अपामायतनम् । आयतनवान्भवति । यः पर्जन्यस्याऽऽयतनं वेद । आयतनवान्भवति । आपो वै पर्जन्यस्याऽऽयतनम् । आयतनवान्भवति । य एवं वेद । योऽपामायतनं वेद ॥ ०।

१। २२। ८३॥
८४ आयतनवान्भवति । संवथ्सरो वा अपामायतनम् । आयतनवान्भवति । यस्संवथ्सरस्यायतनं वेद । आयतनवान्भवति । आपो वै संवथ्सरस्याऽऽयतनम् । आयतनवान्भवति । य एवं वेद । योऽप्सु नावं प्रतिष्ठितां वेद । प्रत्येव तिष्ठति ॥ ०। १। २२। ८४॥
८५ इमे वै लोका अप्सु प्रतिष्ठिताः । तदेषाऽभ्यनूक्ता । अपाꣳ रसमुदयꣳ सन् । सूर्ये शुक्रꣳ समाभृतम् । अपाꣳ रसस्य यो रसः । तं वो गृह्णाम्युत्तममिति । इमे वै लोका अपाꣳ रसः । तेऽमुष्मिन्नादित्ये समाभृताः । जानुदघ्नीमुत्तरवेदीङ्खात्वा । अपां पूरयित्वा गुल्फदघ्नम् ॥ ०। १। २२। ८५॥
८६ पुष्करपर्णैः पुष्करदण्डैः पुष्करैश्च सꣳस्तीर्य । तस्मिन्विहायसे । अग्निं प्रणीयोपसमाधाय । ब्रह्मवादिनो वदन्ति । कस्मात्प्रणीतेऽयमग्निश्चीयते । साप्रणीतेऽयमप्सु ह्ययꣳश्चीयते । असौ भुवनेऽप्यनाहिताग्निरेताः । तमभित एता अबीष्टका उपदधाति । अग्निहोत्रे दर्शपूर्णमासयोः । पशुबन्धे चातुर्मास्येषु ॥ ०। १। २२। ८६॥
८७ अथो आहुः । सर्वेषु यज्ञक्रतुष्विति । एतद्ध स्म वा आहुः शण्डिलाः । कमग्निंचिनुते । सत्रियमग्निंचिन्वानः । संवथ्सरं प्रत्यक्षेण । कमग्निंचिनुते । सावित्रमग्निंचिन्वानः । अमुमादित्यं प्रत्यक्षेण । कमग्निंचिनुते ॥ ०। १। २२। ८७॥
८८ नाचिकेतमग्निंचिन्वानः । प्राणान्प्रत्यक्षेण । कमग्निंचिनुते । चातुर्होत्रियमग्निंचिन्वानः । ब्रह्म प्रत्यक्षेण । कमग्निंचिनुते । वैश्वसृजमग्निंचिन्वानः । शरीरं प्रत्यक्षेण । कमग्निंचिनुते । उपानुवाक्यमाशुमग्निंचिन्वानः ॥ ०। १। २२। ८८॥
८९ इमान् लोकान्प्रत्यक्षेण । कमग्निंचिनुते । इममारुणकेतुकमग्निंचिन्वान इति । य एवासौ । इतश्चामुतश्चाऽव्यतीपाती । तमिति । योऽग्नेर्मिथूया वेद । मिथुनवान्भवति । आपो वा अग्नेर्मिथूयाः । मिथुनवान्भवति । य एवं वेद ॥ ०। १। २२। ८९॥ वेद भवत्यायतनमायतनवान्भवति वेद य एवं वेद वेद तिष्ठति गुल्फदघ्नं चातुर्मास्येष्वमुमादित्यं प्रत्यक्षेण कमग्निंचिनुत उपानुवाक्यमाशुमग्निंचिन्वानो मिथूया मिथुनवान्भवत्येकञ्च ॥ २२॥ पुष्पमग्निर्वायुरसौ वै तपश्चन्द्रमा नक्षत्राणि पर्जन्यस्संवत्थ्सरस्तिष्ठति सत्रियꣳ संवथ्सरꣳ सावित्रममुन्नाचिकेतं प्राणाग्श्चातुर्होत्रियं ब्रह्म वैश्वसृजꣳ शरीरमुपानुवाक्यमाशुमिमान् लोकानिममारुनकेतुकं य एवासौ ॥

९० आपो वा इदमासन्थ्सलिलमेव । स प्रजापतिरेकः पुष्करपर्णे समभवत् ।
तस्यान्तर्मनसि कामः समवर्तत । इदꣳ सृजेयमिति । तस्माद्यत्पुरुषो मनसाऽभिगच्छति
। तद्वाचा वदति । तत्कर्मणा करोति । तदेषाऽभ्यनूक्ता । कामस्तदग्रे समवर्तताधि ।
मनसो रेतः प्रथमं यदासीत् ॥ ०। १। २३। ९०॥
९१ सतो बन्धुमसति निरविन्दन् । हृदि प्रतीष्या कवयो मनीषेति । उपैनन्तदुपनमति
। यत्कामो भवति । य एवं वेद । स तपोऽतप्यत । स तपस्तप्त्वा । शरीरमधूनुत ।
तस्य यन्माꣳसमासीत् । ततोऽरुणाः केतवो वातरशना ऋषय उदतिष्ठन् ॥ ०। १।
२३। ९१॥
९२ ये नखाः । ते वैखानसाः । ये वालाः । ते वालखिल्याः । यो रसः । सोऽपाम् ।
अन्तरतः कूर्मं भूतꣳ सर्पन्तम् । तमब्रवीत् । मम वैत्वङ्माꣳसा । समभूत् ॥ ०। १।
२३। ९२॥
९३ नेत्यब्रवीत् । पूर्वमेवाहमिहासमिति । तत्पुरुषस्य पुरुषत्वम् । स सहस्रशीर्षा पुरुषः
। सहस्राक्षस्सहस्रपात् । भूत्वोदतिष्ठत् । तमब्रवीत् । त्वं वै पूर्वꣳसमभूः । त्वमिदं पूर्वः
कुरुष्वेति । स इत आदायापः ॥ ०। १। २३। ९३॥
९४ अञ्जलिना पुरस्तादुपादधात् । एवाह्येवेति । तत आदित्य उदतिष्ठत् । सा प्राची
दिक् । अथारुणः केतुर्दक्षिणत उपादधात् । एवाह्यग्न इति । ततो वा अग्निरुदतिष्ठत्
। सा दक्षिणा दिक् । अथारुणः केतुः पश्चादुपादधात् । एवाहि वायो इति ॥ ०। १।
२३। ९४॥
९५ ततो वायुरुदतिष्ठत् । सा प्रतीची दिक् । अथारुणः केतुरुत्तरत उपादधात् ।
एवाहीन्द्रेति । ततो वा इन्द्र उदतिष्ठत् । सोदीची दिक् । अथारुणः केतुर्मध्य उपादधात्
। एवाहि पूषन्निति । ततो वै पूषोदतिष्ठत् । सेयन्दिक् ॥ ०। १। २३। ९५॥
९६ अथारुणः केतुरुपरिष्टादुपादधात् । एवाहि देवा इति । ततो देवमनुष्याः पितरः ।
गन्धर्वाप्सरसश्चोदतिष्ठन् । सोर्ध्वा दिक् । या विप्रुषो विपरापतन् । ताभ्योऽसुरा रक्षाꣳसि
पिशाचाश्चोदतिष्ठन् । तस्मात्ते पराभवन् । विप्रुड्भ्यो हि ते समभवन् । तदेषाऽभ्यनूक्ता ॥
०। १। २३। ९६॥
९७ आपो ह यद्बृहतीर्गर्भमायन् । दक्षन्दधाना जनयन्तीः स्वयंभुम् । तत इमेऽध्यसृज्यन्त
सर्गाः । अद्भ्यो वा इदꣳ समभूत् । तस्मादिदꣳ सर्वं ब्रह्म स्वयंम्भ्विति । तस्मादिदꣳ
सर्वꣳ शिथिलमिवाध्रुवमिवाभवत् । प्रजापतिर्वाव तत् । आत्मनात्मानं विधाय ।

तदेवानुप्राविशत् । तदेषाऽभ्यनूक्ता ॥ ०। १। २३। ९७॥
९८ विधाय लोकान्, विधाय भूतानि । विधाय सर्वाः प्रदिशो दिशश्च । प्रजापतिः प्रथमजा ऋतस्य । आत्मनात्मानमभिसंविवेशेति । सर्वमेवेदमाप्त्वा । सर्वमवरुद्ध्य । तदेवानुप्रविशति । य एवं वेद ॥ ०। १। २३। ९८॥ आसीदतिष्ठन्नभूदपो वायो इति सेयन्दिगभ्यनूक्ताऽ भ्यनूक्ताऽष्टौ च ॥ २३॥
९९ चतुष्टय्य आपो गृह्णाति । चत्वारि वा अपाꣳ रूपाणि । मेघो विद्युत् । स्तनयित्नुर्वृष्टिः । तान्येवावरुन्धे । आतपति वर्ष्या गृह्णाति । ताः पुरस्तादुपदधाति । एता वै ब्रह्मवर्चस्या आपः । मुखत एव ब्रह्मवर्चसमवरुन्धे । तस्मान्मुखतो ब्रह्मवर्चसितरः ॥ ०। १। २४। ९९॥
१०० कूप्या गृह्णाति । ता दक्षिणत उपदधाति । एता वै तेजस्विनीरापः । तेज एवास्य दक्षिणतो दधाति । तस्माद्दक्षिणोऽर्धस्तेजस्वितरः । स्थावरा गृह्णाति । ताः पश्चादुपदधाति । प्रतिष्ठिता वै स्थावराः । पश्चादेव प्रतितिष्ठति । वहन्तीर्गृह्णाति ॥ ०। १। २४। १००॥
१०१ ता उत्तरत उपदधाति । ओजसा वा एता वहन्तीरिवोद्गतीरिव आकूजतीरिव धावन्तीः । ओज एवास्योत्तरतो दधाति । तस्मादुत्तरोऽर्ध ओजस्वितरः । संभार्या गृह्णाति । ता मध्य उपदधाति । इयं वै संभार्याः । अस्यामेव प्रतितिष्ठति । पल्वल्या गृह्णाति । ता उपरिष्टादुपादधाति ॥ ०। १। २४। १०१॥
१०२ असौ वै पल्वल्याः । अमुष्यामेव प्रतितिष्ठति । दिक्षूपदधाति । दिक्षु वा आपः । अन्नं वा आपः । अद्भ्यो वा अन्नञ्जायते । यदेवाद्भ्योऽन्नञ्जायते । तदवरुन्धे । तं वा एतमरुणाः केतवो वातरशना ऋषयोऽचिन्वन् । तस्मादारुणकेतुकः ॥ ०। १। २४। १०२॥
१०३ तदेषाऽभ्यनूक्ता । केतवो अरुणासश्च । ऋषयो वातरशनाः । प्रतिष्ठाꣳ शतधाहि । समाहितासो सहस्रधायसमिति । शतशश्चैव सहस्रशश्च प्रतितिष्ठति । य एतमग्निंचिनुते । य उचैनमेवं वेद ॥ ०। १। २४। १०३॥ ब्रह्मवर्चसितरो वहन्तीर्गृह्णाति ता उपरिष्टादुपादधात्यारुणकेतुकोऽष्टौ च ॥ २४॥
१०४ जानुदघ्नीमुत्तरवेदीङ्खात्वा । अपां पूरयति । अपाꣳ सर्वत्वाय । पुष्करपर्णꣳ रुक्मं पुरुषमित्युपदधाति । तपो वै पुष्करपर्णम् । सत्यꣳ रुक्मः । अमृतं पुरुषः । एतावद्वावास्ति । यावदेतत् । यावदेवास्ति ॥ ०। १। २५। १०४॥
१०५ तदवरुन्धे । कूर्ममुपदधाति । अपामेव मेधमवरुन्धे । अथो स्वर्गस्य लोकस्य

समष्ट्यै । आपमापामपस्सर्वाः । अस्मादस्मादितोऽमुतः । अग्निर्वायुश्च सूर्यश्च । सहसश्चस्करर्द्धिया इति । वाय्वश्वा रश्मिपतयः । लोकं पृणच्छिद्रं पृण ॥ ०। १। २५। १०५॥

१०६ यास्तिस्रः परमजाः । इन्द्रघोषा वो वसुभिरेवाह्येवेति । पञ्चचितय उपदधाति । पाङ्क्तोऽग्निः । यावानेवाग्निः । तंचिनुते । लोकंपृणया द्वितीयामुपदधाति । पञ्चपदा वै विराट् । तस्या वा इयं पादः । अन्तरिक्षं पादः । द्यौः पादः । दिशः पादः । परोरजाः पादः । विराज्येव प्रतितिष्ठति । य एतमग्निंचिनुते । य उ चैनमेवं वेद ॥ ०। १। २५। १०६॥ अस्ति पृणान्तरिक्षं पादः षट्च ॥ २५॥

१०७ अग्निं प्रणीयोपसमाधाय । तमभित एता अबीष्टका उपदधाति । अग्निहोत्रे दर्शपूर्णमासयोः । पशुबन्धे चातुर्मास्येषु । अथो आहुः । सर्वेषु यज्ञक्रतुष्विति । अथ हस्माहारुणः स्वायंभुवः । सावित्रः सर्वोऽग्निरित्यननुषङ्गं मन्यामहे । नाना वा एतेषां वीर्याणि । कमग्निंचिनुते ॥ ०। १। २६। १०७॥

१०८ सत्रियमग्निंचिन्वानः । कमग्निंचिनुते । सावित्रमग्निंचिन्वानः । कमग्निंचिनुते । नाचिकेतमग्निंचिन्वानः । कमग्निंचिनुते । चातुर्होत्रियमग्निंचिन्वानः । कमग्निंचिनुते । वैश्वसृजमग्निंचिन्वानः । कमग्निंचिनुते ॥ ०। १। २६। १०८॥

१०९ उपानुवाक्यमाशुमग्निंचिन्वानः । कमग्निंचिनुते । इममारुणकेतुकमग्निंचिन्वान इति । वृषा वा अग्निः । वृषाणौ स२ँ स्फालयेत् । हन्येतास्य यज्ञः । तस्मान्नानुषज्यः । सोत्तरवेदिषु क्रतुषु चिन्वीत । उत्तरवेद्याग् ह्यग्निश्चीयते । प्रजाकामश्चिन्वीत ॥ ०। १। २६। १०९॥

११० प्राजापत्यो वा एषोऽग्निः । प्राजापत्याः प्रजाः । प्रजावान्भवति । य एवं वेद । पशुकामश्चिन्वीत । संज्ञानं वा एतत्पशूनाम् । यदापः । पशूनामेव संज्ञानेऽग्निंचिनुते । पशुमान्भवति । य एवं वेद ॥ ०। १। २६। ११०॥

१११ वृष्टिकामश्चिन्वीत । आपो वै वृष्टिः । पर्जन्यो वर्षुको भवति । य एवं वेद । आमयावी चिन्वीत । आपो वै भेषजम् । भेषजमेवास्मै करोति । सर्वमायुरेति । अभिचरग्ग्श्चिन्वीत । वज्रो वा आपः ॥ ०। १। २६। १११॥

११२ वज्रमेव भ्रातृव्येभ्यः प्रहरति । स्तृणुत एनम् । तेजस्कामो यशस्कामः । ब्रह्मवर्चसकामः स्वर्गकामश्चिन्वीत । एतावद्वा वास्ति । यावदेतत् । यावदेवास्ति । तदवरुन्धे । तस्यैतद्व्रतम् । वर्षति न धावेत् ॥ ०। १। २६। ११२॥

११३ अमृतं वा आपः । अमृतस्यानन्तरित्यै । नाप्सु मूत्रपुरीषङ्कुर्यात् । न निष्ठीवेत् । न विवसनस्स्नायात् । गुह्यो वा एषोऽग्निः । एतस्याग्नेरनतिदाहाय । न पुष्करपर्णानि हिरण्यं वाऽधितिष्ठेत् । एतस्याग्नेरनभ्यारोहाय । न कूर्मस्याश्नीयात् । नोदकस्याघातुकान्येनमोदकानि भवन्ति । अघातुका आपः । य एतमग्निंचिनुते । य उचैनमेवं वेद ॥ ०। १। २६। ११३॥ चिनुते चिनुते प्रजाकामश्चिन्वीत य एवं वेदापो धावेदश्नीयाच्चत्वारि च ॥ २६॥
११४ इमानुकं भुवना सीषधेम । इन्द्रश्च विश्वे च देवाः । यज्ञश्च नस्तन्वश्च प्रजाश्च । आदित्यैरिन्द्रस्सह सीषधातु । आदित्यैरिन्द्रस्सगणो मरुद्भिः । अस्माकं भूत्वविता तनूनाम् । आप्लवस्व प्रप्लवस्व । आण्डी भव ज मा मुहुः । सुखादीन्दुःखनिधनाम् । प्रतिमुञ्चस्व स्वां पुरम् ॥ ०। १। २७। ११४॥
११५ मरीचयः स्वायंभुवाः । ये शरीराण्यकल्पयन् । ते ते देहङ्कल्पयन्तु । मा च ते ख्या स्म तीरिषत् । उत्तिष्ठत मा स्वप्त । अग्निमिच्छध्वं भारताः । राज्ञस्सोमस्य तृप्तासः । सूर्येण सयुजोषसः । युवा सुवासाः । अष्टाचक्रा नवद्वारा ॥ ०। १। २७। ११५॥
११६ देवानां पूरयोध्या । तस्याँ हिरण्मयः कोशः । स्वर्गो लोको ज्योतिषाऽऽवृतः । यो वै तां ब्रह्मणो वेद । अमृतेनाऽऽवृतां पुरीम् । तस्मै ब्रह्म च ब्रह्मा च । आयुः कीर्तिं प्रजान्ददुः । विभ्राजमानाँ हरिणीम् । यशसा संपरीवृताम् । पुरँ हिरण्मयीं ब्रह्मा ॥ ०। १। २७। ११६॥
११७ विवेशाऽपराजिता । पराङेत्यज्यामयी । पराङेत्यनाशकी । इह चामुत्र चान्वेति । विद्वान्देवासुरानुभयान् । यत्कुमारी मन्द्रयते । यद्योषद्यत्पतिव्रता । अरिष्टं यत्किञ्च क्रियते । अग्निस्तदनुवेधति । अशृतासः शृतासश्च ॥ ०। १। २७। ११७॥
११८ यज्वानो येऽप्ययज्वनः । स्वर्यन्तो नापेक्षन्ते । इन्द्रमग्निश्च ये विदुः । सिकता इव संयन्ति । रश्मिभिस्समुदीरिताः । अस्माल्लोकादमुष्माच्च । ऋषिभिरदात्पृश्निभिः । अपेत वीत वि च सर्पतातः । येऽत्र स्थ पुराणा ये च नूतनाः । अहोभिरद्भिरक्तुभिर्व्यक्तम् ॥ ०। १। २७। ११८॥
११९ यमो ददात्ववसानमस्मै । नृ मुणन्तु नृ पात्वर्यः । अकृष्टा ये च कृष्टजाः । कुमारीषु कनीनीषु । जारिणीषु च ये हिताः । रेतःपीता आण्डपीताः । अङ्गारेषु च ये हुताः । उभयान्पुत्रपौत्रकान् । युवेऽहं यमराजगान् । शतमिन्नु शरदः । अदो यद्ब्रह्म विलबम् । पितृणाञ्च यमस्य च । वरुणस्याश्विनोरग्नेः । मरुताञ्च विहायसाम् । कामप्रयवणं

मे अस्तु । स ह्येवास्मि सनातनः । इति नाको ब्रह्मिश्रवो रायो धनम् । पुत्रानापो देवीरिहाहिता ॥ ०। १। २७। ११९॥
पुरन्नवद्वारा ब्रह्मा च व्यक्तꣳ शरदोऽष्टौ च ॥ २७॥
१२० विशीर्ष्णीं गृध्रशीर्ष्णीञ्च । अपेतो निर्ऋतिꣳ हथः । परिबाध२ꣳ श्वेतकुक्षम् । निजङ्घꣳ शबलोदरम् । स तान्, वाच्यायया सह । अग्ने नाशय संदृशः । ईर्ष्यासूये बुभुक्षाम् । मन्युं कृत्याञ्च दीधिरे । रथेन किꣳशुकावता । अग्ने नाशय संदृशः ॥ ०। १। २८। १२०॥
१२१ पर्जन्याय प्रगायत । दिवस्पुत्राय मीढुषे । स नो यवसमिच्छतु । इदं वचः पर्जन्याय स्वराजे । हृदो अस्त्वन्तरन्तद्युयोत । मयोभूर्वातो विश्वकृष्टयः सन्त्वस्मे । सुपिप्पला ओषधीर्देवगोपाः । यो गर्भमोषधीनाम् । गवाङ्कृणोत्यर्वताम् । पर्जन्यः पुरुषीणाम् ॥ ०। १। २९। १२१॥ विशीर्ष्णीं पर्जन्याय दशदश ॥ २९॥
१२२ पुनर्मामैत्विन्द्रियम् । पुनरायुः पुनर्भगः । पुनर्ब्राह्मणमैतु मा । पुनर्द्रविणमैतु मा । यन्मेऽद्य रेतः पृथिवीमस्कान् । यदोषधीरप्यसरद्यदापः । इदन्तत्पुनराददे । दीर्घायुत्वाय वर्चसे । यन्मे रेतः प्रसिच्यते । यन्म आजायते पुनः । तेन माममृतङ्कुरु । तेन सुप्रजसङ्कुरु ॥ ०। १। ३०। १२२॥ पुनर्द्वे च ॥ ३०॥
१२३ अद्भ्यस्तिरोधाऽजायत । तव वैश्रवणस्सदा । तिरोधेहि सपत्नान्नः । ये अपोऽश्नन्ति केचन । त्वाष्ट्रीं मायां वैश्रवणः । रथꣳ सहस्रवन्धुरम् । पुरुश्चक्रꣳ सहस्राश्वम् । आस्थायायाहि नो बलिम् । यस्मै भूतानि बलिमावहन्ति । धनङ्गावो हस्तिहिरण्यमश्वान् ॥ ०। १। ३१। १२३॥
१२४ असाम सुमतौ यज्ञियस्य । श्रियं बिभ्रतोऽन्नमुखीं विराजम् । सुदर्शने च क्रोञ्चे च । मैनागे च महागिरौ । सतद्वाट्टारगमन्ता । सꣳहार्यन्नगरं तव । इति मन्त्राः । कल्पोऽत ऊर्ध्वम् । यदि बलिꣳ हरेत् । हिरण्यनाभये वितुदये कौबेरायायं बलिः ॥ ०। १। ३१। १२४॥
१२५ सर्वभूताधिपतये नम इति । अथ बलिꣳ हृत्वोपतिष्ठेत । क्षत्रं क्षत्रं वैश्रवणः । ब्राह्मणा वयग्ग्स्मः । नमस्ते अस्तु मा मा हिꣳसीः । अस्मात्प्रविश्यान्नमद्धीति । अथ तमग्निमादधीत । यस्मिन्नेतत्कर्म प्रयुंजीत । तिरोधा भूः । तिरोधा भुवः ॥ ०। १। ३१। १२५॥
१२६ तिरोधास्स्वः । तिरोधा भूर्भुवस्स्वः । सर्वेषां लोकानामाधिपत्ये सीदेति । अथ

तमग्निमिन्धीत । यस्मिन्नेतत्कर्म प्रयुंजीत । तिरोधा भूस्स्वाहा । तिरोधा भुवस्स्वाहा । तिरोधा स्वस्स्वाहा । तिरोधा भूर्भुवस्स्वस्स्वाहा । यस्मिन्नस्य काले सर्वा आहुतीर्हुता भवेयुः ॥ ०। १। ३१। १२६॥

१२७ अपि ब्राह्मणमुखीनाः । तस्मिन्नह्नः काले प्रयुंजीत । परः सुप्तजनाद्वेपि । मास्म प्रमाद्यन्तमाध्यापयेत् । सर्वार्थाः सिद्ध्यन्ते । य एवं वेद । क्षुध्यन्निदमजानताम् । सर्वार्था न सिद्ध्यन्ते । यस्ते विघातुको भ्राता । ममान्तर्हृदये श्रितः ॥ ०। १। ३१। १२७॥

१२८ तस्मा इमंमग्रपिण्डञ्जुहोमि । समैऽर्थान्मा विवधीत् । मयि स्वाहा । राजाधिराजाय प्रसह्यसाहिने । नमो वयं वैश्रवणाय कुर्महे । स मे कामान्कामकामाय मह्यम् । कामेश्वरो वैश्रवणो ददातु । कुबेराय वैश्रवणाय । महाराजाय नमः । केतवो अरुणासश्च । ऋषयो वातरशनाः । प्रतिष्ठाꣳ शतधा हि । समाहितासो सहस्रधायसम् । शिवा नः शन्तमा भवन्तु । दिव्या आप ओषधयः । सुमृडीका सरस्वति । मा ते व्योम संदृशि ॥ ०। १। ३१। १२८॥ अश्वान्बलिर्भुवो भवेयुः श्रितश्च सप्त च ॥ ३१॥

१२९ संवथ्सरमेतद्व्रतञ्चरेत् । द्वौ वा मासौ । नियमस्समासेन । तस्मिन्नियमविशेषाः । त्रिषवणमुदकोपस्पर्शी । चतुर्थकालपानभक्तस्स्यात् । अहरहर्वा भैक्षमश्नीयात् । औदुम्बरीभिः समिद्भिरग्निं परिचरेत् । पुनर्मा मैत्त्विन्द्रियमित्येतेनाऽनुवाकेन । उद्धृतपरिपूताभिरद्भिः कार्यङ्कुर्वीत ॥ ०। १। ३२। १२९॥

१३० असञ्चयवान् । अग्नये वायवे सूर्याय । ब्रह्मणे प्रजापतये । चन्द्रमसे नक्षत्रेभ्यः । ऋतुभ्यस्संवथ्सराय । वरुणायारुणायेति व्रतहोमाः । प्रवर्ग्यवदादेशः । अरुणाः काण्डऋषयः । अरण्येऽधीयीरन् । भद्रं कर्णेभिरिति द्वे जपित्वा ॥ ०। १। ३२। १३०॥

१३१ महानाम्नीभिरुदकꣳ सꣳस्पृश्य । तमाचार्यो दद्यात् । शिवा नः शन्तमेत्योषधीरालभते । सुमृडीकेति भूमिम् । एवमपवर्गे । धेनुर्दक्षिणा । कꣳसं वासश्च क्षौमम् । अन्यद्वाशुक्लम् । यथाशक्ति वा । एवꣳ स्वाध्याय धर्मेण । अरण्येऽधीयीत । तपस्वी पुण्यो भवति तपस्वी पुण्यो भवति ॥ ०। १। ३२। १३१॥ कुर्वीत जपित्वा स्वाध्यायधर्मेण द्वे च ॥ ३२॥ भद्रꣳ स्मृतिस्साकञ्जानामक्ष्यति ताम्राण्यत्यूर्ध्वाक्ष आरोगः क्वेदमग्निश्च सहस्रवृत्पवित्रवन्त आतनुष्वाष्टयोनीं योऽसावथादित्यस्यारोगस्याथ वायोरथाग्नेर्दक्षिणा पूर्वस्यामिन्द्रघोषा व आपमापां योऽपामापो वै चतुष्टय्यो जानुदघ्नीमग्निं प्रणीयेमा नुकं विशीर्ष्णी पर्जन्याय पुनरद्भ्यः संवथ्सरं द्वात्रिꣳशत् ॥

३२॥ भद्रं ज्योतिषा तस्मिन्राजानङ्क्ष्यपाथ्सहस्रवृदियन्नपुꣳ संकमष्टयोनीमवपतन्तानामायतनवान्म
सतो बन्धुं ता उत्तरतो वज्रमेव पुनर्मामैतु त्रिꣳशदुत्तरशतम् ॥ १३०॥ भद्रं तपस्वी
पुण्यो भवति तपस्वी पुण्यो भवति ॥
० भद्रं कर्णेभिः शृणुयाम देवाः । भद्रं पश्येमाक्षभिर्यजत्राः । स्थिरैरङ्गैस्तुष्टुवाꣳ सस्तनूभिः
। व्यशेम देवहितं यदायुः । स्वस्ति न इन्द्रो वृद्धश्रवाः । स्वस्ति नः पूषा विश्ववेदाः ।
स्वस्तिनस्ताक्ष्र्यो अरिष्टनेमिः । स्वस्ति नो बृहस्पतिर्दधातु । ओं शान्तिः शान्तिः शान्तिः
॥

## आरण्यके द्वितीयः प्रश्नः २

० नमो ब्रह्मणे नमो अस्त्वग्नये नमः पृथिव्यै नम ओषधीभ्यः । नमो वाचे नमो
वाचस्पतये नमो विष्णवे बृहते करोमि ॥ ओं शान्तिः शान्तिः शान्तिः ॥
१ सह वै देवानाञ्चासुराणाञ्च यज्ञौ प्रततावास्तां वय२ꣳ स्वर्गं लोकमेष्यामो
वयमेष्याम इति तेऽसुराः संनह्य सहसैवाचरन्ब्रह्मचर्येण तपसैव देवास्तेऽसुरा
अमुह्यग्ग्स्ते न प्राजानग्ग्स्ते पराभवन्ते न स्वर्गं लोकमायन्प्रसृतेन वै यज्ञेन
देवास्स्वर्गं लोकमायन्नप्रसृतेनासुरान् पराऽभावयन् प्रसृतो ह वै यज्ञोपवीतिनो
यज्ञोऽप्रसृतोऽनुपवीतिनो यत्किञ्च ब्राह्मणो यज्ञोपवीत्यधीते यजत एव
तत्तस्माद्यज्ञोपवीत्येवाधीयीत याजयेद्यजेत वा यज्ञस्य प्रसृत्या अजिनं वासो वा
दक्षिणत उपवीय दक्षिणं बाहुमुद्धरतेऽवधत्ते सव्यमिति यज्ञोपवीतमेतदेव विपरीतं
प्राचीनावीतꣳ संवीतं मानुषम् ॥ ०। २। १। १॥ ॥ १॥
२ रक्षाꣳसि हवा पुरोनुवाके तपोग्रमतिष्ठन्त तान्प्रजापतिर्वरेणोपामन्त्रयत तानि
वरमवृणीतादित्यो नो योद्धा इति तान् प्रजापतिरब्रवीद्योधयध्वमिति तस्मादुत्तिष्ठन्तꣳ
हवा तानि रक्षाग्स्यादित्यं योधयन्ति यावदस्तमन्वगात्तानि ह वा एतानि रक्षाꣳसि
गायत्रियाऽभिमन्त्रितेनाम्भसा शाम्यन्ति तदु ह वा एते ब्रह्मवादिनः पूर्वाभिमुखाः सन्ध्यायां
गायत्रियाऽभिमन्त्रिता आप ऊर्ध्वं विक्षिपन्ति ता एता आपो वज्रीभूत्वा तानि रक्षाꣳसि
मन्देहाऽरुणे द्वीपे प्रक्षिपन्ति यत्प्रदक्षिणं प्रक्रमन्ति तेन पाप्मानमव धून्वन्त्युद्यन्तमस्तं
यन्तमादित्यमभि ध्यायन् कुर्वन् ब्राह्मणो विद्वान्थ्सकलं भद्रमश्नुतेऽसावादित्यो ब्रह्मेति
ब्रह्मैव सन्ब्रह्माप्येति य एवं वेद ॥ ०। २। २। २॥ ॥ २॥
३ यद्देवा देवहेळनं देवासश्चकृमा वयम् । आदित्यास्तस्मान्मा मुञ्चतर्तस्यर्तेन मामित

। देवा जीवनकाम्या यद्वाचाऽनृतमूदिम । तस्मान्न इह मुञ्चत विश्वे देवास्सजोषसः ।
ऋतेन द्यावापृथिवी ऋतेन त्वꣳ सरस्वति । कृतान्नः पाह्येनसो यत्किञ्चानृतमूदिम ।
इन्द्राग्नी मित्रावरुणौ सोमो धाता बृहस्पतिः । ते नो मुञ्चन्त्वेनसो यदन्यकृतमारिम ।
सजातशꣳसादुत जामिशꣳसाज्ज्यायसः शꣳसादुत वा कनीयसः । अनाधृष्टं देवकृतं
यदेनस्तस्मात्त्वमस्माञ्जातवेदो मुमुग्धि ॥ ०। २। ३। ३॥
४ यद्वाचा यन्मनसा बाहुभ्यामूरुभ्यामष्ठीवद्भ्याꣳ शिश्नैर्यदनृतं चकृमा वयम् । अग्निर्मा
तस्मादेनसो गार्हपत्यः प्रमुञ्चतु चकृम यानि दुष्कृता । येन त्रितो अर्णवान्निर्बभूव येन
सूर्यं तमसो निर्मुमोच । येनेन्द्रो विश्वा अजहादरातीस्तेनाहं ज्योतिषा ज्योतिरानशान
आक्षि । यत्कुसीदमप्रतीत्तं मयेह येन यमस्य निधिना चरामि । एतत्तदग्ने अनृणो भवामि
जीवन्नेव प्रति तत्ते दधामि । यन्मयि माता यदा पिपेष यदन्तरिक्षं यदाशसातिक्रामामि
त्रिते देवा दिवि जाता यदाप इमं मे वरुण तत्त्वा यामि त्वं नो अग्ने स त्वं नो अग्ने
त्वमग्ने अयासि ॥ ०। २। ३। ४॥ मुमुग्धि सप्त च ॥ ३॥
५ यददीव्यन्नृणमहं बभूवादित्सन्वा संजगर जनेभ्यः । अग्निर्मा तस्मादिन्द्रश्च संविदानौ
प्रमुञ्चताम् । यद्धस्ताभ्यां चकर किल्बिषाण्यक्षाणां वग्नुमुपजिघ्नमानः । उग्रंपश्या च
राष्ट्रभृच्च तान्यप्सरसावनुदत्तामृणानि । उग्रंपश्ये राष्ट्रभृत्किल्बिषाणि यदक्षवृत्तमनुदत्तमेतत्
। नेन्न ऋणानृणव इथ्समानो यमस्य लोके अधिरज्जुराय । अव ते हेळ उदुत्तम मिमं
मे वरुण तत्त्वा यामि त्वं नो अग्ने स त्वं नो अग्ने । संकुसुको विकुसुको निर्ऋथो
यश्च निस्वनः । तेऽ २ऽ स्मद्यक्ष्ममनागसो दूराद्दूरमचीचतम् । निर्यक्ष्ममचीचते कृत्यां
निर्ऋतिं च । तेन योऽ २ऽ स्मथ्समृच्छातै तमस्मै प्रसुवामसि । दुश्शꣳसानुशꣳसाभ्यां
घणेनानुघणेन च । तेनान्योऽ २ऽ स्मथ्समृच्छातै तमस्मै प्रसुवामसि । सं वर्चसा पयसा
संतनूभिरगन्महि मनसा सꣳशिवेन । त्वष्टा नो अत्र विदधातु रायोऽनुमार्ष्टु तन्वो २ऽ
यद्विलिष्टम् ॥ ०। २। ४। ५॥ कृत्यां निर्ऋतिं च पञ्च च ॥ ४॥
६ आयुष्टे विश्वतो दधदयमग्निर्वरेण्यः । पुनस्ते प्राण आयाति परा यक्ष्मꣳसुवामि
ते । आयुर्दा अग्ने हविषो जुषाणो घृतप्रतीको घृतयोनिरेधि । घृतं पीत्वा मधु चारु
गव्यं पितेव पुत्रमभिरक्षतादिमम् । इममग्न आयुषे वर्चसे कृधि तिग्ममोजो वरुण
सꣳशिशाधि । मातेवास्मा अदिते शर्म यच्छ विश्वे देवा जरदष्टिर्यथाऽसत् । अग्न
आयूꣳषि पवस आसुवोर्जमिषञ्च नः । आरे बाधस्व दुच्छुनाम् । अग्ने पवस्व स्वपा

अस्मे वर्चस्सुवीर्यम् । दधद्रयिं मयि पोषम् ॥ ०। २। ५। ६॥
७ अग्निर्ऋषिः पवमानः पाञ्चजन्यः पुरोहितः । तमीमहे महागयम् । अग्ने
जातान्प्रणुदानस्सपत्नान्प्रत्य जाताञ्जातवेदो नुदस्व । अस्मे दीदिहि सुमना अहेळञ्छर्मन्ते
स्याम त्रिवरूथ उद्भौ । सहसा जातान्प्रणुदानः सपत्नान्प्रत्यजाताञ्जातवेदो नुदस्व । अधि
नो ब्रूहि सुमनस्यमानो वय२ꣳ स्याम प्रणुदानः सपत्नान् । अग्ने यो नोऽभितो जनो
वृको वारो जिघाꣳसति । ताग्स्त्वं वृत्रहञ्जहि वस्वस्मभ्यमाभर । अग्ने यो नोऽभिदासति
समानो यश्च निष्ट्यः । तं वयꣳ समिधं कृत्वा तुभ्यमग्नेऽपिदध्मसि ॥ ०। २। ५। ७॥
८ यो नः शपादशपतो यश्च नः शपतः शपात् । उषाश्च तस्मै निम्रुक्च सर्वं पापꣳ
समूहताम् । यो नस्सपत्नो यो रणो मर्तोऽभिदासति देवाः । इध्मस्येव प्रक्षायतो मा
तस्योच्छेषि किञ्चन । यो मां द्वेष्टि जातवेदो यं चाहं द्वेष्मि यश्च माम् । सर्वाग्स्तानग्ने
सन्दह याग्श्चाहं द्वेष्मि ये च माम् । यो अस्मभ्यमरातीयाद्यश्च नो द्वेषते जनः । निन्दाद्यो
अस्मान्दिप्साच्च सर्वाग्स्तान्मष्मषा कुरु । सꣳशितं मे ब्रह्म सꣳशितं वीर्यं २ऽ बलम् ।
सꣳशितं क्षत्रं मे जिष्णु यस्याहमस्मि पुरोहितः । उदेषां बाहू अतिरमुद्वर्चो अथो बलम्
। क्षिणोमि ब्रह्मणाऽमित्रानुन्नयामि स्वां २ अहम् । पुनर्मनः पुनरायुर्म आगात्पुनश्चक्षुः
पुनः श्रोत्रं म आगात्पुनः प्राणः पुनराकूतं म आगात्पुनश्चित्तं पुनराधीतं म आगात् ।
वैश्वानरो मेऽदब्धस्तनूपा अवबाधतां दुरितानि विश्वा ॥ ०। २। ५। ८॥ पोषं दध्मसि
पुरोहितश्चत्वारि च ॥ ५॥
९ वैश्वानराय प्रतिवेदयामो यदीनृणꣳ सङ्गरो देवतासु । स एतान्पाशान्प्रमुचन्प्रवेद
स नो मुञ्चातु दुरितादवद्यात् । वैश्वानरः पवयान्नः पवित्रैर्यथ्सङ्गरमभिधावाम्याशाम्
। अनाजानन्मनसा याचमानो यदत्रैनो अव तथ्सुवामि । अमी ये सुभगे दिवि
विचृतौ नाम तारके । प्रेहामृतस्य यच्छतामेतद्बद्धकमोचनम् । विजिहीर्ष्व लोकान्कृधि
बन्धान्मुञ्चासि बद्धकम् । योनेरिव प्रच्युतो गर्भस्सर्वान्पथो अनुष्व । स प्रजानन्प्रतिगृभ्णीत
विद्वान्प्रजापतिः प्रथमजा ऋतस्य । अस्माभिर्दत्तं जरसः परस्तादच्छिन्नं तन्तुमनुसञ्चरेम
॥ ०। २। ६। ९॥
१० ततं तन्तुमन्वेके अनुसञ्चरन्ति येषां दत्तं पित्र्यमायनवत् । अबन्ध्वेके ददतः
प्रयच्छाद्दातुं चेच्छक्नवाꣳसस्स्वर्ग एषाम् । आरभेथामनुसꣳरभेथाꣳ समानं पन्थामवथो
घृतेन । यद्वां पूर्तं परिविष्टं यदग्नौ तस्मै गोत्रायेह जायापती सꣳरभेथाम् । यदन्तरिक्षं
पृथिवीमुत द्यां यन्मातरं पितरं वा जिहिꣳसिम । अग्निर्मा तस्मादेनसो गार्हपत्य उन्नो

नेषद्दुरिता यानि चकृम । भूमिर्माताऽदितिर्नो जनित्रं भ्राताऽन्तरिक्षमभिशस्त एनः । द्यौर्नः पिता पितृयाच्छं भवासि जामि मित्वा मा विविथ्सि लोकात् । यत्र सुहार्दः सुकृतो मदन्ते विहाय रोगं तन्वा २ऽ ग् स्वायाम् । अश्लोणाङ्गैरह्रुतास्स्वर्गे तत्र पश्येम पितरं च पुत्रम् । यदन्नमद्म्यनृतेन देवा दास्यन्नदास्यन्नुत वा करिष्यन् । यद्देवानां चक्षुष्यागो अस्ति यदेव किञ्च प्रतिजग्राहमग्निर्मा तस्मादनृणं कृणोतु । यदन्नमद्मि बहुधा विरूपं वासो हिरण्यमुत गामजामविम् । यद्देवानां चक्षुष्यागो अस्ति यदेव किञ्च प्रतिजग्राहमग्निर्मा तस्मादनृणं कृणोतु । यन्मया मनसा वाचा कृतमेनः कदाचन । सर्वस्मात्तस्मान्मेळितो मोग्धि त्वꣳ हि वेत्थ यथातथम् ॥ ०। २। ६। १०॥

चरेम पुत्रꣳ षड्च ॥ ६॥

११ वातरशना ह वा ऋषयः श्रमणा ऊर्ध्वमन्थिनो बभूवुस्तानृषयोऽर्थमायग्ग्स्ते निलायमचरग्ग्स्तेऽनुप्रविशुः कूश्माण्डानि ताग्स्तेष्वन्वविन्दञ्छ्रद्धया च तपसा च तानृषयोऽब्रुवन्कथा निलायं चरथेति त ऋषीनब्रुवन्नमो वोऽस्तु भगवन्तोऽस्मिन्धाम्नि केन वस्सपर्यामेति तानृषयोऽब्रुवन्पवित्रं नो ब्रूत येनारेपसस्स्यामेति त एतानि सूक्तान्यपश्यन् यद्देवा देवहेळनं यद्दीव्यन्नृणमहं बभुवायुष्टे विश्वतो दधदित्येतैराज्यं जुहुत वैश्वानराय प्रतिवेदयाम इत्युपतिष्ठत यदर्वाचीनमेनो भ्रूणहत्यायास्तस्मान्मोक्ष्यध्व इति त एतैरजुहुवुस्तेऽरेपसोऽभवन् कर्मादिष्वेतैर्जुहुयात् पूतो देवलोकान्त्समश्नुते ॥ ०। २। ७। ११॥ ॥ ७॥

१२ कूश्माण्डैर्जुहुयाद्योऽपूत इव मन्येत यथा स्तेनो यथा भ्रूणहैवमेष भवति योऽयोनौ रेतस्सिञ्चति यदर्वाचीनमेनो भ्रूणहत्यायास्तस्मान्मुच्यते यावदेनो दीक्षामुपैति दीक्षित एतैस्सततति जुहोति संवथ्सरं दीक्षितो भवति संवथ्सरादेवात्मानं पुनीते मासं दीक्षितो भवति यो मासस्स संवथ्सरः संवथ्सरादेवात्मानं पुनीते चतुर्विꣳशतिꣳ रात्रीर्दीक्षितो भवति चतुर्विꣳशतिरर्धमासाः संवथ्सरः संवथ्सरादेवात्मानं पुनीते द्वादश रात्रीर्दीक्षितो भवति द्वादश मासाः संवथ्सरः संवथ्सरादेवात्मानं पुनीते षड्रात्रीर्दीक्षितो भवति षड्वा ऋतवः संवथ्सरः संवथ्सरादेवात्मानं पुनीते तिस्रो रात्रीर्दीक्षितो भवति त्रिपदा गायत्री गायत्रिया एवात्मानं पुनीते न माꣳसमश्नीयान्न स्त्रियमुपेयान्नोपर्यासीत जुगुप्सेतानृतात्पयो ब्राह्मणस्य व्रतं यवागू राजन्यस्यामिक्षा वैश्यस्याथो सौम्येऽप्यध्वर एतद्व्रतं ब्रूयाद्यदि मन्येतोपदस्यामीत्योदनं धानाः सक्तून्घृतमित्यनुव्रतयेदात्मनोऽनुपदासाय ॥ ०। २। ८। १२॥ ॥ ८॥

१३ अजान् ह वै पृश्नीग्ँस्तपस्यमानान्ब्रह्म स्वयम्भ्वभ्यानर्षत्त ऋषयोऽभवन्तदृषीणामृषित्वं तां देवतामुपातिष्ठन्त यज्ञकामास्त एतं ब्रह्मयज्ञमपश्यन्तमाऽहरन्तेनायजन्त यदृचोऽध्यगीषत ताः पय आहुतयो देवानामभवन् यद्यजूꣳषि घृताहुतयो यथ्सामानि सोमाहुतयो यदथर्वाङ्गिरसो मध्वाहुतयो यद्ब्राह्मणानीतिहासान्पुराणानि कल्पान्गाथा नाराशꣳसीर्मेदाहुतयो देवानामभवन्ताभिः, क्षुधं पाप्मानमपाघ्नन्नपहतपाप्मानो देवास्स्वर्गं लोकमायन्ब्रह्मणः सायुज्यमृषयोऽगच्छन् ॥ ०। २। ९। १३॥ ॥ ९॥

१४ पञ्च वा एते महायज्ञाः सतति प्रतायन्ते सतति सन्तिष्ठन्ते देवयज्ञः पितृयज्ञो भूतयज्ञो मनुष्ययज्ञो ब्रह्मयज्ञ इति यदग्नौ जुहोत्यपि समिधं तद्देवयज्ञः सन्तिष्ठते यत्पितृभ्यः स्वधाकरोत्यप्यपस्तत्पितृयज्ञः सन्तिष्ठते यद्भूतेभ्यो बलिꣳ हरति तद्भूतयज्ञः सन्तिष्ठते यद्ब्राह्मणेभ्योऽन्नं ददाति तन्मनुष्ययज्ञः सन्तिष्ठते यथ्स्वाध्यायमधीयीतैकामप्यृचं यजुस्साम वा तद्ब्रह्मयज्ञः सन्तिष्ठते यदृचोऽधीते पयसः कूल्या अस्य पितॄन्थ्स्वधा अभिवहन्ति यद्यजूꣳषि घृतस्य कूल्या यथ्सामानि सोम एभ्यः पवते यदथर्वाङ्गिरसो मधोः कूल्या यद्ब्राह्मणानीतिहासान्पुराणानि कल्पान्गाथा नाराशꣳसीर्मेदसः कूल्या अस्य पितॄन्थ्स्वधा अभिवहन्ति यदृचोऽधीते पय आहुतिभिरेव तद्देवाग्स्तर्पयति यद्यजूꣳषि घृताहुतिभिर्यथ्सामानि सोमाहुतिभिर्यदथर्वाङ्गिरसो मध्वाहुतिभिर्यद्ब्राह्मणानीतिहासान् पुराणानि कल्पान्गाथा नाराशꣳसीर्मेदाहुतिभिरेव तद्देवाग्स्तर्पयति त एनं तृप्ता आयुषा तेजसा वर्चसा श्रिया यशसा ब्रह्मवर्चसेनान्नाद्येन च तर्पयन्ति ॥ ०। २। १०। १४॥ ॥ १०॥

१५ ब्रह्मयज्ञेन यक्ष्यमाणः प्राच्यां दिशि ग्रामादच्छदिर्दर्श उदीच्यां प्रागुदीच्यां वोदित आदित्ये दक्षिणत उपवीयोपविश्य हस्ताववनिज्य त्रिराचामेद्द्विः परिमृज्य सकृदुपस्पृश्य शिरश्चक्षुषी नासिके श्रोत्रे हृदयमालभ्य यत्त्रिराचामति तेन ऋचः प्रीणाति यद्द्विः परिमृजति तेन यजूꣳषि यथ्सकृदुपस्पृशति तेन सामानि यथ्सव्यं पाणिं पादौ प्रोक्षति यच्छिरश्चक्षुषी नासिके श्रोत्रे हृदयमालभते तेनाथर्वाङ्गिरसो ब्राह्मणानीतिहासान्पुराणानि कल्पान्गाथा नाराशꣳसीः प्रीणाति दर्भाणां महदुपस्तीर्योपस्थं कृत्वा प्राङासीनः स्वाध्यायमधीयीतापां वा एष ओषधीनाꣳ रसो यद्दर्भाः सरसमेव ब्रह्म कुरुते दक्षिणोत्तरौ पाणी पादौ कृत्वा सपवित्रावोमिति प्रतिपद्यत एतद्वै यजुस्त्रयीं विद्यां प्रत्येषा वागेतत्परममक्षरं तदेतदृचाऽभ्युक्त मृचो अक्षरे परमे व्योमन् यस्मिन्देवा अधि विश्वे निषेदुर्यस्तन्न वेद किमृचा करिष्यति य इत्तद्विदुस्त इमे समासत इति त्रीनेव प्रायुङ्क्त

भूर्भुवस्स्वरित्याहैतद्वै वाचस्सत्यं यदेव वाचस्सत्यं तत्प्रायुङ्क्ताथ सावित्रीं गायत्रीं त्रिरन्वाह
पच्छोऽर्धर्चशोऽनवानꣳ सविता श्रियः प्रसविता श्रियमेवाप्नोत्यथो प्रज्ञातयैव प्रतिपदा
छन्दाꣳसि प्रतिपद्यते ॥ ०। २। ११। १५॥ ॥ ११॥
१६ ग्रामे मनसा स्वाध्यायमधीयीत दिवा नक्तं वेति ह स्माह शौच आह्नेय उतारण्येऽबल
उत वाचोत तिष्ठन्नुत व्रजन्नुतासीन उत शयानोऽधीयीतैव स्वाध्यायं तपस्वी पुण्यो भवति
य एवं विद्वान्थ्स्वाध्यायमधीते नमो ब्रह्मणे नमो अस्त्वग्नये नमः पृथिव्यै नम ओषधीभ्यः
। नमो वाचे नमो वाचस्पतये नमो विष्णवे बृहते करोमि ॥ ०। २। १२। १६॥ ॥ १२॥
१७ मध्यन्दिने प्रबलमधीयीतासौ खलु वावैष आदित्यो यद्ब्राह्मणस्तस्मात्तर्हि तेक्ष्णिष्ठं
तपति तदेषाऽभ्युक्ता । चित्रं देवानामुदगादनीकं चक्षुर्मित्रस्य वरुणस्याग्नेः । आऽप्रा
द्यावापृथिवी अन्तरिक्षꣳ सूर्य आत्मा जगतस्तस्थुषश्चेति स वा एष यज्ञः सद्यः प्रतायते
सद्यः सन्तिष्ठते तस्य प्राक्सायमवभृथो नमो ब्रह्मण इति परिधानीयां त्रिरन्वाहाप
उपस्पृश्य गृहानेति ततो यत्किञ्च ददाति सा दक्षिणा ॥ ०। २। १३। १७॥ ॥ १३॥
१८ तस्य वा एतस्य यज्ञस्य मेघो हविर्धानं विद्युदग्निर्वर्षꣳ हविस्स्तनयित्नुर्वषट्कारो
यदवस्फूर्जति सोऽनुवषट्कारो वायुरात्माऽमावास्या स्विष्टकृद्य एवं विद्वान्मेघे वर्षति
विद्योतमाने स्तनयत्यवस्फूर्जति पवमाने वायावमावास्यायाग् स्वाध्यायमधीते तप एव
तत्तप्यते तपो हि स्वाध्याय इत्युत्तमं नाकꣳरोहत्युत्तमः समानानां भवति यावन्तꣳ ह
वा इमां वित्तस्य पूर्णां ददथ्स्वर्गं लोकं जयति तावन्तं लोकं जयति भूयाꣳसं चाक्षय्यं
चापपुनर्मृत्युञ्जयति ब्रह्मणस्सायुज्यं गच्छति ॥ ०। २। १४। १८॥ ॥ १४॥
१९ तस्य वा एतस्य यज्ञस्य द्वावनध्यायौ यदात्माऽशुचिर्यद्देशः समृद्धिर्देवतानि
य एवं विद्वान्महारात्र उषस्युदिते व्रजग्ग्स्तिष्ठन्नासीनः शयानोऽरण्ये ग्रामे वा
यावत्तरसग्ग् स्वाध्यायमधीते सर्वान् लोकान् जयति सर्वान् लोकाननृणोऽनुसञ्चरति
तदेषाऽभ्युक्ता । अनृणा अस्मिन्ननृणाः परस्मि२ꣳस्तृतीये लोके अनृणास्स्याम । ये
देवयाना उत पितृयाणास्सर्वान्पथो अनृणा आक्षीयेमेत्यग्निं वै जातं पाप्मा जग्राह तं
देवा आहुतीभिः पाप्मानमपाघ्नन्नाहुतीनां यज्ञेन यज्ञस्य दक्षिणाभिर्दक्षिणानां ब्राह्मणेन
ब्राह्मणस्य छन्दोभिश्छन्दसाग् स्वाध्यायेनापहतपाप्मा स्वाध्यायो देवपवित्रं वा एतत्तं
योऽनूथ्सृजत्यभागो वाचि भवत्यभागो नाके तदेषाऽभ्युक्ता । यस्तित्याज सखिविदꣳ
सखायं न तस्य वाच्यपि भागो अस्ति । यदीꣳ शृणोत्यलकꣳ शृणोति न हि प्रवेद

सुकृतस्य पन्थामिति तस्माथ्स्वाध्यायोऽध्येतव्यो यं यं क्रतुमधीते तेन तेनास्येष्टं भवत्यग्नेर्वायोरादित्यस्य सायुज्यं गच्छति तदेषाऽभ्युक्ता । ये अर्वाङुत वा पुराणे वेदं विद्वाꣳसमभितो वदन्त्यादित्यमेव ते परिवदन्ति सर्वे अग्निं द्वितीयं तृतीयं च हꣳसमिति यावतीर्वै देवतास्तास्सर्वा वेदविदि ब्राह्मणे वसन्ति तस्माद्ब्राह्मणेभ्यो वेदविद्भ्यो दिवे दिवे नमस्कुर्यान्नाश्लीलं कीर्तयेदेता एव देवताः प्रीणाति ॥ ०। २। १५। १९॥ ॥ १५॥

२० रिच्यत इव वा एष प्रेव रिच्यते यो याजयति प्रति वा गृह्णाति याजयित्वा प्रतिगृह्य वाऽनश्नन्त्रिः स्वाध्यायं वेदमधीयीत त्रिरात्रं वा सावित्रीं गायत्रीमन्वातिरेचयति वरो दक्षिणा वरेणैव वरग्ग् स्पृणोत्यात्मा हि वरः ॥ ०। २। १६। २०॥ ॥ १६॥

२१ दुहे ह वा एष छन्दाꣳसि यो याजयति स येन यज्ञक्रतुना याजयेथ्सोऽरण्यं परेत्य शुचौ देशे स्वाध्यायमेवैनमधीयन्नासीत तस्यानशनं दीक्षा स्थानमुपसद आसनꣳ सुत्या वाग्जुहूर्मन उपभृद्धृतिर्ध्रुवा प्राणो हविः सामाध्वर्युस्स वा एष यज्ञः प्राणदक्षिणोऽनन्तदक्षिणः समृद्धतरः ॥ ०। २। १७। २१॥ ॥ १७॥

२२ कतिधाऽवकीर्णी प्रविशति चतुर्धेत्याहुर्ब्रह्मवादिनो मरुतः प्राणैरिन्द्रं बलेन बृहस्पतिं ब्रह्मवर्चसेनाग्निमेवेतरेण सर्वेण तस्यैतां प्रायश्चित्तिं विदाञ्चकार सुदेवः काश्यपो यो ब्रह्मचार्यवकिरेदमावास्यायाꣳ रात्र्यामग्निं प्रणीयोपसमाधाय द्विराज्यस्योपघातं जुहोति कामावकीर्णोऽस्म्यवकीर्णोऽस्मि काम कामाय स्वाहा कामाभिद्रुग्धोऽस्म्यभिद्रुग्धोऽस्मि काम कामाय स्वाहेत्यमृतं वा आज्यममृतमेवात्मन्धत्ते हुत्वा प्रयताञ्जलिः कवातिर्यङ्ङग्निमभिमन्त्रयेत सं मा सिञ्चन्तु मरुतः समिन्द्रस्सं बृहस्पतिः । सं माऽयमग्निः सिञ्चत्वायुषा च बलेन चायुष्मन्तं करोत मेति प्रति हास्मै मरुतः प्राणान्दधति प्रतीन्द्रो बलं प्रति बृहस्पतिर्ब्रह्मवर्चसं प्रत्यग्निरितरथ्सर्वꣳ सर्वतनुर्भूत्वा सर्वमायुरेति त्रिरभिमन्त्रयेत त्रिषत्या हि देवा योऽपूत इव मन्येत स इत्थं जुहुयादित्थमभिमन्त्रयेत पुनीत एवात्मानमायुरेवात्मन्धत्ते वरो दक्षिणा वरेणैव वरग्ग् स्पृणोत्यात्मा हि वरः ॥ ०। २। १८। २२॥ ॥ १८॥

२३ भूः प्रपद्ये भुवः प्रपद्ये स्वः प्रपद्ये भूर्भुवस्स्वः प्रपद्ये ब्रह्म प्रपद्ये ब्रह्मकोशं प्रपद्येऽमृतं प्रपद्येऽमृतकोशं प्रपद्ये चतुर्जालं ब्रह्मकोशं यं मृत्युर्नावपश्यति तं प्रपद्ये देवान्प्रपद्ये देवपुरं प्रपद्ये परीवृतो वरीवृतो ब्रह्मणा वर्मणाऽहं तेजसा कश्यपस्य यस्मै नमस्तच्छिरो धर्मो मूर्धानं ब्रह्मोत्तरा हनुर्यज्ञोऽधरा विष्णुरहृदयꣳ संवथ्सरः प्रजननमश्विनौ पूर्वपादावत्रिर्मध्यं मित्रावरुणावपरपादावग्निः पुच्छस्य प्रथमं काण्डं तत इन्द्रस्ततः प्रजापतिरभयं चतुर्थꣳ

स वा एष दिव्यः शाक्वरः शिशुमारस्तꣳ ह य एवं वेदाप पुनर्मृत्युं जयति जयति स्वर्गं लोकं नाध्वनि प्रमीयते नाग्नौ प्रमीयते नाप्सु प्रमीयते नानपत्यः प्रमीयते लघ्वान्नो भवति ध्रुवस्त्वमसि ध्रुवस्य क्षितमसि त्वं भूतानामधिपतिरसि त्वं भूतानाग्ं श्रेष्ठोऽसि त्वां भूतान्युपपर्यावर्तन्ते नमस्ते नमस्सर्वं ते नमो नमः शिशुकुमाराय नमः ॥ ०। २। १९। २३॥ ॥ १९॥

२४ नमः प्राच्यै दिशे याश्च देवता एतस्यां प्रतिवसन्त्येताभ्यश्च नमो नमो दक्षिणायै दिशे याश्च देवता एतस्यां प्रतिवसन्त्येताभ्यश्च नमो नमः प्रतीच्यै दिशे याश्च देवता एतस्यां प्रतिवसन्त्येताभ्यश्च नमो नम उदीच्यै दिशे याश्च देवता एतस्यां प्रतिवसन्त्येताभ्यश्च नमो नम ऊर्ध्वायै दिशे याश्च देवता एतस्यां प्रतिवसन्त्येताभ्यश्च नमो नमोऽधरायै दिशे याश्च देवता एतस्यां प्रतिवसन्त्येताभ्यश्च नमो नमोऽवान्तरायै दिशे याश्च देवता एतस्यां प्रतिवसन्त्येताभ्यश्च नमो नमो गङ्गायमुनयोर्मध्ये ये वसन्ति ते मे प्रसन्नात्मानश्चिरं जीवितं वर्धयन्ति नमो गङ्गायमुनयोर्मुनिभ्यश्च नमो नमो गङ्गायमुनयोर्मुनिभ्यश्च नमः ॥ ०। २। २०। २४॥ ॥ २०॥ सह रक्षाꣳसि यद्देवास्सप्तदश यददीव्यन्पञ्चदशायुष्टे चतुस्त्रिंशꣳ शद्वैश्वानराय षड्विꣳशतिर्वातरशना ह कूश्माण्डैरजान् ह पञ्च ब्रह्मयज्ञेन ग्रामे मध्यन्दिने तस्य वै मेघस्तस्य वै द्वौ रिच्यते दुहे ह कतिधाऽवकीर्णी भूर्नमः प्राच्यै विꣳशतिः ॥ २०॥ सह वातरशना दुहे ह चतुर्विꣳशतिः ॥ २४॥ सह वै मुनिभ्यश्च नमः ॥ (सह नमः)

० नमो ब्रह्मणे नमो अस्त्वग्नये नमः पृथिव्यै नम ओषधीभ्यः । नमो वाचे नमो वाचस्पतये नमो विष्णवे बृहते करोमि ॥ ओं शान्तिः शान्तिः शान्तिः ॥

## आरण्यके तृतीयः प्रश्नः ३

० तच्छंयोरावृणीमहे । गातुं यज्ञाय । गातुं यज्ञपतये । दैवी स्वस्तिरस्तु नः । स्वस्तिर्मानुषेभ्यः । ऊर्ध्वं जिगातु भेषजम् । शं नो अस्तु द्विपदे । शं चतुष्पदे ॥ ओं शान्तिः शान्तिः शान्तिः ॥

१ चित्तिस्स्रुक् । चित्तमाज्यम् । वाग्वेदिः । आधीतं बर्हिः । केतो अग्निः । विज्ञातमग्निः । वाक्पतिर्होता । मन उपवक्ता । प्राणो हविः । सामाध्वर्युः । वाचस्पते विधे नामन्न् । विधेम ते नाम । विधेस्त्वमस्माकं नाम । वाचस्पतिस्सोमं पिबतु । आऽस्मासु नृम्णं धाथ्स्वाहा ॥ ०। ३। १। १॥

अध्वर्युः पञ्च च ॥ १॥

२ पृथिवी होता । द्यौरध्वर्युः । रुद्रोऽग्नीत् । बृहस्पतिरुपवक्ता । वाचस्पते वाचो वीर्येण
। संभृततमेनायक्ष्यसे । यजमानाय वार्यम् । आ सुवस्करस्मै । वाचस्पतिः सोमं पिबति
। जजनदिन्द्रमिन्द्रियाय स्वाहा ॥ ०। ३। २। २॥ पृथिवी होता दश ॥ २॥
३ अग्निर्होता । अश्विनाऽध्वर्यू । त्वष्टाऽग्नीत् । मित्र उपवक्ता । सोमस्सोमस्य पुरोगाः
। शुक्रः शुक्रस्य पुरोगाः । श्रातास्त इन्द्र सोमाः । वातापेर्हवनश्रुतस्स्वाहा ॥ ०। ३।
३। ३॥ अग्निर्होताऽष्टौ ॥ ३॥
४ सूर्यं ते चक्षुः । वातं प्राणः । द्यां पृष्ठम् । अन्तरिक्षमात्मा । अङ्गैर्यज्ञम् । पृथिवीꣳ
शरीरैः । वाचस्पतेऽच्छिद्रया वाचा । अच्छिद्रया जुह्वा । दिवि देवावृधꣳ होत्रामेरयस्व
स्वाहा ॥ ०। ३। ४। ४॥ सूर्यं ते नव ॥ ४॥
५ महाहविर्होता । सत्यहविरध्वर्युः । अच्युतपाजा अग्नीत् । अच्युतमना उपवक्ता ।
अनाधृष्यश्चाप्रतिधृष्यश्च यज्ञस्याभिगरौ । अयास्य उद्गाता । वाचस्पते हृद्विधे नामन् ।
विधेम ते नाम । विधेस्त्वमस्माकं नाम । वाचस्पतिस्सोममपात् । मा दैव्यस्तन्तुश्छेदि
मा मनुष्यः । नमो दिवे । नमः पृथिव्यै स्वाहा ॥ ०। ३। ५। ५॥ अपात्रीणि च ॥ ५॥
६ वाग्घोता । दीक्षा पत्नी । वातोऽध्वर्युः । आपोऽभिगरः । मनो हविः । तपसि जुहोमि
। भूर्भुवस्सुवः । ब्रह्म स्वयम्भु । ब्रह्मणे स्वयम्भुवे स्वाहा ॥ ०। ३। ६। ६॥ वाग्घोता
नव ॥ ६॥
७ ब्राह्मण एकहोता । स यज्ञः । स मे ददातु प्रजां पशून्पुष्टिं यशः । यज्ञश्च मे भूयात्
। अग्निर्द्विहोता । स भर्ता । स मे ददातु प्रजां पशून्पुष्टिं यशः । भर्ता च मे भूयात् ।
पृथिवी त्रिहोता । स प्रतिष्ठा ॥ ०। ३। ७। ७॥
८ स मे ददातु प्रजां पशून्पुष्टिं यशः । प्रतिष्ठा च मे भूयात् । अन्तरिक्षं चतुर्होता ।
स विष्ठाः । स मे ददातु प्रजां पशून्पुष्टिं यशः । विष्ठाश्च मे भूयात् । वायुः पञ्चहोता ।
स प्राणः । स मे ददातु प्रजां पशून्पुष्टिं यशः । प्राणश्च मे भूयात् ॥ ०। ३। ७। ८॥
९ चन्द्रमाष्षड्ढोता । स ऋतून्कल्पयाति । स मे ददातु प्रजां पशून्पुष्टिं यशः । ऋतवश्च
मे कल्पन्ताम् । अन्नꣳ सप्तहोता । स प्राणस्य प्राणः । स मे ददातु प्रजां पशून्पुष्टिं
यशः । प्राणस्य च मे प्राणो भूयात् । द्यौरष्टहोता । सोऽनाधृष्यः ॥ ०। ३। ७। ९॥
१० स मे ददातु प्रजां पशून्पुष्टिं यशः । अनाधृष्यश्च भूयासम् । आदित्यो नवहोता । स
तेजस्वी । स मे ददातु प्रजां पशून्पुष्टिं यशः । तेजस्वी च भूयासम् । प्रजापतिर्दशहोता
। स इदꣳ सर्वम् । स मे ददातु प्रजां पशून्पुष्टिं यशः । सर्वं च मे भूयात् ॥ ०। ३।

७। १०॥ प्रतिष्ठा प्राणश्च मे भूयादनाधृष्यस्सर्वं च मे भूयात् ॥ ७॥
ब्राह्मणो यज्ञोऽग्निर्भर्ता पृथिवी प्रतिष्ठाऽन्तरिक्षं विष्ठा वायुः प्राणश्चन्द्रमा ऋतूनन्न॒ँ स प्राणस्य प्राणो द्यौरनाधृष्य आदित्यस्स तेजस्वी प्रजापतिरिद॒ँ सर्वम् ॥
११ अग्निर्यजुर्भिः । सविता स्तोमैः । इन्द्र उक्थामदैः । मित्रावरुणावाशिषा । अंगिरसो धिष्णियैरग्निभिः । मरुतः सदोहविर्धानाभ्याम् । आपः प्रोक्षणीभिः । ओषधयो बर्हिषा । अदितिर्वेद्या । सोमो दीक्षया ॥ ०। ३। ८। ११॥
१२ त्वष्टेध्मेन । विष्णुर्यज्ञेन । वसव आज्येन । आदित्या दक्षिणाभिः । विश्वे देवा ऊर्जा । पूषा स्वगाकारेण । बृहस्पतिः पुरोधया । प्रजापतिरुद्गीथेन । अन्तरिक्षं पवित्रेण । वायुः पात्रैः । अह२ँ श्रद्धया ॥ ०। ३। ८। १२॥ दीक्षया पात्रैरेकञ्च ॥ ८॥
१३ सेनेन्द्रस्य । धेना बृहस्पतेः । पथ्या पूष्णः । वाग्वायोः । दीक्षा सोमस्य । पृथिव्यग्नेः । वसूनां गायत्री । रुद्राणां त्रिष्टुक् । आदित्यानां जगती । विष्णोरनुष्टुक् ॥ ०। ३। ९। १३॥
१४ वरुणस्य विराट् । यज्ञस्य पङ्क्तिः । प्रजापतेरनुमतिः । मित्रस्य श्रद्धा । सवितुः प्रसूतिः । सूर्यस्य मरीचिः । चन्द्रमसो रोहिणी । ऋषीणामरुन्धती । पर्जन्यस्य विद्युत् । चतस्रो दिशः । चतस्रोऽवान्तरदिशाः । अहश्च रात्रिश्च । कृषिश्च वृष्टिश्च । त्विषिश्चापचितिश्च । आपश्चौषधयश्च । ऊर्क्च सूनृता च देवानां पत्नयः ॥ ०। ३। ९। १४॥ अनुष्टुग्दिशष्षट्च ॥ ९॥
१५ देवस्य त्वा सवितुः प्रसवे । अश्विनोर्बाहुभ्याम् । पूष्णो हस्ताभ्यां प्रतिगृह्णामि । राजा त्वा वरुणो नयतु देवि दक्षिणेऽग्नये हिरण्यम् । तेनामृतत्वमश्याम् । वयो दात्रे । मयो मह्यमस्तु प्रतिग्रहीत्रे । क इदं कस्मा अदात् । कामः कामाय । कामो दाता ॥ ०। ३। १०। १५॥
१६ कामः प्रतिगृहीता । काम॒ँ समुद्रमाविश । कामेन त्वा प्रतिगृह्णामि । कामैतत्ते । एषा ते काम दक्षिणा । उत्तानस्त्वाऽऽङ्गिरसः प्रतिगृह्णातु । सोमाय वासः । रुद्राय गाम् । वरुणायाश्वम् । प्रजापतये पुरुषम् ॥
०। ३। १०। १६॥
१७ मनवे तल्पम् । त्वष्ट्रेऽजाम् । पूष्णेऽविम् । निर्ऋत्या अश्वतरगर्दभौ । हिमवतो हस्तिनम् । गन्धर्वाप्सराभ्यः स्रगलङ्करणे । विश्वेभ्यो देवेभ्यो धान्यम् । वाचेऽन्नम् । ब्रह्मण ओदनम् । समुद्रायापः ॥ ०। ३। १०। १७॥

१८ उत्तानायाँगीरसायानः । वैश्वानराय रथम् । वैश्वानरः प्रत्नथा नाकमारुहत् । दिवः पृष्ठं भन्दमानः सुमन्मभिः । स पूर्ववज्जनयज्जन्तवे धनम् । समानमज्मा परियाति जागृविः । राजा त्वा वरुणो नयतु देवि दक्षिणे वैश्वानराय रथम् । तेनामृतत्वमश्याम् । वयो दात्रे । मयो मह्यमस्तु प्रतिग्रहीत्रे ॥ ०। ३। १०। १८॥

१९ क इदं कस्मा अदात् । कामः कामाय । कामो दाता । कामः प्रतिग्रहीता । कामꣳ समुद्रमाविश । कामेन त्वा प्रतिगृह्णामि । कामैतत्ते । एषा ते काम दक्षिणा । उत्तानस्त्वाऽऽङ्गिरसः प्रतिगृह्णातु ॥ ०। ३। १०। १९॥

दाता पुरुषमापः प्रतिग्रहीत्रे नव च ॥ १०॥

२० सुवर्णं घर्मं परिवेद वेनम् । इन्द्रस्यात्मानं दशधा चरन्तम् । अन्तस्समुद्रे मनसा चरन्तम् । ब्रह्माऽन्वविन्दद्दशहोतारमर्णे । अन्तः प्रविष्टः शास्ता जनानाम् । एकस्सन्बहुधा विचारः । शतꣳ शुक्राणि यत्रैकं भवन्ति । सर्वे वेदा यत्रैकं भवन्ति । सर्वे होतारो यत्रैकं भवन्ति । स मानसीन आत्मा जनानाम् ॥ ०। ३। ११। २०॥

२१ अन्तः प्रविष्टः शास्ता जनानाꣳ सर्वात्मा । सर्वाः प्रजा यत्रैकं भवन्ति । चतुर्होतारो यत्र सम्पदं गच्छन्ति देवैः । स मानसीन आत्मा जनानाम् । ब्रह्मेन्द्रमग्निं जगतः प्रतिष्ठाम् । दिव आत्मानꣳ सवितारं बृहस्पतिम् । चतुर्होतारं प्रदिशोऽनुक्लृप्तम् । वाचो वीर्यं तपसाऽन्वविन्दत् । अन्तः प्रविष्टं कर्तारमेतम् । त्वष्टारꣳ रूपाणि विकुर्वन्तं विपश्चिम् ॥ ०। ३। ११। २१॥

२२ अमृतस्य प्राणं यज्ञमेतम् । चतुर्होतृणामात्मानं कवयो निचिक्युः । अन्तः प्रविष्टं कर्तारमेतम् । देवानां बन्धु निहितं गुहासु । अमृतेन क्लृप्तं यज्ञमेतम् । चतुर्होतृणामात्मानं कवयो निचिक्युः । शतं नियुतः परिवेद विश्वा विश्ववारः । विश्वमिदं वृणाति । इन्द्रस्यात्मा निहितः पञ्चहोता । अमृतं देवानामायुः प्रजानाम् ॥ ०। ३। ११। २२॥

२३ इन्द्रꣳ राजानꣳ सवितारमेतम् । वायोरात्मानं कवयो निचिक्युः । रश्मिꣳ रश्मीनां मध्ये तपन्तम् । ऋतस्य पदे कवयो निपान्ति । य आण्डकोशे भुवनं बिभर्ति । अनिर्भिण्णः सन्नथ लोकान्, विचष्टे । यस्याण्डकोशꣳ शुष्ममाहुः प्राणमुल्बम् । तेन क्लृप्तोऽमृतेनाहमस्मि । सुवर्णं कोशꣳ रजसा परीवृतम् । देवानां वसुधानीं विराजम् ॥ ०। ३। ११। २३॥

२४ अमृतस्य पूर्णां तामु कलां विचक्षते । पादꣳ षड्ढोतुर्न किला विविथ्से । येनर्तवः पञ्चधोत क्लृप्ताः । उत वा षड्ढा मनसोत क्लृप्ताः । तꣳ षड्ढोतारमृतुभिः कल्पमानम् ।

ऋतस्य पदे कवयो निपान्ति । अन्तः प्रविष्टं कर्तारमेतम् । अन्तश्चन्द्रमसि मनसा चरन्तम् । सहैव सन्तं न विजानन्ति देवाः । इन्द्रस्यात्मानꣳशतधा चरन्तम् ॥
०। ३। ११। २४॥
२५ इन्द्रो राजा जगतो य ईशे । सप्तहोता सप्तधा विक्लृप्तः । परेण तन्तुं परिषिच्यमानम् । अन्तरादित्ये मनसा चरन्तम् । देवानाꣳ हृदयं ब्रह्माऽन्वविन्दत् । ब्रह्मैतद्ब्रह्मण उज्जभार । अर्कꣳश्चोतन्तꣳ सरिरस्य मध्ये । आ यस्मिन्थ्सप्त पेरवः । मेहन्ति बहुलाग् श्रियम् । बह्वश्वामिन्द्र गोमतीम् ॥ ०। ३। ११। २५॥
२६ अच्युतां बहुलाग् श्रियम् । स हरिर्वसुवित्तमः । पेरुरिन्द्राय पिन्वते । बह्वश्वामिन्द्र गोमतीम् । अच्युतां बहुलाग् श्रियम् । मह्यमिन्द्रो नियच्छतु । शतꣳशता अस्य युक्ता हरीणाम् । अर्वाङायातु वसुभी रश्मिरिन्द्रः । प्रमꣳहमाणो बहुलाग् श्रियम् । रश्मिरिन्द्रस्सविता मे नियच्छतु ॥ ०। ३। ११। २६॥
२७ घृतन्तेजो मधुमदिन्द्रियम् । मय्ययमग्निर्दधातु । हरिः पतङ्गः पटरी सुपर्णः । दिविक्षयो नभसा य एति । स न इन्द्रः कामवरं ददातु । पञ्चारं चक्रं परिवर्तते पृथु । हिरण्यज्योतिः सरिरस्य मध्ये । अजस्रं ज्योतिर्नभसा सर्पदेति । स न इन्द्रः कामवरं ददातु । सप्त युञ्जन्ति रथमेकचक्रम् ॥ ०। ३। ११। २७॥
२८ एको अश्वो वहति सप्तनामा । त्रिनाभि चक्रमजरमनर्वम् । येनेमा विश्वा भुवनानि तस्थुः । भद्रं पश्यन्त उपसेदुरग्रे । तपो दीक्षामृषयः सुवर्विदः । ततः, क्षत्रं बलमोजश्च जातम् । तदस्मै देवा अभिसन्नमन्तु । श्वेतꣳ रश्मिं बोभुज्यमानम् । अपान्नेतारं भुवनस्य गोपाम् । इन्द्रं निचिक्युः परमे व्योमन् ॥ ०। ३। ११। २८॥
२९ रोहिणीः पिङ्गला एकरूपाः । क्षरन्तीः पिङ्गला एकरूपाः । शतꣳ सहस्राणि प्रयुतानि नाव्यानाम् । अयं यः श्वेतो रश्मिः । परि सर्वमिदं जगत् । प्रजां पशून्धनानि । अस्माकं ददातु । श्वेतो रश्मिः परि सर्वं बभूव । सुवन्मह्यं पशून्, विश्वरूपान् । पतङ्गमक्तमसुरस्य मायया ॥ ०। ३। ११। २९॥
३० हृदा पश्यन्ति मनसा मनीषिणः । समुद्रे अन्तः कवयो विचक्षते । मरीचीनां पदमिच्छन्ति वेधसः । पतङ्गो वाचं मनसा बिभर्ति । तां गन्धर्वोऽवदद्गर्भे अन्तः । तां द्योतमानाग् स्वर्यं मनीषाम् । ऋतस्य पदे कवयो निपान्ति । ये ग्राम्याः पशवो विश्वरूपाः । विरूपास्सन्तो बहुधैकरूपाः । अग्निस्ताꣳ अग्रे प्रमुमोक्तु देवः ॥ ०। ३। ११। ३०॥

३१ प्रजापतिः प्रजया संविदानः । वीत२ँ स्तुकेस्तुके । युवमस्मासु नियच्छतम् । प्रप्र यज्ञपतिन्तिर । ये ग्राम्याः पशवो विश्वरूपाः । विरूपास्सन्तो बहुधैकरूपाः । तेषाँ सप्तानामिह रन्तिरस्तु । रायस्पोषाय सुप्रजास्त्वाय सुवीर्याय । य आरण्याः पशवो विश्वरूपाः । विरूपास्सन्तो बहुधैकरूपाः ॥ ०। ३। ११। ३१॥
३२ वायुस्ताँ अग्रे प्रमुमोक्तु देवः । प्रजापतिः प्रजया संविदानः । इडायै सृप्तं घृतवच्चराचरम् । देवा अन्वविन्दन्गुहाहितम् । य आरण्याः पशवो विश्वरूपाः । विरूपास्सन्तो बहुधैकरूपाः । तेषाँ सप्तानामिह रन्तिरस्तु । रायस्पोषाय सुप्रजास्त्वाय सुवीर्याय ॥ ०। ३। ११। ३२॥ आत्मा जनानां विकुर्वन्तं विपश्चिं प्रजानां वसुधानीं विराजं चरन्तं गोमतीं मे नियच्छत्वेकचक्रं व्योमन्मायया देव एकरूपा अष्टौ च ॥ ११॥
३३ सहस्रशीर्षा पुरुषः । सहस्राक्षस्सहस्रपात् । स भूमिं विश्वतो वृत्वा । अत्यतिष्ठद्दशाङ्गुलम् । पुरुष एवेदँ सर्वम् । यद्भूतं यच्च भव्यम् । उतामृतत्वस्येशानः । यदन्नेनातिरोहति । एतावानस्य महिमा । अतो ज्यायाग्श्च पूरुषः ॥ ०। ३। १२। ३३॥
३४ पादोऽस्य विश्वा भूतानि । त्रिपादस्यामृतं दिवि । त्रिपादूर्ध्व उदैत्पुरुषः । पादोऽस्येहाभवात्पुनः । ततो विश्वङ्व्यक्रामत् । साशनानशने अभि । तस्माद्विराडजायत । विराजो अधि पूरुषः । स जातो अत्यरिच्यत । पश्चाद्भूमिमथो पुरः ॥ ०। ३। १२। ३४॥
३५ यत्पुरुषेण हविषा । देवा यज्ञमतन्वत । वसन्तो अस्यासीदाज्यम् । ग्रीष्म इध्मः शरद्धविः । सप्तास्यासन्परिधयः । त्रिस्सप्त समिधः कृताः । देवा यद्यज्ञं तन्वानाः । अबध्नन्पुरुषं पशुम् । तं यज्ञं बर्हिषि प्रौक्षन्न् । पुरुषं जातमग्रतः ॥ ०। ३। १२। ३५॥
३६ तेन देवा अयजन्त । साध्या ऋषयश्च ये । तस्माद्यज्ञात्सर्वहुतः । संभृतं पृषदाज्यम् । पशूग्स्ताग्श्चक्रे वायव्यान् । आरण्यान्ग्राम्याश्च ये । तस्माद्यज्ञात्सर्वहुतः । ऋचस्सामानि जज्ञिरे । छन्दाँसि जज्ञिरे तस्मात् । यजुस्तस्मादजायत ॥ ०। ३। १२। ३६॥
३७ तस्मादश्वा अजायन्त । ये के चोभयादतः । गावो ह जज्ञिरे तस्मात् । तस्माज्जाता अजावयः । यत्पुरुषं व्यदधुः । कतिधा व्यकल्पयन्न् । मुखं किमस्य कौ बाहू । कावूरू पादावुच्येते । ब्राह्मणोऽस्य मुखमासीत् । बाहू राजन्यः कृतः ॥ ०। ३। १२। ३७॥
३८ ऊरू तदस्य यद्वैश्यः । पद्भ्याँ शूद्रो अजायत । चन्द्रमा मनसो जातः । चक्षोस्सूर्यो अजायत । मुखादिन्द्रश्चाग्निश्च । प्राणाद्वायुरजायत । नाभ्या आसीदन्तरिक्षम् । शीर्ष्णो

द्यौस्समवर्तत । पद्भ्यां भूमिर्दिशः श्रोत्रात् । तथा लोकाँ अकल्पयन्न् ॥ ०। ३। १२। ३८॥
३९ वेदाहमेतं पुरुषं महान्तम् । आदित्यवर्णं तमसस्तु पारे । सर्वाणि रूपाणि विचित्य धीरः । नामानि कृत्वाऽभिवदन्, यदास्ते । धाता पुरस्ताद्यमुदाजहार । शक्रः प्रविद्वान्प्रदिशश्चतस्रः । तमेवं विद्वानमृत इह भवति । नान्यः पन्था अयनाय विद्यते । यज्ञेन यज्ञमयजन्त देवाः । तानि धर्माणि प्रथमान्यासन् । ते ह नाकं महिमानस्सचन्ते । यत्र पूर्वे साध्यास्सन्ति देवाः ॥ ०। ३। १२। ३९॥ पूरुषः पुरोऽग्रतोऽजायत कृतोऽकल्पयन्नासन्द्वे च ॥ १२॥
(ज्यायानधि पूरुषः । अन्यत्र पुरुषः ॥ )
४० अद्भ्यस्संभूतः पृथिव्यै रसाच्च । विश्वकर्मणः समवर्तताधि । तस्य त्वष्टा विदधद्रूपमेति । तत्पुरुषस्य विश्वमाजानमग्रे । वेदाहमेतं पुरुषं महान्तम् । आदित्यवर्णं तमसः परस्तात् । तमेवं विद्वानमृत इह भवति । नान्यः पन्था विद्यतेऽयनाय । प्रजापतिश्चरति गर्भे अन्तः । अजायमानो बहुधा विजायते ॥ ०। ३। १३। ४०॥
४१ तस्य धीराः परिजानन्ति योनिम् । मरीचीनां पदमिच्छन्ति वेधसः । यो देवेभ्य आतपति । यो देवानां पुरोहितः । पूर्वो यो देवेभ्यो जातः । नमो रुचाय ब्राह्मये । रुचं ब्राह्मं जनयन्तः । देवा अग्रे तदब्रुवन्न् । यस्त्वैवं ब्राह्मणो विद्यात् । तस्य देवा असन्वशे । ह्रीश्च ते लक्ष्मीश्च पत्न्यौ । अहोरात्रे पार्श्वे । नक्षत्राणि रूपम् । अश्विनौ व्यात्तम् । इष्टं मनिषाण । अमुं मनिषाण । सर्वं मनिषाण ॥ ०। ३। १३। ४१॥ जायते वशे सप्त च ॥ १३॥
४२ भर्ता सन्भ्रियमाणो बिभर्ति । एको देवो बहुधा निविष्टः । यद भारं तन्द्रयते स भर्तुम् । निधाय भारं पुनरस्तमेति । तमेव मृत्युममृतं तमाहुः । तं भर्तारं तमु गोप्तारमाहुः । स भृतो भ्रियमाणो बिभर्ति । य एनं वेद सत्येन भर्तुम् । सद्यो जातमुत जहात्येषः । उतो जरन्तं न जहात्येकम् ॥ ०। ३। १४। ४२॥
४३ उतो बहूनेकमहर्जहार । अतन्द्रो देवस्सदमेव प्रार्थः । यस्तद्वेद यत आबभूव । सन्धां च याँ संदधे ब्रह्मणैषः । रमते तस्मिन्नुत जीर्णे शयाने । नैनं जहात्यहस्सु पूर्व्येषु । त्वामापो अनु सर्वाश्चरन्ति जानतीः । वथ्सं पयसा पुनानाः । त्वमग्निँ हव्यवाहँ समिन्थ्से । त्वं भर्ता मातरिश्वा प्रजानाम् ॥ ०। ३। १४। ४३॥
४४ त्वं यज्ञस्त्वमु वेवासि सोमः । तव देवा हवमायन्ति सर्वे । त्वमेकोऽसि बहूननुप्रविष्टः

। नमस्ते अस्तु सुहवो म एधि । नमो वामस्तु शृणुतꣳ हवं मे । प्राणापानावजिरꣳ संचरन्तौ । ह्वयामि वां ब्रह्मणा तूर्तमेतम् । यो मां द्वेष्टि तं जहितं युवाना । प्राणापानौ संविदानौ जहितम् । अमुष्यासुना मा संगसाथाम् ॥ ०। ३। १४। ४४॥
४५ तं मे देवा ब्रह्मणा संविदानौ । वधाय दत्तं तमहꣳ हनामि । असञ्जजान सत आबभूव । यंयं जजान स उ गोपो अस्य । यदा भारं तन्द्रयते स भर्तुम् । परास्य भारं पुनरस्तमेति । तद्वै त्वं प्राणो अभवः । महान्भोगः प्रजापतेः । भुजः करिष्यमाणः । यद्देवान्प्राणयो नव ॥ ०। ३। १४। ४५॥ एकं प्रजानां गसाथां नव ॥ १४॥
४६ हरिꣳ हरन्तमनुयन्ति देवाः । विश्वस्येशानं वृषभं मतीनाम् । ब्रह्म सरूपमनु मेदमागात् । अयनं मा विवधीर्विक्रमस्व । मा छिदो मृत्यो मा वधीः । मा मे बलं विवृहो मा प्रमोषीः । प्रजां मा मे रीरिष आयुरुग्र । नृचक्षसं त्वा हविषा विधेम । सद्यश्चकमानाय । प्रवेपानाय मृत्यवे ॥ ०। ३। १५। ४६॥
४७ प्रास्मा आशा अशृण्वन् । कामेनाजनयन्पुनः । कामेन मे काम आगात् । हृदयाद्धृदयं मृत्योः । यदमीषामदः प्रियम् । तदैतूप मामभि । परं मृत्यो अनुपरेहि पन्थाम् । यस्ते स्व इतरो देवयानात् । चक्षुष्मते शृण्वते ते ब्रवीमि । मा नः प्रजाꣳ रीरिषो मोत वीरान् । प्र पूर्व्यं मनसा वन्दमानः । नाधमानो वृषभं चर्षणीनाम् । यः प्रजानामेकराण्मानुषीणाम् । मृत्युं यजे प्रथमजामृतस्य ॥ ०। ३। १५। ४७॥ मृत्यवे वीराग्श्चत्वारि च ॥ १५॥
४८ तरणिर्विश्वदर्शतो ज्योतिष्कृदसि सूर्य । विश्वमाभासि रोचनम् । उपयामगृहीतोऽसि सूर्याय त्वा भ्राजस्वत एष ते योनिस्सूर्याय त्वा भ्राजस्वते ॥ ०। ३। १६। ४८॥ ॥ १६॥
४९ आप्यायस्व मदिन्तम सोम विश्वाभिरूतिभिः । भवा नस्सप्रथस्तमः ॥ ०। ३। १७। ४९॥ ॥ १७॥
५० ईयुष्टे ये पूर्वतरामपश्यन्व्युच्छन्तीमुषसं मर्त्यासः । अस्माभिरू नु प्रतिचक्ष्याऽभूदो ते यन्ति ये अपरीषु पश्यान् ॥ ०। ३। १८। ५०॥ ॥ १८॥
५१ ज्योतिष्मतीं त्वा सादयामि ज्योतिष्कृतं त्वा सादयामि ज्योतिर्विदं त्वा सादयामि भास्वतीं त्वा सादयामि ज्वलन्तीं त्वा सादयामि मल्मला भवन्तीं त्वा सादयामि दीप्यमानां त्वा सादयामि रोचमानां त्वा सादयाम्यजस्रां त्वा सादयामि बृहज्ज्योतिषं त्वा सादयामि बोधयन्तीं त्वा सादयामि जाग्रतीं त्वा सादयामि ॥ ०। ३। १९। ५१॥ ॥

१९॥
५२ प्रयासाय स्वाहाऽऽयासाय स्वाहा वियासाय स्वाहा संयासाय स्वाहोद्यासाय स्वाहाऽवयासाय स्वाहा शुचे स्वाहा शोकाय स्वाहा तप्यत्वै स्वाहा तपते स्वाहा ब्रह्महत्यायै स्वाहा सर्वस्मै स्वाहा ॥ ०। ३। २०। ५२॥
॥ २०॥
५३ चित्तꣳ संतानेन भवं यक्ना रुद्रं तनिम्ना पशुपतिग्ग् स्थूलहृदयेनाग्निꣳ हृदयेन रुद्रं लोहितेन शर्वं मतस्नाभ्यां महादेवमन्तः पार्श्वेनौषिष्ठहनꣳ शिङ्गीनिकोश्याभ्याम् ॥ ०। ३। २१। ५३॥ ॥ २१॥
चित्तिः पृथिव्यग्निः सूर्यं ते चक्षुर्महाहविर्होता वाग्घोता ब्राह्मण एकहोताऽग्निर्यजुर्भिस्सेनेन्द्रस्य देवस्य सुवर्णं घर्मꣳ सहस्रशीर्षाऽद्भ्यो भर्ता हरिं तरणिराप्यायस्वेयुष्टे ये ज्योतिष्मतीं प्रयासाय चित्तमेकविꣳशतिः ॥ २१॥
चित्तिरग्निर्यजुर्भिरन्तः प्रविष्टः प्रजापतिः प्रजया संविदानस्तस्य धीरा ज्योतिष्मतीं त्रिपञ्चाशत् ॥ ५३॥
चित्तिः शिङ्गीनिकोश्याभ्याम् ॥
० तच्छं योरावृणीमहे । गातुं यज्ञाय । गातुं यज्ञपतये । दैवी स्वस्तिरस्तु नः । स्वस्तिर्मानुषेभ्यः । ऊर्ध्वं जिगातु भेषजम् । शं नो अस्तु द्विपदे । शं चतुष्पदे ॥ ओं शान्तिः शान्तिः शान्तिः ॥

## आरण्यके चतुर्थः प्रश्नः ४

० नमोऽनु मदन्तु ॥ ओं शान्तिः शान्तिः शान्तिः ॥
१ नमो वाचे या चोदिता या चानुदिता तस्यै वाचे नमो नमो वाचे नमो वाचस्पतये नम ऋषिभ्यो मन्त्रकृद्भ्यो मन्त्रपतिभ्यो मा मामृषयो मन्त्रकृतो मन्त्रपतयः परादुर्माऽहमृषीन्मन्त्रकृतो मन्त्रपतीन् परादां वैश्वदेवीं वाचमुद्यासꣳ शिवामदस्तां जुष्टां देवेभ्यः शर्म मे द्यौः शर्म पृथिवी शर्म विश्वमिदं जगत् । शर्म चन्द्रश्च सूर्यश्च शर्म ब्रह्मप्रजापती । भूतं वदिष्ये भुवनं वदिष्ये तेजो वदिष्ये यशो वदिष्ये तपो वदिष्ये ब्रह्म वदिष्ये सत्यं वदिष्ये तस्मा अहमिदमुपस्तरणमुपस्तृण उपस्तरणं मे प्रजायै पशूनां भूयादुपस्तरणमहं प्रजायै पशूनां भूयासं प्राणापानौ मृत्योर्मा पातं प्राणापानौ मा मा हासिष्टं मधु मनिष्ये मधु जनिष्ये मधु वक्ष्यामि मधु वदिष्यामि मधुमतीं देवेभ्यो वाचमुद्यासꣳ शुश्रूषेण्यां मनुष्येभ्यस्तं मा देवा अवन्तु शोभायै पितरोऽनुमदन्तु ॥ ओं

शान्तिः शान्तिः शान्तिः ॥ ०। ४। १। १॥
२ युञ्जते मन उत युञ्जते धियः । विप्रा विप्रस्य बृहतो विपश्चितः । वि होत्रा दधे वयुनाविदेक इत् । मही देवस्य सवितुः परिष्टुतिः । देवस्य त्वा सवितुः प्रसवे । अश्विनोर्बाहुभ्याम् । पूष्णो हस्ताभ्यामाददे । अभ्रिरसि नारिरसि । अध्वरकृद्देवेभ्यः । उत्तिष्ठ ब्रह्मणस्पते ॥ ०। ४। २। २॥
३ देवयन्तस्त्वेमहे । उपप्रयन्तु मरुतः सुदानवः । इन्द्र प्राशूर्भवा सचा । प्रैतु ब्रह्मणस्पतिः । प्र देव्येतु सूनृता । अच्छा वीरं नर्यं पङ्क्तिराधसम् । देवा यज्ञं नयन्तु नः । देवी द्यावापृथिवी अनु मेऽमँसाथाम् । ऋध्यासमद्य । मखस्य शिरः ॥ ०। ४। २। ३॥
४ मखाय त्वा । मखस्य त्वा शीर्ष्णे । इयत्यग्र आसीः । ऋध्यासमद्य । मखस्य शिरः । मखाय त्वा । मखस्य त्वा शीर्ष्णे । देवीर्वम्रीरस्य भूतस्य प्रथमजा ऋतावरीः । ऋध्यासमद्य । मखस्य शिरः ॥ ०। ४। २। ४॥
५ मखाय त्वा । मखस्य त्वा शीर्ष्णे । इन्द्रस्यौजोऽसि । ऋध्यासमद्य । मखस्य शिरः । मखाय त्वा । मखस्य त्वा शीर्ष्णे । अग्निजा असि प्रजापते रेतः । ऋध्यासमद्य । मखस्य शिरः ॥ ०। ४। २। ५॥
६ मखाय त्वा । मखस्य त्वा शीर्ष्णे । आयुर्धेहि प्राणं धेहि । अपानं धेहि व्यानं धेहि । चक्षुर्धेहि श्रोत्रं धेहि । मनो धेहि वाचं धेहि । आत्मानं धेहि प्रतिष्ठां धेहि । मां धेहि मयि धेहि । मधु त्वा मधुला करोतु । मखस्य शिरोसि ॥ ०। ४। २। ६॥
७ यज्ञस्य पदे स्थः । गायत्रेण त्वा छन्दसा करोमि । त्रैष्टुभेन त्वा छन्दसा करोमि । जागतेन त्वा छन्दसा करोमि । मखस्य रास्नाऽसि । अदितिस्ते बिलं गृह्णातु । पाङ्क्तेन छन्दसा । सूर्यस्य हरसा श्राय । मखोऽसि ॥
०। ४। २। ७॥ पते शिर ऋतावरीर्ऋध्यासमद्य मखस्य शिरः शिरः शिरोऽसि नव च ॥ २॥ इयति देवीरिन्द्रस्यौजोऽस्यग्निजा अस्यायुर्धेहि प्राणं पञ्च ॥
८ वृष्णो अश्वस्य निष्पदसि । वरुणस्त्वा धृतव्रत आधूपयतु । मित्रावरुणयोर्ध्रुवेण धर्मणा । अर्चिषे त्वा । शोचिषे त्वा । ज्योतिषे त्वा । तपसे त्वा । अभीमं महिना दिवम् । मित्रो बभूव सप्रथाः । उत श्रवसा पृथिवीम् ॥ ०। ४। ३। ८॥
९ मित्रस्य चर्षणीधृतः । श्रवो देवस्य सानसिम् । द्युम्नं चित्रश्रवस्तमम् । सिद्ध्यै त्वा । देवस्त्वा सवितोद्वपतु । सुपाणिस्स्वङ्गुरिः । सुबाहुरुत शक्त्या । अपद्यमानः पृथिव्याम्

। आशा दिश आपृण । उत्तिष्ठ बृहन्भव ॥ ०। ४। ३। ९॥

१० ऊर्ध्वस्तिष्ठ ध्रुवस्त्वम् । सूर्यस्य त्वा चक्षुषाऽन्वीक्षे । ऋजवे त्वा । साधवे त्वा । सुक्षित्यै त्वा भूत्यै त्वा । इदमहममुमामुष्यायणं विशा पशुभिर्ब्रह्मवर्चसेन पर्यूहामि । गायत्रेण त्वा छन्दसाऽऽच्छृणद्मि । त्रैष्टुभेन त्वा छन्दसाऽऽच्छृणद्मि । जागतेन त्वा छन्दसाऽऽच्छृणद्मि । छृणत्तु त्वा वाक् । छृणत्तु त्वोर्क् । छृणत्तु त्वा हविः । छृन्धि वाचम् । छृन्ध्यूर्जम् । छृन्धि हविः । देव पुरश्चर सघ्यासं त्वा ॥ ०। ४। ३। १०॥

पृथिवीं भव वाख्षड्ढ ॥ ३॥

११ ब्रह्मन्प्रवर्ग्येण प्रचरिष्यामः । होतर्घर्ममभिष्टुहि । अग्नीद्रौहिणौ पुरोडाशावधिश्रय । प्रतिप्रस्थातर्विहर । प्रस्तोतस्सामानि गाय । यजुर्युक्तꣳ सामभिराक्तखं त्वा । विश्वैर्देवैरनुमतं मरुद्भिः । दक्षिणाभिः प्रततं पारयिष्णुम् । स्तुभो वहन्तु सुमनस्यमानम् । स नो रुचं धेह्यहृणीयमानः । भूर्भुवस्सुवः । ओमिन्द्रवन्तः प्रचरत ॥ ०। ४। ४। ११॥

अहृणीयमानो द्वे च ॥ ४॥

१२ ब्रह्मन्प्रचरिष्यामः । होतर्घर्ममभिष्टुहि । यमाय त्वा मखाय त्वा । सूर्यस्य हरसे त्वा । प्राणाय स्वाहा व्यानाय स्वाहाऽपानाय स्वाहा । चक्षुषे स्वाहा श्रोत्राय स्वाहा । मनसे स्वाहा वाचे सरस्वत्यै स्वाहा । दक्षाय स्वाहा क्रतवे स्वाहा । ओजसे स्वाहा बलाय स्वाहा । देवस्त्वा सविता मध्वाऽनक्तु ॥ ०। ४। ५। १२॥

१३ पृथिवीं तपसस्त्रायस्व । अर्चिरसि शोचिरसि ज्योतिरसि तपोसि । सꣳ सीदस्व महाꣳ असि । शोचस्व देववीतमः । विधूममग्ने अरुषं मियेध्य । सृज प्रशस्त दर्शतम् । अञ्जन्ति यं प्रथयन्तो न विप्राः । वपावन्तं नाग्निना तपन्तः । पितुर्न पुत्र उपसि प्रेष्ठः । आ घर्मो अग्निमृतयन्नसादीत् ॥ ०। ४। ५। १३॥

१४ अनाधृष्या पुरस्तात् । अग्नेराधिपत्ये । आयुर्मे दाः । पुत्रवती दक्षिणतः । इन्द्रस्याधिपत्ये । प्रजां मे दाः । सुषदा पश्चात् । देवस्य सवितुराधिपत्ये । प्राणं मे दाः । आश्रुतिरुत्तरतः ॥ ०। ४। ५। १४॥

१५ मित्रावरुणयोराधिपत्ये । श्रोत्रं मे दाः । विधृतिरुपरिष्टात् । बृहस्पतेराधिपत्ये । ब्रह्म मे दाः, क्षत्रं मे दाः । तेजो मे धा वर्चो मे धाः । यशो मे धास्तपो मे धाः । मनो मे धाः । मनोरश्वाऽसि भूरिपुत्रा । विश्वाभ्यो मा नाष्ट्राभ्यः पाहि ॥ ०। ४। ५। १५॥

१६ सूपसदा मे भूया मा मा हिꣳसीः । तपो ष्वग्ने अन्तराꣳ अमित्रान् । तपा

शꣳ समररुषः परस्य । तपा वसो चिकितानो अचित्तान् । वि ते तिष्ठन्तामजरा अयासः । चितस्स्थ परिचितः । स्वाहा मरुद्भिः परिश्रयस्व । मा असि । प्रमा असि । प्रतिमा असि ॥ ०। ४। ५। १६॥
१७ संमा असि । विमा असि । उन्मा असि । अन्तरिक्षस्यान्तर्धिरसि । दिवं तपसस्त्रायस्व । आभिर्गीर्भिर्यदतो न ऊनम् । आप्यायय हरिवो वर्धमानः । यदा स्तोतृभ्यो महि गोत्रा रुजासि । भूयिष्ठभाजो अध ते स्याम । शुक्रं ते अन्यद्यजतं ते अन्यत् ॥ ०। ४। ५। १७॥
१८ विषुरूपे अहनी द्यौरिवासि । विश्वा हि माया अवसि स्वधावः । भद्रा ते पूषन्निह रातिरस्तु । अर्हन्बिभर्षि सायकानि धन्व । अर्हन्निष्कं यजतं विश्वरूपम् । अर्हन्निदं दयसे विश्वमब्भुवम् । न वा ओजीयो रुद्र त्वदस्ति । गायत्रमसि । त्रैष्टुभमसि । जागतमसि । मधु मधु मधु ॥ ०। ४। ५। १८॥ अनत्त्कसादीदुत्तरतः पाहि प्रतिमा असि यजतं ते अन्यज्ञागतमस्येकं च ॥ ५॥
१९ दश प्राचीर्दश भासि दक्षिणा । दश प्रतीचीर्दश भास्युदीचीः । दशोर्ध्वा भासि सुमनस्यमानः । स नो रुचं धेह्यहृणीयमानः । अग्निष्ट्वा वसुभिः पुरस्ताद्रोचयतु गायत्रेण छन्दसा । स मा रुचितो रोचय । इन्द्रस्त्वा रुद्रैर्दक्षिणतो रोचयतु त्रैष्टुभेन छन्दसा । स मा रुचितो रोचय । वरुणस्त्वादित्यैः पश्चाद्रोचयतु जागतेन छन्दसा । स मा रुचितो रोचय ॥ ०। ४। ६। १९॥
२० द्युतानस्त्वा मारुतो मरुद्भिरुत्तरतो रोचयत्वानुष्टुभेन छन्दसा । स मा रुचितो रोचय । बृहस्पतिस्त्वा विश्वैर्देवैरुपरिष्टाद्रोचयतु पाङ्क्तेन छन्दसा । स मा रुचितो रोचय । रोचितस्त्वं देव घर्म देवेष्वसि । रोचिषीयाहं मनुष्येषु । सम्राड्घर्म रुचितस्त्वं देवेष्वायुष्माग्स्तेजस्वी ब्रह्मवर्चस्यसि । रुचितोऽहं मनुष्येष्वायुष्माग्स्तेजस्वी ब्रह्मवर्चसी भूयासम् । रुगसि । रुचं मयि धेहि ॥ ०। ४। ६। २०॥
२१ मयि रुक् । दश पुरस्ताद्रोचसे । दश दक्षिणा । दश प्रत्यङ् । दशोदङ् । दशोर्ध्वो भासि सुमनस्यमानः । स नः सम्राडिषमूर्जं धेहि । वाजी वाजिने पवस्व । रोचितो घर्मो रुचीय ॥ ०। ४। ६। २१॥ रोचय धेहि नव च ॥ ६॥
२२ अपश्यं गोपामनिपद्यमानम् । आ च परा च पथिभिश्चरन्तम् । स सध्रीचीस्स विषूचीर्वसानः । आवरीवर्ति भुवनेष्वन्तः । अत्र प्रावीः । मधुमाध्वीभ्यां मधुमाधूचीभ्याम् । अनु वां देववीतये । समग्निरग्निना गत । सं देवेन सवित्रा । सꣳ सूर्येण रोचते ॥

०। ४। ७। २२॥

२३ स्वाहा समग्निस्तपसा गत । सं देवेन सवित्रा । सꣳ सूर्येणारोचिष्ट । धर्ता दिवो विभासि रजसः । पृथिव्या धर्ता । उरोरन्तरिक्षस्य धर्ता । धर्ता देवो देवानाम् । अमर्त्यस्तपोजाः । हृदे त्वा मनसे त्वा । दिवे त्वा सूर्याय त्वा ॥ ०। ४। ७। २३॥

२४ ऊर्ध्वमिममध्वरं कृधि । दिवि देवेषु होत्रा यच्छ । विश्वासां भुवां पते । विश्वस्य भुवनस्पते । विश्वस्य मनसस्पते । विश्वस्य वचसस्पते । विश्वस्य तपसस्पते । विश्वस्य ब्रह्मणस्पते । देवश्रूस्त्वं देव घर्म देवान्पाहि । तपोजां वाचमस्मे नियच्छ देवायुवम् ॥ ०। ४। ७। २४॥

२५ गर्भो देवानाम् । पिता मतीनाम् । पतिः प्रजानाम् । मतिः कवीनाम् । सं देवो देवेन सवित्राऽयतिष्ट । सꣳ सूर्येणारुक्त । आयुर्दास्त्वमस्मभ्यं घर्म वर्चोदा असि । पिता नोऽसि पिता नो बोध । आयुर्धास्तनूधाः पयोधाः । वर्चोदा वरिवोदा द्रविणोदाः ॥ ०। ४। ७। २५॥

२६ अन्तरिक्षप्र उरोर्वरीयान् । अशीमहि त्वा मा मा हिꣳसीः । त्वमग्ने गृहपतिर्विशामसि । विश्वासां मानुषीणाम् । शतं पूर्भिर्यविष्ठ पाह्यꣳहसः । समेद्धारꣳ शतꣳ हिमाः । तन्द्राविणꣳहार्दिवानम् । इहैव रातयस्सन्तु । त्वष्टीमती ते सपेय । सुरेता रेतो दधाना । वीरं विदेय तव संदृशि । माऽहꣳ रायस्पोषेण वियोषम् ॥ ०। ४। ७। २६॥ रोचते सूर्याय त्वा देवायुवं द्रविणोदा दधाना द्वे च ॥ ७॥

२७ देवस्य त्वा सवितुः प्रसवे । अश्विनोर्बाहुभ्याम् । पूष्णो हस्ताभ्यामाददे । अदित्यै रास्नाऽसि । इड एहि । अदित एहि । सरस्वत्येहि । असावेहि । असावेहि । असावेहि ॥ ०। ४। ८। २७॥

२८ अदित्या उष्णीषमसि । वायुरस्यैडः । पूषा त्वोपावसृजतु । अश्विभ्यां प्रदापय । यस्ते स्तनः शशयो यो मयोभूः । येन विश्वा पुष्यसि वार्याणि । यो रत्नधा वसुविद्यः सुदत्रः । सरस्वति तमिह धातवेऽकः । उस्र घर्मꣳ शिꣳष । उस्र घर्मं पाहि ॥ ०। ४। ८। २८॥

२९ घर्माय शिꣳष । बृहस्पतिस्त्वोपसीदतु । दानवस्स्थ पेरवः । विष्वग्वृतो लोहितेन । अश्विभ्यां पिन्वस्व । सरस्वत्यै पिन्वस्व । पूष्णे पिन्वस्व । बृहस्पतये पिन्वस्व । इन्द्राय पिन्वस्व । इन्द्राय पिन्वस्व ॥ ०। ४। ८। २९॥

३० गायत्रोऽसि । त्रैष्टुभोऽसि । जागतमसि । सहोर्जो भागेनोप मेहि । इन्द्राश्विना मधुनस्सारघस्य । घर्मं पात वसवो यजता वट् । स्वाहा त्वा सूर्यस्य रश्मये वृष्टिवनये

जुहोमि । मधु हविरसि । सूर्यस्य तपस्तप । द्यावापृथिवीभ्यां त्वा परिगृह्णामि ॥ ०। ४। ८। ३०॥
३१ अन्तरिक्षेण त्वोपयच्छामि । देवानां त्वा पितृणामनुमतो भर्तुꣳशकेयम् । तेजोऽसि । तेजोऽनुप्रेहि । दिविस्पृङ्मा मा हिꣳसीः । अन्तरिक्षस्पृङ्मा मा हिꣳसीः । पृथिविस्पृङ्मा मा हिꣳसीः । सुवरसि सुवर्मे यच्छ । दिवं यच्छ दिवो मा पाहि ॥ ०। ४। ८। ३१॥
एहि पाहि पिन्वस्व गृह्णामि नव च ॥ ८॥
३२ समुद्राय त्वा वाताय स्वाहा । सलिलाय त्वा वाताय स्वाहा । अनाधृष्याय त्वा वाताय स्वाहा । अप्रतिधृष्याय त्वा वाताय स्वाहा । अवस्यवे त्वा वाताय स्वाहा । दुवस्वते त्वा वाताय स्वाहा । शिमिद्वते त्वा वाताय स्वाहा । अग्नये त्वा वसुमते स्वाहा । सोमाय त्वा रुद्रवते स्वाहा । वरुणाय त्वाऽऽदित्यवते स्वाहा ॥ ०। ४। ९। ३२॥
३३ बृहस्पतये त्वा विश्वदेव्यावते स्वाहा । सवित्रे त्वर्भुमते विभुमते प्रभुमते वाजवते स्वाहा । यमाय त्वाऽंगिरस्वते पितृमते स्वाहा । विश्वा आशा दक्षिणसत् । विश्वान्देवानयाडिह । स्वाहाकृतस्य घर्मस्य । मधोः पिबतमश्विना । स्वाहाऽग्नये यज्ञियाय । शं यजुर्भिः । अश्विना घर्मं पातꣳ हार्दिवानम् ॥ ०। ४। ९। ३३॥
३४ अहर्दिवाभिरूतिभिः । अनु वां द्यावापृथिवी मꣳसाताम् । स्वाहेन्द्राय । स्वाहेन्द्रा वट् । घर्ममपातमश्विना हार्दिवानम् । अहर्दिवाभिरूतिभिः । अनु वां द्यावापृथिवी अमꣳसाताम् । तं प्राव्यं यथा वट् । नमो दिवे । नमः पृथिव्यै ॥ ०। ४। ९। ३४॥
३५ दिवि धा इमं यज्ञम् । यज्ञमिमं दिवि धाः । दिवं गच्छ । अन्तरिक्षं गच्छ । पृथिवीं गच्छ । पञ्च प्रदिशो गच्छ । देवान्घर्मपान्गच्छ । पितॄन्घर्मपान्गच्छ ॥ ०। ४। ९। ३५॥
आदित्यवते स्वाहा हार्दिवानं पृथिव्या अष्टौ च ॥ ९॥
३६ इषे पीपिहि । ऊर्जे पीपिहि । ब्रह्मणे पीपिहि । क्षत्राय पीपिहि । अद्भ्यः पीपिहि । ओषधीभ्यः पीपिहि । वनस्पतिभ्यः पीपिहि । द्यावापृथिवीभ्यां पीपिहि । सुभूताय पीपिहि । ब्रह्मवर्चसाय पीपिहि ॥ ०। ४। १०। ३६॥
३७ यजमानाय पीपिहि । मह्यं ज्यैष्ठ्याय पीपिहि । त्विष्यै त्वा । द्युम्नाय त्वा । इन्द्रियाय त्वा भूत्यै त्वा । धर्माऽसि सुधर्मा मे न्यस्मे । ब्रह्माणि धारय । क्षत्राणि धारय । विशं धारय । नेत्त्वा वातस्स्कन्दयात् ॥ ०। ४। १०। ३७॥

३८ अमुष्य त्वा प्राणे सादयामि । अमुना सह निरर्थं गच्छ । योऽस्मान्द्वेष्टि । यं च वयं द्विष्मः । पूष्णे शरसे स्वाहा । ग्रावभ्यस्स्वाहा । प्रतिरेभ्यस्स्वाहा । द्यावापृथिवीभ्याग् स्वाहा । पितृभ्यो घर्मपेभ्यस्स्वाहा । रुद्राय रुद्रहोत्रे स्वाहा ॥ ०। ४। १०। ३८॥
३९ अहर्ज्योतिः केतुना जुषताम् । सुज्योतिर्ज्योतिषाग् स्वाहा । रात्रिर्ज्योतिः केतुना जुषताम् । सुज्योतिर्ज्योतिषाग् स्वाहा । अपीपरो माऽह्नो रात्रियै मा पाहि । एषा ते अग्ने समित् । तया समिद्ध्यस्व । आयुर्मे दाः । वर्चसा माऽञ्जीः । अपीपरो मा रात्रिया अह्नो मा पाहि ॥ ०। ४। १०। ३९॥
४० एषा ते अग्ने समित् । तया समिद्ध्यस्व । आयुर्मे दाः । वर्चसा माऽञ्जीः । अग्निर्ज्योतिर्ज्योतिरग्निस्स्वाहा । सूर्यो ज्योतिर्ज्योतिस्सूर्यस्स्वाहा । भूस्स्वाहा । हुतꣳ हविः । मधु हविः । इन्द्रतमेऽग्नौ ॥ ०। ४। १०। ४०॥
४१ पिता नोऽसि मा मा हिꣳसीः । अश्याम ते देव घर्म । मधुमतो वाजवतः पितुमतः । अंगिरस्वतस्स्वधाविनः । अशीमहि त्वा मा मा हिꣳसीः । स्वाहा त्वा सूर्यस्य रश्मिभ्यः । स्वाहा त्वा नक्षत्रेभ्यः ॥ ०। ४। १०। ४१॥
ब्रह्मवर्चसाय पीपिहि स्कन्दयाद्रुद्राय रुद्रहोत्रे स्वाहाऽह्नो मा पाह्यग्नौ सप्त च ॥ १०॥
४२ घर्म या ते दिवि शुक् । या गायत्रे छन्दसि । या ब्राह्मणे । या हविर्धाने । तां त एतेनावयजे स्वाहा । घर्म या तेऽन्तरिक्षे शुक् । या त्रैष्टुभे छन्दसि । या राजन्ये । याऽऽग्नीध्रे । तां त एतेनावयजे स्वाहा ॥ ०। ४। ११। ४२॥
४३ घर्म या ते पृथिव्याꣳ शुक् । या जागते छन्दसि । या वैश्ये । या सदसि । तां त एतेनावयजे स्वाहा । अनु नोऽद्यानुमतिः । अन्विदनुमते त्वम् । दिवस्त्वा परस्पायाः । अन्तरिक्षस्य तनुवः पाहि । पृथिव्यास्त्वा धर्मणा ॥ ०। ४। ११। ४३॥
४४ वयमनुक्रामाम सुविताय नव्यसे । ब्रह्मणस्त्वा परस्पायाः । क्षत्रस्य तनुवः पाहि । विशस्त्वा धर्मणा । वयमनुक्रामाम सुविताय नव्यसे । प्राणस्य त्वा परस्पायै । चक्षुषस्तनुवः पाहि । श्रोत्रस्य त्वा धर्मणा । वयमनुक्रामाम सुविताय नव्यसे । वल्गुरसि शंयुधायाः ॥ ०। ४। ११। ४४॥
४५ शिशुर्जनधायाः । शं च वक्षि परि च वक्षि । चतुस्स्रक्तिर्नाभिर्ऋतस्य । सदो विश्वायुः शर्म सप्रथाः । अप द्वेषो अप ह्वरः । अन्यद्व्रतस्य सश्चिम । घर्मैतत्तेऽन्नमेतत्पुरीषम् । तेन वर्धस्व चा च प्यायस्व । वर्धिषीमहि च वयम् । आ च प्यासिषीमहि ॥ ०। ४। ११। ४५॥

४६ रन्तिर्नामासि दिव्यो गन्धर्वः । तस्य ते पद्वद्धविर्धानम् । अग्निरध्यक्षाः । रुद्रोऽधिपतिः
। समहमायुषा । सं प्राणेन । सं वर्चसा । सं पयसा । सं गौपत्येन । सꣳ रायस्पोषेण
॥ ०। ४। ११। ४६॥
४७ व्यसौ । योऽस्मान्द्वेष्टि । यं च वयं द्विष्मः । अचिक्रदद्वृषा हरिः । महान्मित्रो
न दर्शतः । सꣳ सूर्येण रोचते । चिदसि समुद्रयोनिः । इन्दुर्दक्षः श्येन ऋतावा ।
हिरण्यपक्षः शकुनो भुरण्युः । महान्थ्सधस्थे ध्रुव आनिषत्तः ॥ ०। ४। ११। ४७॥
४८ नमस्ते अस्तु मा मा हिꣳसीः । विश्वावसुꣳ सोमगन्धर्वम् । आपो ददृशुषीः ।
तदृतेना व्यायन्न् । तदन्ववैत् । इन्द्रो रारहाण आसाम् । परि सूर्यस्य परिधीꣳरपश्यत्
। विश्वावसुरभि तन्नो गृणातु । दिव्यो गन्धर्वो रजसो विमानः । यद्वा घा सत्यमुत यन्न
विद्म ॥ ०। ४। ११। ४८॥
४९ धियो हिन्वानो धिय इन्नो अव्यात् । सस्निमविन्दच्चरणे नदीनाम् । अपावृणोद्दुरो
अश्मव्रजानाम् । प्रासां गन्धर्वो अमृतानि वोचत् । इन्द्रो दक्षं परिजानादहीनम् । एतत्त्वं
देव घर्म देवो देवानुपागाः । इदमहं मनुष्यो मनुष्यान् । सोमपीथानु मेहि । सह प्रजया
सह रायस्पोषेण । सुमित्रा न आप ओषधयस्सन्तु ॥ ०। ४। ११। ४९॥
५० दुर्मित्रास्तस्मै भूयासुः । योऽस्मान्द्वेष्टि । यं च वयं द्विष्मः । उद्वयं तमसस्परि ।
उदु त्यं चित्रम् । इममू षु त्यमस्मभ्यꣳ सनिम् । गायत्रं नवीयाꣳसम् । अग्ने देवेषु
प्रवोचः ॥ ०। ४। ११। ५०॥
याऽऽग्नीध्रे तां त एतेनावयजे स्वाहा धर्मणा शंयुधायाः प्यासिषीमहि पोषेण निषत्तो
विद्म सन्त्वष्टौ च ॥ ११॥
५१ महीनां पयोऽसि विहितं देवत्रा । ज्योतिर्भा असि वनस्पतीनामोषधीनाꣳ रसः ।
वाजिनं त्वा वाजिनोऽवनयामः । ऊर्ध्वं मनस्सुवर्गम् ॥ ०। ४। १२। ५१॥ ॥ १२॥
५२ अस्कान्द्यौः पृथिवीम् । अस्कानृषभो युवा गाः । स्कन्नेमा विश्वा भुवना । स्कन्नो
यज्ञः प्रजनयतु । अस्कानजनि प्राजनि । आ स्कन्नाज्जायते वृषा । स्कन्नात्प्रजनिषीमहि
॥ ०। ४। १३। ५२॥ ॥ १३॥
५३ या पुरस्ताद्विद्युदापतत् । तां त एतेनावयजे स्वाहा । या दक्षिणतः । या पश्चात्
। योत्तरतः । योपरिष्टाद्विद्युदापतत् । तां त एतेनावयजे स्वाहा ॥ ०। ४। १४। ५३॥
॥ १४॥
५४ प्राणाय स्वाहा व्यानाय स्वाहाऽपानाय स्वाहा । चक्षुषे स्वाहा श्रोत्राय स्वाहा ।

मनसे स्वाहा वाचे सरस्वत्यै स्वाहा ॥ ०। ४। १५। ५४॥
॥ १५॥

५५ पूष्णे स्वाहा पूष्णे शरसे स्वाहा । पूष्णे प्रपथ्याय स्वाहा पूष्णे नरन्धिषाय स्वाहा । पूष्णेऽङ्घृणये स्वाहा पूष्णे नरुणाय स्वाहा । पूष्णे साकेताय स्वाहा ॥ ०। ४। १६। ५५॥ ॥ १६॥

५६ उदस्य शुष्माद्भानुर्नार्त बिभर्ति । भारं पृथिवी न भूम । प्र शुक्रैतु देवी मनीषा । अस्मथ्सुतष्टो रथो न वाजी । अर्चन्त एके महि साम मन्वत । तेन सूर्यमधारयन्न् । तेन सूर्यमरोचयन्न् । घर्मः शिरस्तदयमग्निः । पुरीषमसि संप्रियं प्रजया पशुभिर्भुवत् । प्रजापतिस्त्वा सादयतु । तया देवतयाऽङ्गिरस्वद्ध्रुवा सीद ॥ ०। ४। १७। ५६॥ ॥ १७॥

५७ यास्ते अग्न आर्द्रा योनयो याः कुलायिनीः । ये ते अग्न इन्दवो या उ नाभयः । यास्ते अग्ने तनुव ऊर्जो नाम । ताभिस्त्वमुभयीभिस्संविदानः । प्रजाभिरग्ने द्रविणेह सीद । प्रजापतिस्त्वा सादयतु । तया देवतयाऽङ्गिरस्वद्ध्रुवा सीद ॥ ०। ४। १८। ५७॥ ॥ १८॥

५८ अग्निरसि वैश्वानरोऽसि । संवथ्सरोऽसि परिवथ्सरोऽसि । इदावथ्सरोऽसीदुवथ्सरोऽसि । इद्वथ्सरोऽसि वथ्सरोऽसि । तस्य ते वसन्तः शिरः । ग्रीष्मो दक्षिणः पक्षः । वर्षाः पुच्छम् । शरदुत्तरः पक्षः । हेमन्तो मध्यम् । पूर्वपक्षाश्चितयः । अपरपक्षाः पुरीषम् । अहोरात्राणीष्टकाः । तस्य ते मासाश्चार्धमासाश्च कल्पन्ताम् । ऋतवस्ते कल्पन्ताम् । संवथ्सरस्ते कल्पताम् । अहोरात्राणि ते कल्पन्ताम् । एति प्रेति वीति समित्युदिति । प्रजापतिस्त्वा सादयतु । तया देवतयाऽङ्गिरस्वद्ध्रुवस्सीद ॥ ०। ४। १९। ५८॥

५९ भूर्भुवस्सुवः । ऊर्ध्व ऊ षु ण ऊतये । ऊर्ध्वो नः पाह्यꣳहसः । विधुं दद्राणꣳ समने बहूनाम् । युवानꣳ सन्तं पलितो जगार । देवस्य पश्य काव्यं महित्वाऽद्या ममार । स ह्यस्समान । यद्दते चिदभिश्रिषः । पुरा जर्तृभ्य आतृदः । सन्धाता सन्धिं मघवा पुरोवसुः ॥ ०। ४। २०। ५९॥

६० निष्कर्ता विह्रुतं पुनः । पुनरूर्जा सह रय्या । मा नो घर्म व्यथितो विव्यथो नः । मा नः परमधरं मा रजोऽनैः । मोष्वस्माग्स्तमस्यन्तरा धाः । मा रुद्रियासो अभिगुर्वृधा नः । मा नः क्रतुभिर्हीडितेभिरस्मान् । द्विषा सुनीते मा परादाः । मा नो रुद्रो निर्ऋतिर्मा नो अस्ता । मा द्यावापृथिवी हीडिषाताम् ॥ ०। ४। २०। ६०॥

६१ उप नो मित्रावरुणाविहावतम् । अन्वादीध्याथामिह नस्सखाया । आदित्यानां प्रसितिर्हेतिः । उग्रा शतापाष्ठा घ विषा परि णो वृणक्तु । इमं मे वरुण तत्त्वा यामि । त्वं नो अग्ने स त्वं नो अग्ने । त्वमग्ने अयासि । उद्वयं तमसस्परि । उदु त्यं चित्रम् । वयस्सुपर्णाः ॥ ०। ४। २०। ६१॥
पुरोवसुर्हीडिषाताँ सुपर्णाः ॥ २०॥
६२ भूर्भुवस्सुवः । मयि त्यदिन्द्रियं महत् । मयि दक्षो मयि क्रतुः । मयि धायि सुवीर्यम् । त्रिशुग्घर्मो विभातु मे । आकूत्या मनसा सह । विराजा ज्योतिषा सह । यज्ञेन पयसा सह । ब्रह्मणा तेजसा सह । क्षत्रेण यशसा सह । सत्येन तपसा सह । तस्य दोहमशीमहि । तस्य सुम्नमशीमहि । तस्य भक्षमशीमहि । तस्य त इन्द्रेण पीतस्य मधुमतः । उपहूतस्योपहूतो भक्षयामि ॥ ०। ४। २१। ६२॥ यशसा सह षद्व ॥ २१॥
६३ यास्ते अग्ने घोरास्तनुवः । क्षुच्च तृष्णा च । अस्नुक्चानाहुतिश्च । अशनया च पिपासा च । सेदिश्चामतिश्च । एतास्ते अग्ने घोरास्तनुवः । ताभिरमुं गच्छ । योऽस्मान्द्वेष्टि । यं च वयं द्विष्मः ॥ ०। ४। २२। ६३॥ ॥ २२॥
६४ स्निक्क स्नीहितिश्च स्निहितिश्च । उष्णा च शीता च । उग्रा च भीमा च । सदाम्नी सेदिरनिरा । एतास्ते अग्ने घोरास्तनुवः । ताभिरमुं गच्छ । योऽस्मान्द्वेष्टि । यं च वयं द्विष्मः ॥ ०। ४। २३। ६४॥ ॥ २३॥
६५ धुनिश्च ध्वान्तश्च ध्वनश्च ध्वनयग्ग्श्च । निलिम्पश्च विलिम्पश्च विक्षिपः ॥ ०। ४। २४। ६५॥ ॥ २४॥
६६ उग्रश्च धुनिश्च ध्वान्तश्च ध्वनश्च ध्वनयग्ग्श्च । सहसह्वाग्श्च सहमानश्च सहस्वाग्श्च सहीयाग्श्च । एत्य प्रेत्य विक्षिपः ॥ ०। ४। २५। ६६॥ ॥ २५॥
६७ अहोरात्रे त्वोदीरयताम् । अर्धमासास्त्वोदीञ्जयन्तु । मासास्त्वा श्रपयन्तु । ऋतवस्त्वा पचन्तु । संवथ्सरस्त्वा हन्त्वसौ ॥ ०। ४। २६। ६७॥ ॥ २६॥
६८ खट्फड्जहि । छिन्धी भिन्धी हन्धी कट् । इति वाचः क्रूराणि ॥ ०। ४। २७। ६८॥ ॥ २७॥
६९ विगा इन्द्र विचरन्थ्स्पाशयस्व । स्वपन्तमिन्द्र पशुमन्तमिच्छ । वज्रेणामुं बोधय दुर्विदत्रम् । स्वपतोऽस्य प्रहर भोजनेभ्यः । अग्ने अग्निना संवदस्व । मृत्यो मृत्युना संवदस्व । नमस्ते अस्तु भगवः । सकृत्ते अग्ने नमः । द्विस्ते नमः । त्रिस्ते नमः । चतुस्ते

नमः । पञ्चकृत्वस्ते नमः । दशकृत्वस्ते नमः । शतकृत्वस्ते नमः । आसहस्रकृत्वस्ते नमः । अपरिमितकृत्वस्ते नमः । नमस्ते अस्तु मा मा हिँसीः ॥ ०। ४। २८। ६९॥ त्रिस्ते नमस्सप्त च ॥ २८॥

७० असृङ्मुखो रुधिरेणाव्यक्तः । यमस्य दूतः श्वपाद्विधावसि । गृध्रः सुपर्णः कुणपं निषेवसे । यमस्य दूतः प्रहितो भवस्य चोभयोः ॥
०। ४। २९। ७०॥ ॥ २९॥

७१ यदेतद्वृकसो भूत्वा । वाग्देव्यभिरायसि । द्विषन्तं मेऽभिराय । तं मृत्यो मृत्यवे नय । स आर्त्याऽऽर्तिमार्च्छतु ॥ ०। ४। ३०। ७१॥ ॥ ३०॥

७२ यदीषितो यदि वा स्वकामी । भयेडको वदति वाचमेताम् । तामिन्द्राग्नी ब्रह्मणा संविदानौ । शिवामस्मभ्यं कृणुतं गृहेषु ॥ ०। ४। ३१। ७२॥ ॥ ३१॥

७३ दीर्घमुखि दुर्हणु । मा स्म दक्षिणतो वदः । यदि दक्षिणतो वदाद्द्विषन्तं मेऽवबाधासै ॥ ०। ४। ३२। ७३॥ ॥ ३२॥

७४ इत्थादुलूक आपप्तत् । हिरण्याक्षो अयोमुखः । रक्षसां दूत आगतः । तमितो नाशयाग्ने ॥ ०। ४। ३३। ७४॥ ॥ ३३॥

७५ यदेतद्भूतान्यन्वाविश्य । दैवीं वाचं वदसि । द्विषतो नः परावद । तान्मृत्यो मृत्यवे नय । त आर्त्याऽऽर्तिमार्च्छन्तु । अग्निनाऽग्निस्संवदताम् ॥ ०। ४। ३४। ७५॥ ॥ ३४॥

७६ प्रसार्य सक्थ्यौ पतसि । सव्यमक्षि निपेपि च । मेह कस्यचनाममत् ॥ ०। ४। ३५। ७६॥ ॥ ३५॥

७७ अत्रिणा त्वा क्रिमे हन्मि । कण्वेन जमदग्निना । विश्वावसोर्ब्रह्मणा हतः । क्रिमीणाँ राजा । अप्येषाग् स्थपतिर्हतः । अथो माताऽथो पिता । अथो स्थूरा अथो क्षुद्राः । अथो कृष्णा अथो श्वेताः । अथो आशातिका हताः । श्वेताभिस्सह सर्वे हताः ॥ ०। ४। ३६। ७७॥ ॥ ३६॥

७८ आहरावद्य । शृतस्य हविषो यथा । तथ्सत्यम् । यदमुं यमस्य जम्भयोः । आदधामि तथा हि तत् । खण्फण्म्रसि ॥ ०। ४। ३७। ७८॥ ॥ ३७॥

७९ ब्रह्मणा त्वा शपामि । ब्रह्मणस्त्वा शपथेन शपामि । घोरेण त्वा भृगूणां चक्षुषा प्रेक्षे । रौद्रेण त्वाऽङ्गिरसां मनसा ध्यायामि । अघस्य त्वा धारया विध्यामि । अधरो मत्पद्यस्वासौ ॥ ०। ४। ३८। ७९॥ ॥ ३८॥

८० उत्तुद शिमिजावरि । तल्पेजे तल्प उत्तुद । गिरीँरनुप्रवेशय । मरीचीरुप संनुद । यावदितः पुरस्तादुदयाति सूर्यः । तावदितोऽमुं नाशय । योऽस्मान्द्वेष्टि । यं च वयं

द्विष्मः ॥ ०। ४। ३९। ८०॥ ॥ ३९॥
८१ भूर्भुवस्सुवो भूर्भुवस्सुवो भूर्भुवस्सुवः । भुवोऽद्धायि भुवोऽद्धायि भुवोऽद्धायि । नृम्णायि नृम्णं नृम्णायि नृम्णं नृम्णायि नृम्णम् । निधाय्योऽवायि निधाय्योऽवायि निधाय्योऽवायि । ए अस्मे अस्मे । सुवर्नज्योतीः ॥ ०। ४। ४०। ८१॥ ॥ ४०॥
८२ पृथिवी समित् । तामग्निस्समिन्धे । साऽग्निꣳ समिन्धे । तामहꣳ समिन्धे । सा मा समिद्धा । आयुषा तेजसा । वर्चसा श्रिया । यशसा ब्रह्मवर्चसेन । अन्नाद्येन समिन्ताग् स्वाहा । अन्तरिक्षꣳ समित् ॥
०। ४। ४१। ८२॥
८३ तां वायुस्समिन्धे । सा वायुꣳ समिन्धे । तामहꣳ समिन्धे । सा मा समिद्धा । आयुषा तेजसा । वर्चसा श्रिया । यशसा ब्रह्मवर्चसेन । अन्नाद्येन समिन्ताग् स्वाहा । द्यौस्समित् । तामादित्यस्समिन्धे ॥ ०। ४। ४१। ८३॥
८४ साऽऽदित्यꣳ समिन्धे । तामहꣳ समिन्धे । सा मा समिद्धा । आयुषा तेजसा । वर्चसा श्रिया । यशसा ब्रह्मवर्चसेन । अन्नाद्येन समिन्ताग् स्वाहा । प्राजापत्या मे समिदसि सपत्नक्षयणी । भ्रातृव्यहा मेऽसि स्वाहा । अग्ने व्रतपते व्रतं चरिष्यामि ॥ ०। ४। ४१। ८४॥
८५ तच्छकेयं तन्मे राध्यताम् । वायो व्रतपत आदित्य व्रतपते । व्रतानां व्रतपते व्रतं चरिष्यामि । तच्छकेयं तन्मे राध्यताम् । द्यौस्समित् । तामादित्यस्समिन्धे । साऽऽदित्यꣳ समिन्धे । तामहꣳ समिन्धे । सा मा समिद्धा । आयुषा तेजसा ॥ ०। ४। ४१। ८५॥
८६ वर्चसा श्रिया । यशसा ब्रह्मवर्चसेन । अन्नाद्येन समिन्ताग् स्वाहा । अन्तरिक्षꣳ समित् । तां वायुस्समिन्धे । सा वायुꣳ समिन्धे । तामहꣳ समिन्धे । सा मा समिद्धा । आयुषा तेजसा । वर्चसा श्रिया ॥ ०। ४। ४१। ८६॥
८७ यशसा ब्रह्मवर्चसेन । अन्नाद्येन समिन्ताग् स्वाहा । पृथिवी समित् । तामग्निस्समिन्धे । साऽग्निꣳ समिन्धे । तामहꣳ समिन्धे । सा मा समिद्धा । आयुषा तेजसा । वर्चसा श्रिया । यशसा ब्रह्मवर्चसेन ॥ ०। ४। ४१। ८७॥
८८ अन्नाद्येन समिन्ताग् स्वाहा । प्राजापत्या मे समिदसि सपत्नक्षयणी । भ्रातृव्यहा मेऽसि स्वाहा । आदित्य व्रतपते व्रतमचारिषम् । तदशकं तन्मेऽराधि । वायो व्रतपतेऽग्ने व्रतपते । व्रतानां व्रतपते व्रतमचारिषम् । तदशकं तन्मेऽराधि ॥ ०। ४। ४१। ८८॥

समिथ्समिन्धे व्रतं चरिष्याम्यायुषा तेजसा वर्चसा श्रिया यशसा ब्रह्मवर्चसेनाष्टौ च ॥
॥ ४१॥
८९ शं नो वातः पवतां मातरिश्वा शं नस्तपतु सूर्यः । अहानि शं भवन्तु नः शꣳ
रात्रिः प्रति धीयताम् । शमुषा नो व्युच्छतु शमादित्य उदेतु नः । शिवा नः शन्तमा
भव सुमृडीका सरस्वति । मा ते व्योम संदृशि । इडायै वास्त्वसि वास्तुमद्वास्तुमन्तो
भूयास्म मा वास्तोश्छिथ्स्मह्यवास्तुः स भूयाद्योऽस्मान्द्वेष्टि यं च वयं द्विष्मः । प्रतिष्ठाऽसि
प्रतिष्ठावन्तो भूयास्म मा प्रतिष्ठायाश्छिथ्स्मह्यप्रतिष्ठः स भूयाद्योऽस्मान्द्वेष्टि यं च वयं
द्विष्मः । आ वात वाहि भेषजं वि वात वाहि यद्रपः । त्वꣳ हि विश्वभेषजो देवानां दूत
ईयसे । द्वाविमौ वातौ वात आसिन्धोरापरावतः ॥ ०। ४। ४२। ८९॥
९० दक्षं मे अन्य आवातु पराऽन्यो वातु यद्रपः । यददो वात ते गृहेऽमृतस्य निधिर्हितः
। ततो नो देहि जीवसे ततो नो धेहि भेषजम् । ततो नो मह आवह वात आवातु
भेषजम् । शं भूर्मयोभूर्नो हृदे प्र ण आयूꣳषि तारिषत् । इन्द्रस्य गृहोऽसि तं त्वा प्रपद्ये
सगुस्साश्वः । सह यन्मे अस्ति तेन । भूः प्रपद्ये भुवः प्रपद्ये सुवः प्रपद्ये भूर्भुवस्सुवः
प्रपद्ये वायुं प्रपद्येऽनार्तां देवतां प्रपद्येऽश्मानमाखणं प्रपद्ये प्रजापतेर्ब्रह्मकोशं ब्रह्म प्रपद्य
ओं प्रपद्ये । अन्तरिक्षं म उर्वन्तरं बृहदग्नयः पर्वताश्च यया वातस्स्वस्त्या स्वस्ति मां
तया स्वस्त्या स्वस्ति मानसानि । प्राणापानौ मृत्योर्मा पातं प्राणापानौ मा मा हासिष्टं
मयि मेधां मयि प्रजां मय्यग्निस्तेजो दधातु मयि मेधां मयि प्रजां मयीन्द्र इन्द्रियं
दधातु मयि मेधां मयि प्रजां मयि सूर्यो भ्राजो दधातु ॥ ०। ४। ४२। ९०॥
९१ द्युभिरक्तुभिः परिपातमस्मानरिष्टेभिरश्विना सौभगेभिः । तन्नो मित्रो वरुणो
मामहन्तामदितिस्सिन्धुः पृथिवी उत द्यौः । कया नश्चित्र आभुवदूती सदावृधस्सखा ।
कया शचिष्ठया वृता । कस्त्वा सत्यो मदानां मꣳहिष्ठो मथ्सदन्धसः । दृढा चिदारुजे वसु
। अभी षु णः सखीनामविता जरितृणाम् । शतं भवास्यूतिभिः । वयः सुपर्णा उपसेदुरिन्द्रं
प्रियमेधा ऋषयो नाधमानाः । अप ध्वान्तमूर्णुहि पूर्धि चक्षुर्मुमुग्ध्यस्मान्निधयेव बद्धान् ॥
०। ४। ४२। ९१॥
९२ शं नो देवीरभिष्टय आपो भवन्तु पीतये । शं योरभिस्रवन्तु नः । ईशाना
वार्याणां क्षयन्तीश्चर्षणीनाम् । अपो याचामि भेषजम् । सुमित्रा न आप ओषधयस्सन्तु
दुर्मित्रास्तस्मै भूयासुर्योऽस्मान्द्वेष्टि यं च वयं द्विष्मः । आपो हि ष्ठा मयोभुवस्ता न
ऊर्जे दधातन । महे रणाय चक्षसे । यो वः शिवतमो रसस्तस्य भाजयतेह नः ।

उशतीरिव मातरः । तस्मा अरं गमाम वो यस्य क्षयाय जिन्वथ ॥
०। ४। ४२। ९२॥
९३ आपो जनयथा च नः । पृथिवी शान्ता साऽग्निना शान्ता सा मे शान्ता शुचꣳ शमयतु । अन्तरिक्षꣳ शान्तं तद्वायुना शान्तं तन्मे शान्तꣳ शुचꣳशमयतु । द्यौः शान्ता साऽऽदित्येन शान्ता सा मे शान्ता शुचꣳशमयतु । पृथिवी शान्तिरन्तरिक्षꣳ शान्तिर्द्यौः शान्तिर्दिशः शान्तिरवान्तरदिशाः शान्तिरग्निः शान्तिर्वायुः शान्तिरादित्यः शान्तिश्चन्द्रमाः शान्तिर्नक्षत्राणि शान्तिरापः शान्तिरोषधयः शान्तिर्वनस्पतयः शान्तिर्गौः शान्तिरजा शान्तिरश्वः शान्तिः पुरुषः शान्तिर्ब्रह्म शान्तिर्ब्राह्मणः शान्तिः शान्तिरेव शान्तिः शान्तिर्मे अस्तु शान्तिः । तयाहꣳ शान्त्या सर्वशान्त्या मह्यं द्विपदे चतुष्पदे च शान्तिं करोमि शान्तिर्मे अस्तु शान्तिः । एह श्रीश्च ह्रीश्च धृतिश्च तपो मेधा प्रतिष्ठा श्रद्धा सत्यं धर्मश्चैतानि मोत्तिष्ठन्तमनूत्तिष्ठन्तु मा माग् श्रीश्च ह्रीश्च धृतिश्च तपो मेधा प्रतिष्ठा श्रद्धा सत्यं धर्मश्चैतानि मा मा हासिषुः । उदायुषा स्वायुषोदोषधीनाꣳ रसेनोत्पर्जन्यस्य शुष्मेणोदस्थाममृताꣳ अनु । तच्चक्षुर्देवहितं पुरस्ताच्छुक्रमुच्चरत् । पश्येम शरदः शतं जीवेम शरदः शतं नन्दाम शरदः शतं मोदाम शरदः शतं भवाम शरदः शतꣳ शृणवाम शरदः शतं प्रब्रवाम शरदः शतमजीतास्स्याम शरदः शतं ज्योक्च सूर्यं दृशे ॥
०। ४। ४२। ९३॥ य उदगान्महतोऽर्णवाद्विभ्राजमानस्सरिरस्य मध्यात्स मा वृषभो लोहिताक्षस्सूर्यो विपश्चिन्मनसा पुनातु । ब्रह्मणः श्चोतन्यसि ब्रह्मण आणी स्थो ब्रह्मण आवपनमसि धारितेयं पृथिवी ब्रह्मणा मही धारितमेनेन महदन्तरिक्षं दिवं दाधार पृथिवीꣳ सदेवां यदहं वेद तदहं धारयाणि मा मद्वेदोऽधि विस्रसत् । मेधामनीषे माऽऽविशताꣳ समीची भूतस्य भव्यस्यावरुद्ध्यै सर्वमायुरयाणि सर्वमायुरयाणि । आभिर्गीर्भिर्यदतो न ऊनमाप्यायय हरिवो वर्धमानः । यदा स्तोतृभ्यो महि गोत्रा रुजासि भूयिष्ठभाजो अध ते स्याम । ब्रह्म प्रावादिष्म तन्नो मा हासीत् । ओं शान्तिः शान्तिः शान्तिः ॥ ९४॥ परावतो दधातु बद्धाञ्जिन्वथ दृशे सप्त च ॥ ४२॥
नमो युञ्जते वृष्णो अश्वस्य ब्रह्मन्प्रवर्ग्येण ब्रह्मन्प्रचरिष्यामो दश प्राचीरपश्यं गोपां देवस्य समुद्रायेषे पीपिहि घर्म या ते महीनां चत्वार्यस्कान्, या पुरस्तात्सप्त सप्त प्राणाय त्रीणि पूष्णे चत्वार्युदस्यैकादश यास्ते सप्ताग्निर्ध्रुवः सीदैकान्न विꣳशतिर्भूरूर्ध्वस्त्रिꣳ शद्धूर्मयि षोडश यास्ते घोरा नव स्त्रिक्काष्टौ धुनिश्च द्वे उग्रश्च त्रीण्यहोरात्रे पञ्च खद्गीणि विगास्सप्तदशासृन्मुखश्चत्वारि यदेतद्वृकसः पञ्च यदीषितश्चत्वारि दीर्घमुखि

त्रीणीत्थाच्चत्वारि यदेतद्भूतानि षद्ब्रसार्य त्रीन्यत्रिणा दशाहरावद्य ब्रह्मणा षद्व् षड्डुत्तुदाष्टौ भूष्षद्वृथिव्यष्टषष्टिः शं नस्सप्तपञ्चाशद्विचत्वारिꣳ शत् ॥ ४२॥

नमो वाचे ब्रह्मन्प्रवर्ग्येण मयि रुगन्तरिक्षेण घर्म या ते दिवि शुगस्कान्द्यौः पृथिवीमुपनो मित्रा वरुणा यदेतद्वृकसो भूर्भुवस्सुवर्द्युभिस्त्रिनवतिः ॥ ९२॥

० नमोऽनु मदन्तु । ओं शान्तिः शान्तिः शान्तिः ॥

## आरण्यके पञ्चमः प्रश्नः ५

० शं नस्तन्नो मा हासीत् । ओं शान्तिः शान्तिः शान्तिः ॥

१ देवा वै सत्रमासत । ऋद्धिपरिमितं यशस्कामाः । तेऽब्रुवन् । यन्नः प्रथमं यश ऋच्छात् । सर्वेषां नस्तथ्सहासदिति । तेषां कुरुक्षेत्रं वेदिरासीत् । तस्यै खाण्डवो दक्षिणार्ध आसीत् । तूर्घ्नमुत्तरार्धः । परीणज्जघनार्धः । मरव उत्करः ॥ ०। ५। १। १॥

२ तेषां मखं वैष्णवं यश आर्च्छत् । तन्न्यकामयत । तेनापाक्रामत् । तं देवा अन्वायन् । यशोऽवरुरुथ्समानाः । तस्यान्वागतस्य । सव्याद्धनुरजायत । दक्षिणादिषवः । तस्मादिषुधन्वं पुण्यजन्म । यज्ञजन्मा हि ॥ ०। ५। १। २॥

३ तमेकꣳ सन्तम् । बहवो नाभ्यधृष्णुवन् । तस्मादेकमिषुधन्विनम् । बहवोऽनिषुधन्वा नाभिधृष्णुवन्ति । सोऽस्मयत । एकं मा सन्तं बहवो नाभ्यधर्षिषुरिति । तस्य सिष्मियाणस्य तेजोऽपाक्रामत् । तद्देवा ओषधीषु न्यमृजुः । ते श्यामाका अभवन् । स्मयाका वै नामैते ॥ ०। ५। १। ३॥

४ तथ्स्मयाकानाग् स्मयाकत्वम् । तस्माद्दीक्षितेनापि गृह्य स्मेतव्यम् । तेजसो धृत्यै । स धनुः प्रतिष्कभ्यातिष्ठत् । ता उपदीका अब्रुवन्वरं वृणामहै । अथ व इमꣳ रन्धयाम । यत्र क्व च खनाम । तदपोऽभितृणदामेति । तस्मादुपदीका यत्र क्व च खनन्ति । तदपोऽभितृन्दन्ति ॥ ०। ५। १। ४॥

५ वारे वृतग्ग् ह्यासाम् । तस्य ज्यामप्याऽदन् । तस्य धनुर्विप्रवमाणꣳ शिर उदवर्तयत् । तद्द्यावापृथिवी अनुप्रावर्तत । यत्प्रावर्तत । तत्प्रवर्ग्यस्य प्रवर्ग्यत्वम् । यद्घ्रा ४म् इत्यपतत् । तद्घर्मस्य घर्मत्वम् । महतो वीर्यमपप्तदिति । तन्महावीरस्य महावीरत्वम् ॥ ०। ५। १। ५॥

६ यदस्याः समभरन् । तथ्सम्राज्ञः सम्राड्त्वम् । त२ꣳ स्तृतं देवतास्त्रेधा व्यगृह्णत । अग्निः प्रातस्सवनम् । इन्द्रो माध्यन्दिनꣳ सवनम् । विश्वे देवास्तृतीयसवनम् ।

तेनापशिर्ष्णा यज्ञेन यजमानाः । नाशिषोऽवारुन्धत । न सुवर्गं लोकमभ्यजयन्न् । ते देवा अश्विनावब्रुवन्न् ॥ ०। ५। १। ६॥
७ भिषजौ वै स्थः । इदं यज्ञस्य शिरः प्रतिधत्तमिति । तावब्रूतां वरं वृणावहै । ग्रह एव नावत्रापि गृह्यतामिति । ताभ्यामेतमाश्विनमगृह्णन्न् । तावेतद्यज्ञस्य शिरः प्रत्यधत्ताम् । यत्प्रवर्ग्यः । तेन सशीर्ष्णा यज्ञेन यजमानाः । अवाशिषोऽरुन्धत । अभि सुवर्गं लोकमजयन्न् । यत्प्रवर्ग्यं प्रवृणक्ति । यज्ञस्यैव तच्छिरः प्रतिदधाति । तेन सशीर्ष्णा यज्ञेन यजमानः । अवाशिषो रुन्धे । अभि सुवर्गं लोकं जयति । तस्मादेष आश्विन प्रवया इव । यत्प्रवर्ग्यः ॥ ०। ५। १। ७॥ उत्करो ह्येते तृन्दन्ति महावीरत्वमब्रुवन्नजयन्थ्सप्त च ॥ १॥
८ सावित्रं जुहोति प्रसूत्यै । चतुर्गृहीतेन जुहोति । चतुष्पादः पशवः । पशूनेवावरुन्धे । चतस्रो दिशः । दिक्ष्वेव प्रतितिष्ठति । छन्दाꣳसि देवेभ्योऽपाक्रामन्न् । न वो भागानि हव्यं वक्ष्याम इति । तेभ्य एतच्चतुर्गृहीतमधारयन्न् । पुरोनुवाक्यायै याज्यायै ॥ ०। ५। २। ८॥
९ देवतायै वषट्काराय । यच्चतुर्गृहीतं जुहोति । छन्दाग्स्येव तत्प्रीणाति । तान्यस्य प्रीतानि देवेभ्यो हव्यं वहन्ति । ब्रह्मवादिनो वदन्ति । होतव्यं दीक्षितस्य गृहा ३ इ न होतव्या ३ मिति । हविर्वै दीक्षितः । यज्जुहुयात् । हविष्कृतं यजमानमग्नौ प्रदध्यात् । यन्न जुहुयात् ॥ ०। ५। २। ९॥
१० यज्ञपरुरन्तरियात् । यजुरेव वदेत् । न हविष्कृतं यजमानमग्नौ प्रदधाति । न यज्ञपरुरन्तरेति । गायत्री छन्दाग्स्यत्यमन्यत । तस्यै वषट्कारोऽभ्यय्य शिरोऽच्छिनत् । तस्यै द्वेधा रसः परापतत् । पृथिवीमर्धः प्राविशत् । पशूनर्धः । यः पृथिवीं प्राविशत् ॥ ०। ५। २। १०॥
११ स खदिरोऽभवत् । यः पशून् । सोऽजाम् । यत्खादिर्यभ्रिर्भवति । छन्दसामेव रसेन यज्ञस्य शिरस्सम्भरति । यदौदुम्बरी । ऊर्ग्वा उदुम्बरः । ऊर्जैव यज्ञस्य शिरस्सम्भरति । यद्वैणवी । तेजो वै वेणुः ॥ ०। ५। २। ११॥
१२ तेजसैव यज्ञस्य शिरस्सम्भरति । यद्वैकङ्कती । भा एवावरुन्धे । देवस्य त्वा सवितुः प्रसव इत्यभ्रिमादत्ते प्रसूत्यै । अश्विनोर्बाहुभ्यामित्याह । अश्विनौ हि देवानामध्वर्यू आस्ताम् । पूष्णो हस्ताभ्यामित्याह यत्यै । वज्र इव वा एषा । यदभ्रिः । अभ्रिरसि नारिरसीत्याह शान्त्यै ॥ ०। ५। २। १२॥

१३ अध्वरकृद्देवेभ्य इत्याह । यज्ञो वा अध्वरः । यज्ञकृद्देवेभ्य इति वावैतदाह । उत्तिष्ठ ब्रह्मणस्पत इत्याह । ब्रह्मणैव यज्ञस्य शिरोऽच्छैति । प्रैतु ब्रह्मणस्पतिरित्याह । प्रेत्यैव यज्ञस्य शिरोऽच्छैति । प्रदेव्येतु सूनृतेत्याह । यज्ञो वै सूनृता । अच्छा वीरं नर्यं पङ्क्तिराधसमित्याह ॥ ०। ५। २। १३॥
१४ पाङ्क्तो हि यज्ञः । देवा यज्ञं नयन्तु न इत्याह । देवानेव यज्ञनियः कुरुते । देवी द्यावापृथिवी अनु मेऽमꣳसाथामित्याह । आभ्यामेवानुमतो यज्ञस्य शिरस्सम्भरति । ऋध्यासमद्य मखस्य शिर इत्याह । यज्ञो वै मखः । ऋध्यासमद्य यज्ञस्य शिर इति वावैतदाह । मखाय त्वा मखस्य त्वा शीर्ष्ण इत्याह । निर्दिश्यैवैनद्धरति ॥ ०। ५। २। १४॥
१५ त्रिर्हरति । त्रय इमे लोकाः । एभ्य एव लोकेभ्यो यज्ञस्य शिरस्सम्भरति । तूष्णीं चतुर्थꣳ हरति । अपरिमितादेव यज्ञस्य शिरस्सम्भरति । मृत्खनादग्रे हरति । तस्मान्मृत्खनः करुण्यतमः । इयत्यग्र आसीरित्याह । अस्यामेवाछम्बट्कारं यज्ञस्य शिरस्सम्भरति । ऊर्जं वा एतꣳ रसं पृथिव्या उपदीका उद्दिहन्ति ॥ ०। ५। २। १५॥
१६ यद्वल्मीकम् । यद्वल्मीकवपा सम्भारो भवति । ऊर्जमेव रसं पृथिव्या अवरुन्धे । अथो श्रोत्रमेव । श्रोत्रग्ग् ह्येतत्पृथिव्याः । यद्वल्मीकः । अबधिरो भवति । य एवं वेद । इन्द्रो वृत्राय वज्रमुदयच्छत् । स यत्र यत्र पराक्रमत ॥ ०। ५। २। १६॥
१७ तन्नाध्रियत । स पूतीकस्तम्बे पराक्रमत । सोऽध्रियत । सोऽब्रवीत् । ऊतिं वै मे धा इति । तदूतीकानामूतीकत्वम् । यदूतीका भवन्ति । यज्ञायैवोतिं दधति । अग्निजा असि प्रजापते रेत इत्याह । य एव रसः पशून्प्राविशत् ॥ ०। ५। २। १७॥
१८ तमेवावरुन्धे । पञ्चैते सम्भारा भवन्ति । पाङ्क्तो यज्ञः । यावानेव यज्ञः । तस्य शिरस्सम्भरति । यद्ग्राम्याणां पशूनां चर्मणा सम्भरेत् । ग्राम्यान्पशूञ्छुचाऽर्पयेत् । कृष्णाजिनेन सम्भरति । आरण्यानेव पशूञ्छुचाऽर्पयति । तस्माथ्समावत्पशूनां प्रजायमानानाम् ॥ ०। ५। २। १८॥
१९ आरण्याः पशवः कनीयाꣳसः । शुचा ह्यृताः । लोमतस्सम्भरति । अतो ह्यस्य मेध्यम् । परिगृह्यायन्ति । रक्षसामपहत्यै । बहवो हरन्ति । अपचितिमेवास्मिन्दधति । उद्धते सिकतोपोप्ते परिश्रिते निदधति शान्त्यै । मदन्तीभिरुपसृजति ॥ ०। ५। २। १९॥
२० तेज एवास्मिन्दधाति । मधु त्वा मधुला करोत्वित्याह । ब्रह्मणैवास्मिन्तेजो

दधाति । यद्ग्राम्याणां पात्राणां कपालैः स२ꣳसृजेत् । ग्राम्याणि पात्राणि शुचाऽर्पयेत् । अर्मकपालैः स२ꣳसृजति । एतानि वा अनुपजीवनीयानि । तान्येव शुचाऽर्पयति । शर्कराभिस्स२ꣳसृजति धृत्यै । अथो शन्त्वाय । अजलोमैस्स२ꣳसृजति । एषा वा अग्नेः प्रिया तनूः । यदजा । प्रिययैवैनं तनुवा स२ꣳसृजति । अथो तेजसा । कृष्णाजिनस्य लोमभिस्स२ꣳसृजति । यज्ञो वै कृष्णाजिनम् । यज्ञेनैव यज्ञ२ꣳ स२ꣳसृजति ॥ ०। ५। २। २०॥ याज्यायै न जुहुयादविशद्वेणुः शान्त्यै पङ्क्तिराधसमित्याह हरति दिहन्ति पराक्रमताविशत्प्रजायमानाना२ꣳ सृजति शन्त्वायाष्टौ च ॥ २॥

२१ परिश्रिते करोति । ब्रह्मवर्चसस्य परिगृहीत्यै । न कुर्वन्नभिप्राण्यात् । यत्कुर्वन्नभिप्राण्यात् । प्राणाञ्छुचाऽर्पयेत् । अपहाय प्राणिति । प्राणानां गोपीथाय । न प्रवर्ग्यं चादित्यं चान्तरेयात् । यदन्तरेयात् । दुश्चर्मा स्यात् ॥ ०। ५। ३। २१॥

२२ तस्मान्नान्तराय्यम् । आत्मनो गोपीथाय । वेणुना करोति । तेजो वै वेणुः । तेजः प्रवर्ग्यः । तेजसैव तेजस्समर्धयति । मखस्य शिरोऽसीत्याह । यज्ञो वै मखः । तस्यैतच्छिरः । यत्प्रवर्ग्यः ॥ ०। ५। ३। २२॥

२३ तस्मादेवमाह । यज्ञस्य पदे स्थ इत्याह । यज्ञस्य ह्येते पदे । अथो प्रतिष्ठित्यै । गायत्रेण त्वा छन्दसा करोमीत्याह । छन्दोभिरेवैनं करोति । त्र्युद्धिं करोति । त्रय इमे लोकाः । एषां लोकानामाप्त्यै । छन्दोभिः करोति ॥ ०। ५। ३। २३॥

२४ वीर्यं वै छन्दा२ꣳसि । वीर्येणैवैनं करोति । यजुषा बिलं करोति व्यावृत्त्यै । इयन्तं करोति । प्रजापतिना यज्ञमुखेन संमितम् । इयन्तं करोति । यज्ञपरुषा संमितम् । इयन्तं करोति । एतावद्वै पुरुषे वीर्यम् । वीर्यसंमितम् ॥ ०। ५। ३। २४॥

२५ अपरिमितं करोति । अपरिमितस्यावरुद्ध्यै । परिग्रीवं करोति धृत्यै । सूर्यस्य हरसा श्रायेत्याह । यथा यजुरेवैतत् । अश्वशकेन धूपयति । प्राजापत्यो वा अश्वस्सयोनित्वाय । वृष्णो अश्वस्य निष्पदसीत्याह । असौ वा आदित्यो वृषाश्वः । तस्य छन्दा२ꣳसि निष्पत् ॥ ०। ५। ३। २५॥

२६ छन्दोभिरेवैनं धूपयति । अर्चिषे त्वा शोचिषे त्वेत्याह । तेज एवास्मिन्दधाति । वारुणोऽभीद्धः । मैत्रियोपैति शान्त्यै । सिद्ध्यै त्वेत्याह । यथा यजुरेवैतत् । देवस्त्वा सवितोद्वपत्वित्याह । सवितृप्रसूत एवैनं ब्रह्मणा देवताभिरुद्वपति । अपद्यमानः पृथिव्यामाशा दिश आपृणेत्याह ॥ ०। ५। ३। २६॥

२७ तस्मादग्निस्सर्वा दिशोऽनुविभाति । उत्तिष्ठ बृहन्भवोर्ध्वस्तिष्ठ ध्रुवस्त्वमित्याह

प्रतिष्ठित्यै । ईश्वरो वा एषोऽन्धो भवितोः । यः प्रवर्ग्यमन्वीक्षते । सूर्यस्य त्वा चक्षुषाऽन्वीक्ष इत्याह । चक्षुषो गोपीथाय । ऋजवे त्वा साधवे त्वा सुक्षित्यै त्वा भूत्यै त्वेत्याह । इयं वा ऋजुः । अन्तरिक्षꣳ साधु । असौ सुक्षितिः ॥ ०। ५। ३। २७॥

२८ दिशो भूतिः । इमानेवास्मै लोकान्कल्पयति । अथो प्रतिष्ठित्यै । इदमहममुमामुष्यायणं विशा पशुभिर्ब्रह्मवर्चसेन पर्यूहामीत्याह । विशैवैनं पशुभिर्ब्रह्मवर्चसेन पर्यूहति । विशेति राजन्यस्य ब्रूयात् । विशैवैनं पर्यूहति । पशुभिरिति वैश्यस्य । पशुभिरेवैनं पर्यूहति । असुर्यं पात्रमनाच्छृण्णम् ॥ ०। ५। ३। २८॥

२९ आच्छृणत्ति । देवत्राऽकः । अजक्षीरेणाच्छृणत्ति । परमं वा एतत्पयः । यदजक्षीरम् । परमेणैवैनं पयसाऽऽच्छृणत्ति । यजुषा व्यावृत्त्यै । छन्दोभिराच्छृणत्ति । छन्दोभिर्वा एष क्रियते । छन्दोभिरेव छन्दाग्स्याच्छृणत्ति । छृन्धि वाचमित्याह । वाचमेवावरुन्धे । छृन्ध्यूर्जमित्याह । ऊर्जमेवावरुन्धे । छृन्धि हविरित्याह । हविरेवाकः । देव पुरश्चर सघ्यासं त्वेत्याह । यथा यजुरेवैतत् ॥ ०। ५। ३। २९॥ स्याद्यत्प्रवर्ग्यश्छन्दोभिः करोति वीर्यसंमितं छन्दाꣳसि निष्पत्पृणेत्याह सुक्षितिरनाच्छृण्णं छन्दाग्स्याच्छृणत्त्यष्टौ च ॥ ३॥

३० ब्रह्मन्प्रचरिष्यामो होतर्घर्ममभिष्टुहीत्याह । एष वा एतर्हि बृहस्पतिः । यद्ब्रह्मा । तस्मा एव प्रतिप्रोच्य प्रचरति । आत्मनोऽनार्त्यै । यमाय त्वा मखाय त्वेत्याह । एता वा एतस्य देवताः । ताभिरेवैनꣳ समर्धयति । मदन्तीभिः प्रोक्षति । तेज एवास्मिन्दधाति ॥ ०। ५। ४। ३०॥

३१ अभिपूर्वं प्रोक्षति । अभिपूर्वमेवास्मिन्तेजो दधाति । त्रिः प्रोक्षति । त्र्यावृद्धि यज्ञः । अथो मेध्यत्वाय । होताऽन्वाह । रक्षसामपहत्यै । अनवानम् । प्राणानाꣳ सन्तत्यै । त्रिष्टुभस्सतीर्गायत्रीरिवान्वाह ॥ ०। ५। ४। ३१॥

३२ गायत्रो हि प्राणः । प्राणमेव यजमाने दधाति । सन्ततमन्वाह । प्राणानामन्नाद्यस्य सन्तत्यै । अथो रक्षसामपहत्यै । यत्परिमिता अनुब्रूयात् । परिमितमवरुन्धीत । अपरिमिता अन्वाह । अपरिमितस्यावरुद्ध्यै । शिरो वा एतद्यज्ञस्य ॥ ०। ५। ४। ३२॥

३३ यत्प्रवर्ग्यः । ऊर्ङ्मुञ्जाः । यन्मौञ्जो वेदो भवति । ऊर्जैव यज्ञस्य शिरस्समर्धयति । प्राणाहुतीर्जुहोति । प्राणानेव यजमाने दधाति । सप्त जुहोति । सप्त वै शीर्षण्याः प्राणाः । प्राणानेवास्मिन्दधाति । देवस्त्वा सविता मध्वाऽनक्त्वित्याह ॥ ०। ५। ४। ३३॥

३४ तेजसैवैनमनक्ति । पृथिवीं तपसस्त्रायस्वेति हिरण्यमुपास्यति । अस्या अनतिदाहाय । शिरो वा एतद्यज्ञस्य । यत्प्रवर्ग्यः । अग्निस्सर्वा देवताः । प्रलवानादीप्योपास्यति । देवतास्वेव यज्ञस्य शिरः प्रतिदधाति । अप्रतिशीर्णाग्रं भवति । एतद्वर्हिर्ह्येषः ॥ ०। ५। ४। ३४॥
३५ अर्चिरसि शोचिरसीत्याह । तेज एवास्मिन्ब्रह्मवर्चसं दधाति । सꣳसीदस्व महाꣳ असीत्याह । महान् ह्येषः । ब्रह्मवादिनो वदन्ति । एते वाव त ऋत्विजः । ये दर्शपूर्णमासयोः । अथ कथा होता यजमानायाशिषो नाऽऽशास्त इति । पुरस्तादाशीः खलु वा अन्यो यज्ञः । उपरिष्टादाशीरन्यः ॥ ०। ५। ४। ३५॥
३६ अनाधृष्या पुरस्तादिति यदेतानि यजूꣳष्याह । शीर्षत एव यज्ञस्य यजमान आशिषोऽवरुन्धे । आयुः पुरस्तादाह । प्रजां दक्षिणतः । प्राणं पश्चात् । श्रोत्रमुत्तरतः । विधृतिमुपरिष्टात् । प्राणानेवास्मै समीचो दधाति । ईश्वरो वा एष दिशोऽनून्मदितोः । यं दिशोऽनु व्यास्थापयन्ति ॥ ०। ५। ४। ३६॥
३७ मनोरश्वाऽसि भूरिपुत्रेतीमामभिमृशति । इयं वै मनोरश्वा भूरिपुत्रा । अस्यामेव प्रतितिष्ठत्यनुन्मादाय । सूपसदा मे भूया मा मा हिꣳसीरित्याहाहिꣳसायै । चितस्स्थ परिचित इत्याह । अपचितिमेवास्मिन्दधाति । शिरो वा एतद्यज्ञस्य । यत्प्रवर्ग्यः । असौ खलु वा आदित्यः प्रवर्ग्यः । तस्य मरुतो रश्मयः ॥ ०। ५। ४। ३७॥
३८ स्वाहा मरुद्भिः परिश्रयस्वेत्याह । अमुमेवादित्यꣳ रश्मिभिः पर्यूहति । तस्मादसावादित्योऽमुष्मिꣳꣳल्लोके रश्मिभिः पर्यूढः । तस्माद्राजा विशा पर्यूढः । तस्माद्ब्रामणीः संजातैः पर्यूढः । अग्नेः सृष्टस्य यतः । विकङ्कतं भा आर्च्छत् । यद्वैकङ्कताः परिधयो भवन्ति । भा एवावरुन्धे । द्वादश भवन्ति ॥ ०। ५। ४। ३८॥
३९ द्वादश मासाः संवथ्सरः । संवथ्सरमेवावरुन्धे । अस्ति त्रयोदशो मास इत्याहुः । यत्त्रयोदशः परिधिर्भवति । तेनैव त्रयोदशं माससमवरुन्धे । अन्तरिक्षस्यान्तर्धिरसीत्याह व्यावृत्त्यै । दिवं तपसस्त्रायस्वेत्युपरिष्टाद्धिरण्यमधि निदधाति । अमुष्या अनतिदाहाय । अथो आभ्यामेवैनमुभयतः परिगृह्णाति । अर्हन्बिभर्षि सायकानि धन्वेत्याह ॥ ०। ५। ४। ३९॥
४० स्तौत्येवैनमेतत् । गायत्रमसि त्रैष्टुभमसि जागतमसीति धवित्राण्यादत्ते । छन्दोभिरेवैनान्यादत्ते । मधु मध्विति धूनोति । प्राणो वै मधु । प्राणमेव यजमाने दधाति । त्रिः परियन्ति । त्रिवृद्धि प्राणः । त्रिः परियन्ति । त्र्यावृद्धि यज्ञः ॥ ०। ५।

४। ४०॥
४१ अथो रक्षसामपहत्यै । त्रिः पुनः परियन्ति । षड्ढ् संपद्यन्ते । षड्वा ऋतवः । ऋतुष्वेव प्रतितिष्ठन्ति । यो वै घर्मस्य प्रियां तनुवमाक्रामति । दुश्चर्मा वै स भवति । एष ह वा अस्य प्रियां तनुवमाक्रामति । यस्त्रिः परीत्य चतुर्थं पर्येति । एताꣳ ह वा अस्योग्रदेवो राजनिराचक्राम ॥ ०। ५। ४। ४१॥
४२ ततो वै स दुश्चर्माऽभवत् । तस्मात्त्रिः परीत्य न चतुर्थं परीयात् । आत्मनो गोपीथाय । प्राणा वै धवित्राणि । अव्यतिषङ्गं धून्वन्ति । प्राणानामव्यतिषङ्गाय क्लृप्त्यै । विनिषद्य धून्वन्ति । दिक्ष्वेव प्रतितिष्ठन्ति । ऊर्ध्वं धून्वन्ति । सुवर्गस्य लोकस्य समष्ट्यै । सर्वतो धून्वन्ति । तस्मादयꣳ सर्वतः पवते ॥ ०। ५। ४। ४२॥
दधातीवान्वाह यज्ञस्याहैष उपरिष्टादाशीरन्यो व्यास्थापयन्ति रश्मयो भवन्ति धन्वेत्याह यज्ञश्चक्राम समष्ट्यै द्वे च ॥ ४॥
४३ अग्निष्ट्वा वसुभिः पुरस्ताद्रोचयतु गायत्रेण छन्दसेत्याह । अग्निरेवैनं वसुभिः पुरस्ताद्रोचयति गायत्रेण छन्दसा । स मा रुचितो रोचयेत्याह । आशिषमेवैतामाशास्ते । इन्द्रस्त्वा रुद्रैर्दक्षिणतो रोचयतु त्रैष्टुभेन छन्दसेत्याह । इन्द्र एवैनꣳ रुद्रैर्दक्षिणतो रोचयति त्रैष्टुभेन छन्दसा । स मा रुचितो रोचयेत्याह । आशिषमेवैतामाशास्ते । वरुणस्त्वाऽऽदित्यैः पश्चाद्रोचयतु जागतेन छन्दसेत्याह । वरुण एवैनमादित्यैः पश्चाद्रोचयति जागतेन छन्दसा ॥ ०। ५। ५। ४३॥
४४ स मा रुचितो रोचयेत्याह । आशिषमेवैतामाशास्ते । द्युतानस्त्वा मारुतो मरुद्भिरुत्तरतो रोचयत्वानुष्टुभेन छन्दसेत्याह । द्युतान एवैनं मारुतो मरुद्भिरुत्तरतो रोचयत्यानुष्टुभेन छन्दसा । स मा रुचितो रोचयेत्याह । आशिषमेवैतामाशास्ते । बृहस्पतिस्त्वा विश्वैर्देवैरुपरिष्टाद्रोचयतु पाङ्क्तेन छन्दसेत्याह । बृहस्पतिरेवैनं विश्वैर्देवैरुपरिष्टाद्रोचयति पाङ्क्तेन छन्दसा । स मा रुचितो रोचयेत्याह । आशिषमेवैतामाशास्ते ॥ ०। ५। ५। ४४॥
४५ रोचितस्त्वं देव घर्म देवेष्वसीत्याह । रोचितो ह्येष देवेषु । रोचिषीयाहं मनुष्येष्वित्याह । रोचत एवैष मनुष्येषु । सम्राड्घर्म रुचितस्त्वं देवेष्वायुष्माꣳस्तेजस्वी ब्रह्मवर्चस्यसीत्याह । रुचितो ह्येष देवेष्वायुष्माꣳस्तेजस्वी ब्रह्मवर्चसी । रुचितोऽहं मनुष्येष्वायुष्माꣳस्तेजस्वी ब्रह्मवर्चसी भूयासमित्याह । रुचित एवैष मनुष्येष्वायुष्माꣳस्तेजस्वी ब्रह्मवर्चसी भवति । रुगसि रुचं मयि धेहि मयि रुगित्याह । आशिषमेवैतामाशास्ते । तं

यदेतैर्यजुर्भिररोचयित्वा । रुचितो घर्म इति प्रब्रूयात् । अरोचुकोऽध्वर्युः स्यात् । अरोचुको यजमानः । अथ यदेनमेतैर्यजुर्भी रोचयित्वा । रुचितो घर्म इति प्राह । रोचुकोऽध्वर्युर्भवति । रोचुको यजमानः ॥ ०। ५। ५। ४५॥ पश्चाद्रोचयति जागतेन छन्दसा स मा रुचितो रोचयेत्याहाशिषमेवैतामाशास्ते शास्तेऽष्टौ च ॥ ५॥

४६ शिरो वा एतद्यज्ञस्य । यत्प्रवर्ग्यः । ग्रीवा उपसदः । पुरस्तादुपसदां प्रवर्ग्यं प्रवृणक्ति । ग्रीवास्वेव यज्ञस्य शिरः प्रतिदधाति । त्रिः प्रवृणक्ति । त्रय इमे लोकाः । एभ्य एव लोकेभ्यो यज्ञस्य शिरोऽवरुन्धे । षड्ढ् संपद्यन्ते । षड्वा ऋतवः ॥ ०। ५। ६। ४६॥

४७ ऋतुभ्य एव यज्ञस्य शिरोऽवरुन्धे । द्वादशकृत्वः प्रवृणक्ति । द्वादश मासास्संवथ्सरः । संवथ्सरादेव यज्ञस्य शिरोऽवरुन्धे । चतुर्विँशतिस्संपद्यन्ते । चतुर्विँशतिरर्धमासाः । अर्धमासेभ्य एव यज्ञस्य शिरोऽवरुन्धे । अथो खलु । सकृदेव प्रवृज्यः । एकँ हि शिरः ॥ ०। ५। ६। ४७॥

४८ अग्निष्टोमे प्रवृणक्ति । एतावान् वै यज्ञः । यावानग्निष्टोमः । यावानेव यज्ञः । तस्य शिरः प्रतिदधाति । नोक्थ्ये प्रवृञ्ज्यात् । प्रजा वै पशव उक्थानि । यदुक्थ्ये प्रवृञ्ज्यात् । प्रजां पशूनस्य निर्दहेत् । विश्वजिति सर्वपृष्ठे प्रवृणक्ति ॥ ०। ५। ६। ४८॥

४९ पृष्ठानि वा अच्युतं च्यावयन्ति । पृष्ठैरेवास्मा अच्युतं च्यावयित्वाऽवरुन्धे । अपश्यं गोपामित्याह । प्राणो वै गोपाः । प्राणमेव प्रजासु वियातयति । अपश्यं गोपामित्याह । असौ वा आदित्यो गोपाः । स हीमाः प्रजा गोपायति । तमेव प्रजानां गोप्तारं कुरुते । अनिपद्यमानमित्याह ॥ ०। ५। ६। ४९॥

५० न ह्येष निपद्यते । आ च परा च पथिभिश्चरन्तमित्याह । आ च ह्येष परा च पथिभिश्चरति । स सध्रीचीस्स विषूचीर्वसान इत्याह । सध्रीचीश्च ह्येष विषूचीश्च वसानः प्रजा अभिविपश्यति । आवरीवर्ति भुवनेष्वन्तरित्याह । आ ह्येष वरीवर्ति भुवनेष्वन्तः । अत्र प्रावीर्मधुमाध्वीभ्यां मधुमाधूचीभ्यामित्याह । वासन्तिकावेवास्मा ऋतू कल्पयति । समग्निरग्निना गतेत्याह ॥ ०। ५। ६। ५०॥

५१ ग्रैष्मावेवास्मा ऋतू कल्पयति । समग्निरग्निना गतेत्याह । अग्निर्ह्येवैषोऽग्निना संगच्छते । स्वाहा समग्निस्तपसा गतेत्याह । पूर्वमेवोदितम् । उत्तरेणाभिगृणाति । धर्ता दिवो विभासि रजसः पृथिव्या इत्याह । वार्षिकावेवास्मा ऋतू कल्पयति । हृदे त्वा मनसे त्वेत्याह । शारदावेवास्मा ऋतू कल्पयति ॥ ०। ५। ६। ५१॥

५२ दिवि देवेषु होत्रा यच्छेत्याह । होत्राभिरेवेमान् लोकान्त्संदधाति । विश्वासां भुवां पत इत्याह । हैमन्तिकावेवास्मा ऋतू कल्पयति । देवश्रूस्त्वं देव घर्म देवान्पाहीत्याह । शैशिरावेवास्मा ऋतू कल्पयति । तपोजां वाचमस्मे नियच्छ देवायुवमित्याह । या वै मेध्या वाक् । सा तपोजाः । तामेवावरुन्धे ॥ ०। ५। ६। ५२॥
५३ गर्भो देवानामित्याह । गर्भो ह्येष देवानाम् । पिता मतीनामित्याह । प्रजा वै मतयः । तासामेष एव पिता । यत्प्रवर्ग्यः । तस्मादेवमाह । पतिः प्रजानामित्याह । पतिर्ह्येष प्रजानाम् । मतिः कवीनामित्याह ॥
०। ५। ६। ५३॥
५४ मतिर्ह्येष कवीनाम् । सं देवो देवेन सवित्राऽयतिष्ट सꣳ सूर्येणारुक्तेत्याह । अमुं चैवादित्यं प्रवर्ग्यं च सꣳ शास्ति । आयुर्दास्त्वमस्मभ्यं घर्म वर्चोदा असीत्याह । आशिषमेवैतामाशास्ते । पिता नोऽसि पिता नो बोधेत्याह । बोधयत्येवैनम् । नवैतेऽवकाशा भवन्ति । पत्नियै दशमः । नव वै पुरुषे प्राणाः ॥ ०। ५। ६। ५४॥
५५ नाभिर्दशमी । प्राणानेव यजमाने दधाति । अथो दशाक्षरा विराट् । अन्नं विराट् । विराजैवान्नाद्यमवरुन्धे । यज्ञस्य शिरोऽच्छिद्यत । तद्देवा होत्राभिः प्रत्यदधुः । ऋत्विजोऽवेक्षन्ते । एता वै होत्राः । होत्राभिरेव यज्ञस्य शिरः प्रतिदधाति ॥ ०। ५। ६। ५५॥
५६ रुचितमवेक्षन्ते । रुचिताद्वै प्रजापतिः प्रजा असृजत । प्रजानाꣳ सृष्ट्यै । रुचितमवेक्षन्ते । रुचिताद्वै पर्जन्यो वर्षति । वर्षुकः पर्जन्यो भवति । सं प्रजा एधन्ते । रुचितमवेक्षन्ते । रुचितं वै ब्रह्मवर्चसम् । ब्रह्मवर्चसिनो भवन्ति ॥ ०। ५। ६। ५६॥
५७ अधीयन्तोऽवेक्षन्ते । सर्वमायुर्यन्ति । न पत्न्यवेक्षेत । यत्पत्न्यवेक्षेत । प्रजायेत । प्रजां त्वस्यै निर्दहेत् । यन्नावेक्षेत । न प्रजायेत । नास्यै प्रजां निर्दहेत् । तिरस्कृत्य यजुर्वाचयति । प्रजायते । नास्यै प्रजां निर्दहति । त्वष्टीमती ते सपेयेत्याह । सपाद्धि प्रजाः प्रजायन्ते ॥ ०। ५। ६। ५७॥ ऋतवो हि शिरस्सर्वपृष्ठे प्रवृणक्त्यनिपद्यमानमित्याह गतेत्याह शारदावेवास्मा ऋतू कल्पयति रुन्धे कवीनामित्याह प्राणाः प्रतिदधाति भवन्ति वाचयति चत्वारि च ॥ ६॥
५८ देवस्य त्वा सवितुः प्रसव इति रशनामादत्ते प्रसूत्यै । अश्विनोर्बाहुभ्यामित्याह । अश्विनौ हि देवानामध्वर्यू आस्ताम् । पूष्णो हस्ताभ्यामित्याह यत्यै । आददेऽदित्यै रास्नाऽसीत्याह यजुष्कृत्यै । इड एह्यदित एहि सरस्वत्येहीत्याह । एतानि वा अस्यै

देवनामानि । देवनामैरेवैनामाह्वयति । असावेह्यसावेह्यसावेहीत्याह । एतानि वा अस्यै मनुष्यनामानि ॥ ०। ५। ७। ५८॥
५९ मनुष्यनामैरेवैनामाह्वयति । षड्व संपद्यन्ते । षड्वा ऋतवः । ऋतुभिरेवैनामाह्वयति । अदित्या उष्णीषमसीत्याह । यथा यजुरेवैतत् । वायुरस्यैड इत्याह । वायुदेवत्यो वै वथ्सः । पूषा त्वोपावसृजत्वित्याह । पौष्णा वै देवतया पशवः ॥ ०। ५। ७। ५९॥
६० स्वयैवैनं देवतयोपावसृजति । अश्विभ्यां प्रदापयेत्याह । अश्विनौ वै देवानां भिषजौ । ताभ्यामेवास्मै भेषजं करोति । यस्ते स्तनः शशय इत्याह । स्तौत्येवैनाम् । उस्र घर्मꣳ शिꣳषोस्र घर्मं पाहि घर्माय शिꣳषेत्याह । यथा ब्रूयादमुष्मै देहीति । तादृगेव तत् । बृहस्पतिस्त्वोपसीदत्वित्याह ॥ ०। ५। ७। ६०॥
६१ ब्रह्म वै देवानां बृहस्पतिः । ब्रह्मणैवैनामुपसीदति । दानवस्स्थ पेरव इत्याह । मेध्यानेवैनान्करोति । विष्वग्वृतो लोहितेनेत्याह व्यावृत्यै । अश्विभ्यां पिन्वस्व सरस्वत्यै पिन्वस्व पूष्णे पिन्वस्व बृहस्पतये पिन्वस्वेत्याह । एताभ्यो ह्येषा देवताभ्यः पिन्वते । इन्द्राय पिन्वस्वेन्द्राय पिन्वस्वेत्याह । इन्द्रमेव भागधेयेन समर्धयति । द्विरिन्द्रायेत्याह ॥ ०। ५। ७। ६१॥
६२ तस्मादिन्द्रो देवतानां भूयिष्ठभाक्तमः । गायत्रोऽसि त्रैष्टुभोऽसि जागतमसीति शफोपयमानादत्ते । छन्दोभिरेवैनानादत्ते । सहोर्जो भागेनोपमेहीत्याह । ऊर्ज एवैनं भागमकः । अश्विनौ वा एतद्यज्ञस्य शिरः प्रतिदधतावब्रूताम् । आवाभ्यामेव पूर्वाभ्यां वषट्क्रियाता इति । इन्द्राश्विना मधुनस्सारघस्येत्याह । अश्विभ्यामेव पूर्वाभ्यां वषट्करोति । अथो अश्विनावेव भागधेयेन समर्धयति ॥ ०। ५। ७। ६२॥
६३ घर्मं पात वसवो यजता वडित्याह । वसूनेव भागधेयेन समर्धयति । यद्वषट्कुर्यात् । यातयामाऽस्य वषट्कारस्स्यात् । यन्न वषट्कुर्यात् । रक्षाꣳसि यज्ञꣳ हन्युः । वडित्याह । परोक्षमेव वषट्करोति । नास्य यातयामा वषट्कारो भवति । न यज्ञꣳ रक्षाꣳसि घ्नन्ति ॥ ०। ५। ७। ६३॥
६४ स्वाहा त्वा सूर्यस्य रश्मये वृष्टिवनये जुहोमीत्याह । यो वा अस्य पुण्यो रश्मिः । स वृष्टिवनिः । तस्मा एवैनं जुहोति । मधु हविरसीत्याह । स्वदयत्येवैनम् । सूर्यस्य तपस्तपेत्याह । यथा यजुरेवैतत् । द्यावापृथिवीभ्यां त्वा परिगृह्णामीत्याह । द्यावापृथिवीभ्यामेवैनं परिगृह्णाति ॥ ०। ५। ७। ६४॥
६५ अन्तरिक्षेण त्वोपयच्छामीत्याह । अन्तरिक्षेणैवैनमुपयच्छति । न वा एतं मनुष्यो

भर्तुमर्हति । देवानां त्वा पितृणामनुमतो भर्तुँ शकेयमित्याह । देवैरेवैनं पितृभिरनुमत आदत्ते । वि वा एनमेतदर्धयन्ति । यत्पश्चात्प्रवृज्य पुरो जुह्वति । तेजोऽसि तेजोऽनुप्रेहीत्याह । तेज एवास्मिन्दधाति । दिविस्पृङ्मा मा हिँसीरन्तरिक्षस्पृङ्मा मा हिँसीः पृथिविस्पृङ्मा मा हिँसीरित्याहाहिँसायै ॥ ०। ५। ७। ६५॥
६६ सुवरसि सुवर्मे यच्छ दिवं यच्छ दिवो मा पाहीत्याह । आशिषमेवैतामाशास्ते । शिरो वा एतद्यज्ञस्य । यत्प्रवर्ग्यः । आत्मा वायुः । उद्यत्यवातनामान्याह । आत्मन्नेव यज्ञस्य शिरः प्रतिदधाति । अनवानम् । प्राणानाँ संतत्यै । पश्चाह ॥ ०। ५। ७। ६६॥
६७ पाङ्क्तो यज्ञः । यावानेव यज्ञः । तस्य शिरः प्रतिदधाति । अग्नये त्वा वसुमते स्वाहेत्याह । असौ वा आदित्योऽग्निर्वसुमान् । तस्मा एवैनं जुहोति । सोमाय त्वा रुद्रवते स्वाहेत्याह । चन्द्रमा वै सोमो रुद्रवान् । तस्मा एवैनं जुहोति । वरुणाय त्वाऽऽदित्यवते स्वाहेत्याह ॥ ०। ५। ७। ६७॥
६८ अप्सु वै वरुण आदित्यवान् । तस्मा एवैनं जुहोति । बृहस्पतये त्वा विश्वदेव्यावते स्वाहेत्याह । ब्रह्म वै देवानां बृहस्पतिः । ब्रह्मण एवैनं जुहोति । सवित्रे त्वर्भुमते विभुमते प्रभुमते वाजवते स्वाहेत्याह । संवथ्सरो वै सवितुर्भुमान्, विभुमान्प्रभुमान्, वाजवान् । तस्मा एवैनं जुहोति । यमाय त्वाऽंगिरस्वते पितृमते स्वाहेत्याह । प्राणो वै यमोऽंगिरस्वान्पितृमान् ॥ ०। ५। ७। ६८॥
६९ तस्मा एवैनं जुहोति । एताभ्य एवैनं देवताभ्यो जुहोति । दश संपद्यन्ते । दशाक्षरा विराट् । अन्नं विराट् । विराजैवान्नाद्यमवरुन्धे । रौहिणाभ्यां वै देवास्सुवर्गं लोकमायन्न् । तद्रौहिणयो रौहिणत्वम् । यद्रौहिणौ भवतः । रौहिणाभ्यामेव तद्यजमानस्सुवर्गं लोकमेति । अहर्ज्योतिः केतुना जुषताँ सुज्योतिर्ज्योतिषाग् स्वाहा रात्रिर्ज्योतिः केतुना जुषताँ सुज्योतिर्ज्योतिषाग् स्वाहेत्याह । आदित्यमेव तदमुष्मिं ल्लोकेऽह्ना परस्ताद्दाधार । रात्रिया अवस्तात् । तस्मादसावादित्योऽमुष्मिं ल्लोकेऽहोरात्राभ्यां धृतः ॥ ०। ५। ७। ६९॥ मनुष्यनामानि पशवः सीदत्वित्याहेन्द्रायेत्याहार्धयति घ्नन्ति गृह्णात्यहिँसायै पश्चाहादित्यवते स्वाहेत्याह पितृमानेति चत्वारि च ॥ ७॥
७० विश्वा आशा दक्षिणसदित्याह । विश्वानेव देवान्प्रीणाति । अथो दुरिष्ट्या एवैनं पाति । विश्वान्देवानयाडिहेत्याह । विश्वानेव देवान्भागधेयेन समर्धयति । स्वाहाकृतस्य घर्मस्य मधोः पिबतमश्विनेत्याह । अश्विनावेव भागधेयेन समर्धयति । स्वाहाऽग्नये यज्ञियाय शं

यजुर्भिरित्याह । अभ्येवैनं घारयति । अथो हविरेवाकः ॥ ०। ५। ८। ७०॥
७१ अश्विना घर्मं पातँ हार्दिवानमहर्दिवाभिरूतिभिरित्याह । अश्विनावेव भागधेयेन समर्धयति । अनु वां द्यावापृथिवी मँसातामित्याहानुमत्यै । स्वाहेन्द्राय स्वाहेन्द्रावडित्याह । इन्द्राय हि पुरो हूयते । आश्राव्याह घर्मस्य यजेति । वषट्कृते जुहोति । रक्षसामपहत्यै । अनुयजति स्वगाकृत्यै । घर्ममपातमश्विनेत्याह ॥
०। ५। ८। ७१॥
७२ पूर्वमेवोदितम् । उत्तरेणाभिगृणाति । अनु वां द्यावापृथिवी अमँसातामित्याहानुमत्यै । तं प्राव्यं यथावण्णमो दिवे नमः पृथिव्या इत्याह । यथा यजुरेवैतत् । दिवि धा इमं यज्ञं यज्ञमिमं दिवि धा इत्याह । सुवर्गमेवैनं लोकं गमयति । दिवं गच्छान्तरिक्षं गच्छ पृथिवीं गच्छेत्याह । एष्वेवैनं लोकेषु प्रतिष्ठापयति । पञ्च प्रदिशो गच्छेत्याह ॥
०। ५। ८। ७२॥
७३ दिक्ष्वेवैनं प्रतिष्ठापयति । देवान्घर्मपान्गच्छ पितॄन्घर्मपान्गच्छेत्याह । उभयेष्वेवैनं प्रतिष्ठापयति । यत्पिन्वते । वर्षुकः पर्जन्यो भवति । तस्मात्पिन्वमानः पुण्यः । यत्प्राङ्पिन्वते । तद्देवानाम् । यद्दक्षिणा । तत्पितृणाम् ॥ ०। ५। ८। ७३॥
७४ यत्प्रत्यक् । तन्मनुष्याणाम् । यदुदङ् । तद्रुद्राणाम् । प्राञ्चमुदञ्चं पिन्वयति । देवत्राऽकः । अथो खलु । सर्वा अनु दिशः पिन्वयति । सर्वा दिशस्समेधन्ते । अन्तःपरिधि पिन्वयति ॥ ०। ५। ८। ७४॥
७५ तेजसोऽस्कन्दाय । इषे पीपिह्यूर्जे पीपिहीत्याह । इषमेवोर्जं यजमाने दधाति । यजमानाय पीपिहीत्याह । यजमानायैवैतामाशिषमाशास्ते । मह्यं ज्यैष्ठ्याय पीपिहीत्याह । आत्मन एवैतामाशिषमाशास्ते । त्विष्यै त्वा द्युम्नाय त्वेन्द्रियाय त्वा भूत्यै त्वेत्याह । यथा यजुरेवैतत् । धर्माऽसि सुधर्मा मे न्यस्मे ब्रह्माणि धारयेत्याह ॥ ०। ५। ८। ७५॥
७६ ब्रह्मन्नेवैनं प्रतिष्ठापयति । नेत्त्वा वातस्स्कन्दयादिति यद्यभिचरेत् । अमुष्य त्वा प्राणे सादयाम्यमुना सह निरर्थं गच्छेति ब्रूयाद्यं द्विष्यात् । यमेव द्वेष्टि । तेनैनँ सह निरर्थं गमयति । पूष्णे शरसे स्वाहेत्याह । या एव देवता हुतभागाः । ताभ्य एवैनं जुहोति । ग्रावभ्यस्स्वाहेत्याह । या एवान्तरिक्षे वाचः ॥ ०। ५। ८। ७६॥
७७ ताभ्य एवैनं जुहोति । प्रतिरेभ्यः स्वाहेत्याह । प्राणा वै देवाः प्रतिराः । तेभ्य एवैनं जुहोति । द्यावापृथिवीभ्याग् स्वाहेत्याह । द्यावापृथिवीभ्यामेवैनं जुहोति । पितृभ्यो घर्मपेभ्यः स्वाहेत्याह । ये वै यज्वानः । ते पितरो घर्मपाः । तेभ्य एवैनं जुहोति ॥ ०।

५। ८। ७७॥
७८ रुद्राय रुद्रहोत्रे स्वाहेत्याह । रुद्रमेव भागधेयेन समर्धयति । सर्वतस्समनक्ति । सर्वत एव रुद्रं निरवदयते । उदञ्चं निरस्यति । एषा वै रुद्रस्य दिक् । स्वायामेव दिशि रुद्रं निरवदयते । अप उपस्पृशति मेध्यत्वाय । नान्वीक्षेत । यदन्वीक्षेत ॥ ०। ५। ८। ७८॥
७९ चक्षुरस्य प्रमायुकꣳ स्यात् । तस्मान्नान्वीक्ष्यः । अपीपरो माऽह्नो रात्रियै मा पाह्येषा ते अग्ने समित्तया समिध्यस्वायुर्मे दा वर्चसा माऽञ्जीरित्याह । आयुरेवास्मिन्वर्चो दधाति । अपीपरो मा रात्रिया अह्नो मा पाह्येषा ते अग्ने समित्तया समिध्यस्वायुर्मे दा वर्चसा माऽञ्जीरित्याह । आयुरेवास्मिन्वर्चो दधाति । अग्निर्ज्योतिर्ज्योतिरग्निः स्वाहा सूर्यो ज्योतिर्ज्योतिस्सूर्यः स्वाहेत्याह । यथा यजुरेवैतत् । ब्रह्मवादिनो वदन्ति । होतव्यमग्निहोत्रा ३म् न होतव्या ३ मिति ॥ ०। ५। ८। ७९॥
८० यद्यजुषा जुहुयात् । अयथापूर्वमाहुती जुहुयात् । यन्न जुहुयात् । अग्निः पराभवेत् । भूस्स्वाहेत्येव होतव्यम् । यथापूर्वमाहुती जुहोति । नाग्निः पराभवति । हुतꣳ हविर्मधु हविरित्याह । स्वदयत्येवैनम् । इन्द्रतमेऽग्नावित्याह ॥ ०। ५। ८। ८०॥
८१ प्राणो वा इन्द्रतमोऽग्निः । प्राण एवैनमिन्द्रतमेऽग्नौ जुहोति । पिता नोऽसि मा मा हिꣳसीरित्याहाहिꣳसायै । अश्याम ते देव घर्म मधुमतो वाजवतः पितुमत इत्याह । आशिषमेवैतामाशास्ते । स्वधाविनोऽशीमहि त्वा मा मा हिꣳसीरित्याहाहिꣳसायै । तेजसा वा एते व्यृध्यन्ते । ये प्रवर्ग्येण चरन्ति । प्राश्नन्ति । तेज एवात्मन्दधते ॥ ०। ५। ८। ८१॥
८२ संवथ्सरं न माꣳसमश्नीयात् । न रामामुपेयात् । न मृन्मयेन पिबेत् । नास्य राम उच्छिष्टं पिबेत् । तेज एव तथ्सꣳश्यति । देवासुरास्संयत्ता आसन्न् । ते देवा विजयमुपयन्तः । विभ्राजि सौर्ये ब्रह्म संन्यदधत । यत्किंच दिवाकीर्त्यम् । तदेतेनैव व्रतेनागोपायत् । तस्मादेतद्व्रतं चार्यम् । तेजसो गोपीथाय । तस्मादेतानि यजूꣳषि विभ्राजः सौर्यस्येत्याहुः । स्वाहा त्वा सूर्यस्य रश्मिभ्य इति प्रातस्सꣳ सादयति । स्वाहा त्वा नक्षत्रेभ्य इति सायम् । एता वा एतस्य देवताः । ताभिरेवैनꣳ समर्धयति ॥ ०। ५। ८। ८२॥ अकरश्विनेत्याह प्रदिशो गच्छेत्याह पितृणामन्तःपरिधि पिन्वयति धारयेत्याह वाचो घर्मपास्तेभ्य एवैनं जुहोत्यन्वीक्षेत होतव्या ३ मित्यग्नावित्याह दधतेऽगोपायथ्सप्त च ॥ ८॥

८३ घर्म या ते दिवि शुगिति तिस्र आहुतीर्जुहोति । छन्दोभिरेवास्यैभ्यो लोकेभ्यः शुचमवयजते । इयत्यग्रे जुहोति । अथेयत्यथेयति । त्रय इमे लोकाः । एभ्य एव लोकेभ्यः शुचमवयजते । अनु नोऽद्यानुमतिरित्याहानुमत्यै । दिवस्त्वा परस्पाया इत्याह । दिव एवेमान् लोकान्दाधार । ब्रह्मणस्त्वा परस्पाया इत्याह ॥ ०। ५। १। ८३॥
८४ एष्वेव लोकेषु प्रजा दाधार । प्राणस्य त्वा परस्पाया इत्याह । प्रजास्वेव प्राणान्दाधार । शिरो वा एतद्यज्ञस्य । यत्प्रवर्ग्यः । असौ खलु वा आदित्यः प्रवर्ग्यः । तं यद्दक्षिणा प्रत्यञ्चमुदञ्चमुद्वासयेत् । जिह्मं यज्ञस्य शिरो हरेत् । प्राञ्चमुद्वासयति । पुरस्तादेव यज्ञस्य शिरः प्रतिदधाति ॥ ०। ५। १। ८४॥
८५ प्राञ्चमुद्वासयति । तस्मादसावादित्यः पुरस्तादुदेति । शफोपयमान्धवित्राणि धृष्टी इत्यन्ववहरन्ति । सात्मानमेवैन ँ सतनुं करोति । सात्माऽमुष्मिं ल्लोके भवति । य एवं वेद । औदुम्बराणि भवन्ति । ऊर्ग्वा उदुम्बरः । ऊर्जमेवावरुन्धे । वर्त्मना वा अन्वित्य ॥ ०। ५। १। ८५॥
८६ यज्ञ ँ रक्षा ँसि जिघा ँसन्ति । साम्ना प्रस्तोताऽन्ववैति । साम वै रक्षोहा । रक्षसामपहत्यै । त्रिर्निधनमुपैति । त्रय इमे लोकाः । एभ्य एव लोकेभ्यो रक्षाग्स्यपहन्ति । पुरुषः पुरुषो निधनमुपैति । पुरुषः पुरुषो हि रक्षस्वी । रक्षसामपहत्यै ॥ ०। ५। १। ८६॥
८७ यत्पृथिव्यामुद्वासयेत् । पृथिवी ँ शुचाऽर्पयेत् । यदप्सु । अपः शुचाऽर्पयेत् । यदोषधीषु । ओषधीः शुचाऽर्पयेत् । यद्वनस्पतिषु । वनस्पतीञ्छुचाऽर्पयेत् । हिरण्यं निधायोद्वासयति । अमृतं वै हिरण्यम् ॥ ०। ५। १। ८७॥
८८ अमृत एवैनं प्रतिष्ठापयति । वल्गुरसि शंयुधाया इति त्रिः परिषिञ्चन्पर्येति । त्रिवृद्वा अग्निः । यावानेवाग्निः । तस्य शुच ँ शमयति । त्रिः पुनः पर्येति । षड्व संपद्यन्ते । षड्वा ऋतवः । ऋतुभिरेवास्य शुच ँ शमयति । चतुस्स्रक्तिर्नाभिर्ऋतस्येत्याह ॥ ०। ५। १। ८८॥
८९ इयं वा ऋतम् । तस्या एष एव नाभिः । यत्प्रवर्ग्यः । तस्मादेवमाह । सदो विश्वायुरित्याह । सदो हीयम् । अप द्वेषो अप ह्वर इत्याह भ्रातृव्यापनुत्यै । घर्मैतत्तेऽन्नमेतत्पुरीषमिति दध्ना मधुमिश्रेण पूरयति । ऊर्ग्वा अन्नाद्यं दधि । ऊर्जैवैनमन्नाद्येन समर्धयति ॥ ०। ५। १। ८९॥
९० अनशनायुको भवति । य एवं वेद । रन्तिर्नामासि दिव्यो गन्धर्व इत्याह ।

रूपमेवास्यैतन्महिमानꣳ रन्तिं बन्धुतां व्याचष्टे । समहमायुषा सं प्राणेनेत्याह ।
आशिषमेवैतामाशास्ते । व्यसौ योऽस्मान्द्वेष्टि यं च वयं द्विष्म इत्याह । अभिचार
एवास्यैषः । अचिक्रदद्वृषा हरिरित्याह । वृषा ह्येषः ॥ ०। ५। ९। १०॥
११ वृषा हरिः । महान्मित्रो न दर्शत इत्याह । स्तौत्येवैनमेतत् ।
चिदसि समुद्रयोनिरित्याह । स्वामेवैनं योनिं गमयति । नमस्ते अस्तु मा
मा हिꣳसीरित्याहाहिꣳसायै । विश्वावसुꣳ सोमगन्धर्वमित्याह । यदेवास्य
क्रियमाणस्यान्तर्यन्ति । तदेवास्यैतेनाप्याययति । विश्वावसुरभि तन्नो गृणात्वित्याह ॥
०। ५। ९। ११॥
१२ पूर्वमेवोदितम् । उत्तरेणाभिगृणाति । धियो हिन्वानो धिय इन्नो अव्यादित्याह ।
ऋतूनेवास्मै कल्पयति । प्रासां गन्धर्वो अमृतानि वोचदित्याह । प्राणा वा अमृताः
। प्राणानेवास्मै कल्पयति । एतत्त्वं देव घर्म देवो देवानुपागा इत्याह । देवो ह्येष
सन्देवानुपैति । इदमहं मनुष्यो मनुष्यानित्याह ॥ ०। ५। ९। १२॥
१३ मनुष्यो हि । एष सन्मनुष्यानुपैति । ईश्वरो वै प्रवर्ग्यमुद्वासयन्न् । प्रजां
पशून्थ्सोमपीथमनूद्वासः सोमपीथानुमेहि । सह प्रजया सह रायस्पोषेणेत्याह ।
प्रजामेव पशून्थ्सोमपीथमात्मन्धत्ते । सुमित्रा न आप ओषधयः सन्त्वित्याह ।
आशिषमेवैतामाशास्ते । दुर्मित्रास्तस्मै भूयासुऱ्योऽस्मान्द्वेष्टि यं च वयं द्विष्म इत्याह
। अभिचार एवास्यैषः । प्र वा एषोऽस्माल्लोकाच्च्यवते । यः प्रवर्ग्यमुद्वासयति । उदु
त्यं चित्रमिति सौरीभ्यामृग्भ्यां पुनरेत्य गार्हपत्ये जुहोति । अयं वै लोको गार्हपत्यः ।
अस्मिन्नेव लोके प्रतितिष्ठति । असौ खलु वा आदित्यस्सुवर्गो लोकः । यथ्सौरी भवतः
। तेनैव सुवर्गाल्लोकान्नैति ॥ ०। ५। ९। १३॥ ब्रह्मणस्त्वा परस्पाया इत्याह दधात्यन्वित्य
रक्षस्वी रक्षसामपहत्यै वै हिरण्यमाहार्धयति ह्येष गृणात्वित्याह मनुष्यानित्याहास्यैषोऽष्टौ
च ॥ ९॥
१४ प्रजापतिं वै देवाः शुक्रं पयोऽदुहन्न् । तदेभ्यो न व्यभवत् । तदग्निर्व्यकरोत् ।
तानि शुक्रियाणि सामान्यभवन्न् । तेषां यो रसोऽत्यक्षरत् । तानि शुक्रयजूग्ष्यभवन् ।
शुक्रियाणां वा एतानि शुक्रियाणि । सामपयसं वा एतयोरन्यत् । देवानामन्यत्पयः ।
यद्गोः पयः ॥ ०। ५। १०। १४॥
१५ तथ्साम्नः पयः । यदजायै पयः । तद्देवानां पयः । तस्माद्यत्रैतैर्यजुर्भिश्चरन्ति
। तत्पयसा चरन्ति । प्रजापतिमेव तद्देवान्पयसाऽन्नाद्येन समर्धयन्ति ।

एष ह त्वै साक्षात्प्रवर्ग्यं भक्षयति । यस्यैवं विदुषः प्रवर्ग्यः प्रवृज्यते । उत्तरवेद्यामुद्वासयेत्तेजस्कामस्य । तेजो वा उत्तरवेदिः ॥ ०। ५। १०। ९५॥
९६ तेजः प्रवर्ग्यः । तेजसैव तेजस्समर्धयति । उत्तरवेद्यामुद्वासयेदन्नकामस्य । शिरो वा एतद्यज्ञस्य । यत्प्रवर्ग्यः । मुखमुत्तरवेदिः । शीर्ष्णैव मुखꣳ संदधात्यन्नाद्याय । अन्नाद एव भवति । यत्र खलु वा एतमुद्वासितं वयाꣳसि पर्यासते । परि वै ताꣳ समां प्रजा वयाग्स्यासते ॥ ०। ५। १०। ९६॥
९७ तस्मादुत्तरवेद्यामेवोद्वासयेत् । प्रजानां गोपीथाय । पुरो वा पश्चाद्वोद्वासयेत् । पुरस्ताद्वा एतज्ज्योतिरुदेति । तत्पश्चान्निम्रोचति । स्वामेवैनं योनिमनूद्वासयति । अपां मध्य उद्वासयेत् । अपां वा एतन्मध्याज्ज्योतिरजायत । ज्योतिः प्रवर्ग्यः । स्व एवैनं योनौ प्रतिष्ठापयति ॥ ०। ५। १०। ९७॥
९८ यं द्विष्यात् । यत्र स स्यात् । तस्यां दिश्युद्वासयेत् । एष वा अग्निर्वैश्वानरः । यत्प्रवर्ग्यः । अग्निनैवैनं वैश्वानरेणाभिप्रवर्तयति । औदुम्बर्याꣳ शाखायामुद्वासयेत् । ऊर्ग्वा उदुम्बरः । अन्नं प्राणः । शुग्घर्मः ॥ ०। ५। १०। ९८॥
९९ इदमहममुष्यामुष्यायणस्य शुचा प्राणमपि दहामीत्याह । शुचैवास्य प्राणमपि दहति । ताजगार्तिमार्च्छति । यत्र दर्भा उपदीकसन्ततास्स्युः । तदुद्वासयेद्वृष्टिकामस्य । एता वा अपामनूज्झावर्ज़्यो नाम । यद्दर्भाः । असौ खलु वा आदित्य इतो वृष्टिमुदीरयति । असावेवास्मा आदित्यो वृष्टिं नियच्छति । ता आपो नियता धन्वना यन्ति ॥ ०। ५। १०। ९९॥ गोः पय उत्तरवेदिरासते स्थापयति घर्मो यन्ति ॥ १०॥
१०० प्रजापतिस्संभ्रियमाणः । संराड्ढ्संभृतः । घर्मः प्रवृक्तः । महावीर उद्वासितः । असौ खलु वावैष आदित्यः । यत्प्रवर्ग्यः । स एतानि नामान्यकुरुत । य एवं वेद । विदुरेनं नाम्ना । ब्रह्मवादिनो वदन्ति ॥ ०। ५। ११। १००॥
१०१ यो वै वसीयाꣳसं यथानाममुपचरति । पुण्यार्तिं वै स तस्मै कामयते । पुण्यार्तिमस्मै कामयन्ते । य एवं वेद । तस्मादेवं विद्वान् । घर्म इति दिवाऽऽचक्षीत । सम्राडिति नक्तम् । एते वा एतस्य प्रिये तनुवौ । एते अस्य प्रिये नामनी । प्रिययैवैनं तनुवा ॥ ०। ५। ११। १०१॥
१०२ प्रियेण नाम्ना समर्धयति । कीर्तिरस्य पूर्वा गच्छति जनतामायतः । गायत्री देवेभ्योऽपाक्रामत् । तां देवाः प्रवर्ग्येणैवानु व्यभवन् । प्रवर्ग्येणाप्नुवन् । यच्चतुर्विꣳशतिः

कृत्वः प्रवर्ग्यं प्रवृणक्ति । गायत्रीमेव तदनु विभवति । गायत्रीमाप्नोति । पूर्वोऽस्य जनं यतः कीर्तिर्गच्छति । वैश्वदेवः सꣳसन्नः ॥ ०। ५। ११। १०२॥
१०३ वसवः प्रवृक्तः । सोमोऽभिकीर्यमाणः । आश्विनः पयस्यानीयमाने । मारुतः क्वथन् । पौष्ण उदन्तः । सारस्वतो विष्यन्दमानः । मैत्रः शरो गृहीतः । तेज उद्यतो वायुः । ह्रियमाणः प्रजापतिः । हूयमानो वाग्घुतः ॥ ०। ५। ११। १०३॥
१०४ असौ खलु वावैष आदित्यः । यत्प्रवर्ग्यः । स एतानि नामान्यकुरुत । य एवं वेद । विदुरेनं नाम्ना । ब्रह्मवादिनो वदन्ति । यन्मृन्मयमाहुतिं नाश्नुतेऽथ । कस्मादेषोऽश्नुत इति । वागेष इति ब्रूयात् । वाच्येव वाचं दधाति ॥ ०। ५। ११। १०४॥
१०५ तस्मादश्नुते । प्रजापतिर्वा एष द्वादशधा विहितः । यत्प्रवर्ग्यः । यत्प्रागवकाशेभ्यः । तेन प्रजा असृजत । अवकाशैर्देवासुरानसृजत । यदूर्ध्वमवकाशेभ्यः । तेनान्नमसृजत । अन्नं प्रजापतिः । प्रजापतिर्वावैषः ॥ ०। ५। ११। १०५॥ वदन्ति तनुवा सꣳसन्नो हूयमानो वाग्घुतो दधात्येषः ॥ ११॥
१०६ सविता भूत्वा प्रथमेऽहन्प्रवृज्यते । तेन कामाꣳ एति । यद्द्वितीयेऽहन्प्रवृज्यते । अग्निर्भूत्वा देवानेति । यत्तृतीयेऽहन्प्रवृज्यते । वायुर्भूत्वा प्राणानेति । यच्चतुर्थेऽहन्प्रवृज्यते । आदित्यो भूत्वा रश्मीनेति । यत्पञ्चमेऽहन्प्रवृज्यते । चन्द्रमा भूत्वा नक्षत्राण्येति ॥ ०। ५। १२। १०६॥
१०७ यत्षष्ठेऽहन्प्रवृज्यते । ऋतुर्भूत्वा संवथ्सरमेति । यथ्सप्तमेऽहन्प्रवृज्यते । धाता भूत्वा शक्करीमेति । यदष्टमेऽहन्प्रवृज्यते । बृहस्पतिर्भूत्वा गायत्रीमेति । यन्नवमेऽहन्प्रवृज्यते । मित्रो भूत्वा त्रिवृत इमान् लोकानेति । यद्दशमेऽहन्प्रवृज्यते । वरुणो भूत्वा विराजमेति ॥ ०। ५। १२। १०७॥
१०८ यदेकादशेऽहन्प्रवृज्यते । इन्द्रो भूत्वा त्रिष्टुभमेति । यद्द्वादशेऽहन्प्रवृज्यते । सोमो भूत्वा सुत्यामेति । यत्पुरस्तादुपसदां प्रवृज्यते । तस्मादितः पराङ्मूं ल्लोकाग्स्तपन्नेति । यदुपरिष्टादुपसदां प्रवृज्यते । तस्मादमुतोऽर्वाङिमां ल्लोकाग्स्तपन्नेति । य एवं वेद । ऐव तपति ॥ ०। ५। १२। १०८॥ नक्षत्राण्येति विराजमेति तपति ॥ १२॥ देवा वै सत्रꣳ सावित्रं परिश्रिते ब्रह्मन्प्रचरिष्यामोऽग्निष्ट्वा शिरो ग्रीवा देवस्य रशनां विश्वा आशा घर्म या ते प्रजापतिꣳ शुक्रं प्रजापतिस्संभ्रियमाणस्सविता भूत्वा द्वादश ॥ १२॥ देवा वै सत्रꣳ स खदिरः परिश्रितेऽभिपूर्वमथो रक्षसां ग्रैष्मावेवास्मै ब्रह्म वै देवानामश्विना घर्मं पातं प्राणो वै वृषा हरिज़्यो वै वसीयाꣳसं यथानाममष्टोत्तरशतम् ॥

१०८॥ देवा वै सत्रमैव तपति ॥

० शं नस्तन्नो मा हासीत् । ओं शान्तिः शान्तिः शान्तिः ॥

## आरण्यके षष्ठः प्रश्नः ६

० सं त्वा सिञ्चामि यजुषा प्रजामायुर्धनं च ॥ ओं शान्तिः शान्तिः शान्तिः ॥

१ परेयुवाꣳसं प्रवतो महीरनु बहुभ्यः पन्थामनपस्पशानम् । वैवस्वतꣳ संगमनं जनानां यमꣳ राजानꣳ हविषा दुवस्यत । इदं त्वा वस्त्रं प्रथमं न्वागन्नपैतदूह यदिहाबिभः पुरा । इष्टापूर्तमनुसंपश्य दक्षिणां यथा ते दत्तं बहुधा वि बन्धुषु । इमौ युनज्मि ते वह्नी असुनीथाय वोढवे । याभ्यां यमस्य सादनꣳ सुकृतां चापि गच्छतात् । पूषा त्वेतश्च्यावयतु प्रविद्वाननष्टपशुर्भुवनस्य गोपाः । स त्वैतेभ्यः परिददात् पितृभ्योऽग्निर्देवेभ्यः सुविदत्रेभ्यः । पूषेमा आशा अनुवेद सर्वास्सो अस्माꣳ अभयतमेन नेषत् । स्वस्तिदा अघृणिस्सर्ववीरोऽप्रयुच्छन्पुर एतु प्रविद्वान् ॥ ०। ६। १। १॥

२ आयुर्विश्वायुः परिपासति त्वा पूषा त्वा पातु प्रपथे पुरस्तात् । यत्रासते सुकृतो यत्र ते ययुस्तत्र त्वा देवस्सविता दधातु । भुवनस्य पत इदꣳ हविः । अग्नये रयिमते स्वाहा । पुरुषस्य सयावर्यपेदघानि मृज्महे । यथा नो अत्र नापरः पुरा जरस आयति । पुरुषस्य सयावरि वि ते प्राणमसिस्रसम् । शरीरेण महीमिहि स्वधयेहि पितॄनुप प्रजयाऽस्मानिहावह । मैवं माग्स्ता प्रियेऽहं देवी सती पितृलोकं यदैषि । विश्ववारा नभसा संव्ययन्त्युभौ नो लोकौ पयसाऽभ्याववृथ्स्व ॥ ०। ६। १। २॥

३ इयं नारी पतिलोकं वृणाना निपद्यत उप त्वा मर्त्य प्रेतम् । विश्वं पुराणमनुपालयन्ती तस्यै प्रजां द्रविणं चेह धेहि । उदीर्ष्व नार्यभि जीवलोकमितासुमेतमुपशेष एहि । हस्तग्राभस्य दिधिषोस्त्वमेतत्पत्युर्जनित्वमभि संबभूव । सुवर्णꣳ हस्तादाददाना मृतस्य श्रियै ब्रह्मणे तेजसे बलाय । अत्रैव त्वमिह वयꣳसुशेवा विश्वास्स्पृधो अभिमातीर्जयेम । धनुर्हस्तादाददाना मृतस्य श्रियै क्षत्रायौजसे बलाय । अत्रैव त्वमिह वयꣳ सुशेवा विश्वास्स्पृधो अभिमातीर्जयेम । मणिꣳ हस्तादाददाना मृतस्य श्रियै विशे पुष्ट्यै बलाय । अत्रैव त्वमिह वयꣳ सुशेवा विश्वास्स्पृधो अभिमातीर्जयेम ॥ ०। ६। १। ३॥

४ इममग्ने चमसं मा विजीह्वरः प्रियो देवानामुत सोम्यानाम् । एष यश्चमसो देवपानस्तस्मिन्देवा अमृता मादयन्ताम् । अग्नेर्वर्म परि गोभिर्व्ययस्व संप्रोर्णुष्व मेदसा पीवसा च । नेत्त्वा धृष्णुर्हरसा जर्हृषाणो दधद्विधक्ष्यन्पर्यङ्खयातै । मैनमग्ने विदहो

माऽभिशोचो माऽस्य त्वचं चिक्षिपो मा शरीरम् । यदा शृतं करवो जातवेदोऽथेमेनं
प्रहिणुतात्पितृभ्यः । शृतं यदाऽकरसि जातवेदोऽथेमेनं परिदत्तात्पितृभ्यः । यदा
गच्छात्यसुनीतिमेतामथा देवानां वशनीर्भवाति । सूर्यं ते चक्षुर्गच्छतु वातमात्मा द्यां च
गच्छ पृथिवीं च धर्मणा । अपो वा गच्छ यदि तत्र ते हितमोषधीषु प्रतितिष्ठा शरीरैः
। अजोऽभागस्तपसा तं तपस्व तं ते शोचिस्तपतु तं ते अर्चिः । यास्ते शिवास्तनुवो
जातवेदस्ताभिर्वहेमꣳ सुकृतां यत्र लोकाः । अयं वै त्वमस्मादधि त्वमेतदयं वै तदस्य
योनिरसि । वैश्वानरः पुत्रः पित्रे लोककृज्ज्ञातवेदो वहेमꣳ सुकृतां यत्र लोकाः ॥ ०।
६। १। ४॥ विद्वानभ्याववृथ्स्वाभिमातीर्जयेम शरीरैश्चत्वारि च ॥ १॥
५ य एतस्य पथो गोप्तारस्तेभ्यस्स्वाहा य एतस्य पथो रक्षितारस्तेभ्यस्स्वाहा
य एतस्य पथोऽभिरक्षितारस्तेभ्यस्स्वाहाऽऽख्यात्रे स्वाहाऽपाख्यात्रे स्वाहाऽभिलालपते
स्वाहाऽपलालपते स्वाहाऽग्नये कर्मकृते स्वाहा यमत्र नाधीमस्तस्मै स्वाहा । यस्त
इध्मं जभरथ्सिष्विदानो मूर्धानं वात तपते त्वाया । दिवो विश्वस्माथ्सीमघायत उरुष्यः
। अस्मात्त्वमधि जातोऽसि त्वदयं जायतां पुनः । अग्नये वैश्वानराय सुवर्गाय लोकाय
स्वाहा ॥ ०। ६। २। ५॥ य एतस्य त्वत्पञ्च ॥ २॥
६ प्र केतुना बृहता भात्यग्निराविर्विश्वानि वृषभो रोरवीति । दिवश्चिदन्तादुप
मामुदानडपामुपस्थे महिषो ववर्ध । इदं त एकं पर ऊ त एकं तृतीयेन ज्योतिषा
संविशस्व । संवेशनस्तनुवै चारुरेधि प्रियो देवानां परमे सधस्थे । नाके सुपर्णमुप
यत्पतन्तꣳ हृदा वेनन्तो अभ्यचक्षत त्वा । हिरण्यपक्षं वरुणस्य दूतं यमस्य योनौ
शकुनं भुरण्युम् । अतिद्रव सारमेयौ श्वानौ चतुरक्षौ शबलौ साधुना पथा । अथा
पितॄन्थ्सुविदत्राꣳ अपीहि यमेन ये सधमादं मदन्ति । यौ ते श्वानौ यम रक्षितारौ
चतुरक्षौ पथिरक्षी नृचक्षसा । ताभ्याꣳ राजन्परिदेह्येन२ꣳ स्वस्ति चास्मा अनमीवं च
धेहि ॥ ०। ६। ३। ६॥
७ उरुणसावसुतृपावुलुम्बलौ यमस्य दूतौ चरतोऽवशाꣳ अनु । तावस्मभ्यं दृशये
सूर्याय पुनर्दत्तावसुमद्येह भद्रम् । सोम एकेभ्यः पवते घृतमेक उपासते । येभ्यो
मधु प्रधावति ताꣳश्चिदेवापि गच्छतात् । ये युध्यन्ते प्रधनेषु शूरासो ये तनुत्यजः । ये
वा सहस्रदक्षिणास्ताꣳश्चिदेवापि गच्छतात् । तपसा ये अनाधृष्यास्तपसा ये सुवर्गताः
। तपो ये चक्रिरे महत्ताꣳश्चिदेवापि गच्छतात् । अश्मन्वती रेवतीः सꣳरभध्वमुत्तिष्ठत
प्रतरता सखायः । अत्रा जहाम ये असन्नशेवाः शिवान्, वयमभि वाजानुत्तरेम ॥ ०।

६। ३। ७॥
८ यद्वै देवस्य सवितुः पवित्रꣳ सहस्रधारं विततमन्तरिक्षे । येनापुनादिन्द्रमनार्तमार्त्यै
तेनाहं माꣳ सर्वतनुं पुनामि । या राष्ट्रात्पन्नादपयन्ति शाखा अभिमृता नृपतिमिच्छमानाः
। धातुस्तास्सर्वाः पवनेन पूताः प्रजयाऽस्मान्रय्या वर्चसा सꣳसृजाथ । उद्वयं तमसस्परि
पश्यन्तो ज्योतिरुत्तरम् । देवं देवत्रा सूर्यमगन्म ज्योतिरुत्तमम् । धाता पुनातु सविता
पुनातु । अग्नेस्तेजसा सूर्यस्य वर्चसा ॥ ०। ६। ३। ८॥ धेह्युत्तरेमाष्टौ च ॥ ३॥
९ यं ते अग्निममन्थाम वृषभायेव पक्तवे । इमं तꣳ शमयामसि क्षीरेण चोदकेन च । यं
त्वमग्ने समदहस्त्वमु निर्वापया पुनः । क्याम्बूरत्र जायतां पाकदूर्वाव्यल्कशा । शीतिके
शीतिकावति ह्लादुके ह्लादुकावति । मण्डूक्या सुसङ्गमयेम२ꣳ स्वग्निꣳ शमय । शं ते
धन्वन्या आपः शमु ते सन्त्वनूक्याः । शं ते समुद्रिया आपः शमु ते सन्तु वर्ष्याः ।
शं ते स्रवन्तीस्तनुवे शमु ते सन्तु कूप्याः । शं ते नीहारो वर्षतु शमु पृष्वाऽवशीयताम्
॥ ०। ६। ४। ९॥
१० अवसृज पुनरग्ने पितृभ्यो यस्त आहुतश्चरति स्वधाभिः । आयुर्वसान उपयातु
शेषꣳ संगच्छतां तनुवा जातवेदः । संगच्छस्व पितृभिस्स२ꣳ स्वधाभिस्समिष्टापूर्तेन
परमे व्योमन्न् । यत्र भूम्यै वृणसे तत्र गच्छ तत्र त्वा देवस्सविता दधातु । यत्ते कृष्णः
शकुन आतुतोद पिपीलः सर्प उत वा श्वापदः । अग्निष्टद्विश्वादनृणं कृणोतु सोमश्च यो
ब्राह्मणमाविवेश । उत्तिष्ठातस्तनुवꣳ सम्भरस्व मेह गात्रमवहा मा शरीरम् । यत्र भूम्यै
वृणसे तत्र गच्छ तत्र त्वा देवस्सविता दधातु । इदं त एकं पर ऊ त एकं तृतीयेन
ज्योतिषा संविशस्व । संवेशनस्तनुवै चारुरेधि प्रियो देवानां परमे सधस्थे । उत्तिष्ठ
प्रेहि प्रद्रवौकः कृणुष्व परमे व्योमन् । यमेन त्वं यम्या संविदानोत्तमं नाकमधिरोहेमम् ।
अश्मन्वती रेवतीर्यद्वै देवस्य सवितुः पवित्रं या राष्ट्रात्पन्नादुद्वयं तमसस्परि धाता पुनातु ।
अस्मात्त्वमधिजातोऽस्ययं त्वदधिजायताम् । अग्नये वैश्वानराय सुवर्गाय लोकाय स्वाहा
॥ ०। ६। ४। १०॥ अवशीयताꣳ सधस्थे पञ्च च ॥ ४॥
११ आयातु देवस्सुमनाभिरूतिभिर्यमो ह वेह प्रयताभिरक्ता । आसीदताꣳ सुप्रयते ह
बर्हिष्यूर्जाय जात्यै मम शत्रुहत्यै । यमे इव यतमाने यदैतं प्र वां भरन्मानुषा देवयन्तः
। आसीदतग्ग् स्वमु लोकं विदाने स्वासस्थे भवतमिन्दवे नः । यमाय सोमꣳसुनुत
यमाय जुहुता हविः । यमꣳह यज्ञो गच्छत्यग्निदूतो अरंकृतः । यमाय घृतवद्धविर्जुहोत
प्र च तिष्ठत । स नो देवेष्वायमद्दीर्घमायुः प्रजीवसे । यमाय मधुमत्तमꣳ राज्ञे हव्यं

जुहोतन । इदं नम ऋषिभ्यः पूर्वजेभ्यः पूर्वेभ्यः पथिकृद्भ्यः ॥ ०। ६। ५। ११॥
१२ योऽस्य कौष्ठ्य जगतः पार्थिवस्यैक इद्वशी । यमं भङ्ग्यश्रवो गाय यो राजाऽनपरोध्यः
। यमं गाय भङ्ग्यश्रवो यो राजाऽनपरोध्यः । येनापो नद्यो धन्वानि येन द्यौः पृथिवी
दृढा । हिरण्यकक्ष्यान्त्सुधुरान् हिरण्याक्षानयश्शफान् । अश्वाननश्यतो दानं यमो
राजाऽभितिष्ठति । यमो दाधार पृथिवीं यमो विश्वमिदं जगत् । यमाय सर्वमित्तस्थे
यत्प्राणद्वायुरक्षितम् । यथा पञ्च यथा षड्यथा पञ्चदशर्षयः । यमं यो विद्यात्स ब्रूयाद्यथैक
ऋषिर्विजानते ॥ ०। ६। ५। १२॥
१३ त्रिकद्रुकेभिः पतति षडुर्वीरेकमिद्बृहत् । गायत्री त्रिष्टुप्छन्दाँसि सर्वा ता यम
आहिता । अहरहर्नयमानो गामश्वं पुरुषं जगत् । वैवस्वतो न तृप्यति पञ्चभिर्मानवैर्यमः
। वैवस्वते विविच्यन्ते यमे राजनि ते जनाः । ये चेह सत्येनेच्छन्ते य उ चानृतवादिनः ।
ते राजन्निह विविच्यन्तेऽथा यन्ति त्वामुप । देवाग्श्च ये नमस्यन्ति ब्राह्मणाग्श्चापचित्यति
। यस्मिन्वृक्षे सुपलाशे देवैः संपिबते यमः । अत्रा नो विश्पतिः पिता पुराणा अनुवेनति
॥ ०। ६। ५। १३॥ पथिकृद्भ्यो विजानतेऽनुवेनति ॥ ५॥
१४ वैश्वानरे हविरिदं जुहोमि साहस्रमुत्सँ शतधारमेतम् । तस्मिन्नेष पितरं पितामहं
प्रपितामहं बिभरत्पिन्वमाने । द्रप्सश्चस्कन्द पृथिवीमनु द्यामिमं च योनिमनु यश्च
पूर्वः । तृतीयं योनिमनु संचरन्तं द्रप्सं जुहोम्यनु सप्त होत्राः । इमँ समुद्रँ
शतधारमुत्सं व्यच्यमानं भुवनस्य मध्ये । घृतं दुहानामदितिं जनायाग्ने मा हिँसीः
परमे व्योमन्न् । अपेत वीत वि च सर्पतातो येऽत्र स्थ पुराणा ये च नूतनाः
। अहोभिरद्भिरक्तुभिर्व्यक्तं यमो ददात्ववसानमस्मै । सवितैतानि शरीराणि पृथिव्यै
मातुरुपस्थ आदधे । तेभिर्युज्यन्तामघ्नियाः ॥ ०। ६। ६। १४॥
१५ शुनं वाहाः शुनं नाराः शुनं कृषतु लाङ्गलम् । शुनं वरत्रा बध्यन्ताँ शुनमष्ट्रामुदिङ्गय
शुनासीरा शुनमस्मासु धत्तम् । शुनासीराविमां वाचं यद्दिवि चक्रथुः पयः ।
तेनेमामुपसिञ्चतम् । सीते वन्दामहे त्वाऽर्वाची सुभगे भव । यथा नस्सुभगा ससि यथा
नस्सुफला ससि । सवितैतानि शरीराणि पृथिव्यै मातुरुपस्थ आदधे । तेभिरदिते शम्भव
। विमुच्यध्वमघ्निया देवयाना अतारिष्म तमसस्पारमस्य । ज्योतिरापाम सुवरगन्म ॥
०। ६। ६। १५॥
१६ प्र वाता वान्ति पतयन्ति विद्युत उदोषधीर्जिहते पिन्वते सुवः । इरा विश्वस्मै भुवनाय
जायते यत्पर्जन्यः पृथिवीँ रेतसाऽवति । यथा यमाय हार्म्यमवपन्पञ्च मानवाः ।

एवं वपामि हार्म्यं यथाऽसाम जीवलोके भूरयः । चितस्स्थ परिचित ऊर्ध्वचितः श्रयध्वं पितरो देवता । प्रजापतिर्वस्सादयतु तया देवतया । आप्यायस्व सं ते ॥ ०। ६। ६। १६॥ अग्निया अगन्म सप्त च ॥ ६॥

१७ उत्ते तभ्नोमि पृथिवीं त्वत्परीमं लोकं निदधन्मो अहꣳरिषम् । एताग् स्थूणां पितरो धारयन्तु तेऽत्रा यमः सादनात्ते मिनोतु । उपसर्प मातरं भूमिमेतामुरुव्यचसं पृथिवीꣳ सुशेवाम् । ऊर्णम्रदा युवतिर्दक्षिणावत्येषा त्वा पातु निर्ऋत्या उपस्थे । उच्छ्वञ्चस्व पृथिवि मा विबाधिथाः सूपायनाऽस्मै भव सूपवञ्चना । माता पुत्रं यथा सिचाऽभ्येनं भूमि वृणु । उच्छ्वञ्चमाना पृथिवी हि तिष्ठसि सहस्रं मित उप हि श्रयन्ताम् । ते गृहासो मधुश्चुतो विश्वाहाऽस्मै शरणास्सन्त्वत्र । एणीर्धाना हरिणीरर्जुनीस्सन्तु धेनवः । तिलवथ्सा ऊर्जमस्मै दुहाना विश्वाहा सन्त्वनपस्फुरन्तीः ॥ ०। ६। ७। १७॥

१८ एषा ते यमसादने स्वधा निधीयते गृहे । अक्षितिर्नाम ते असौ । इदं पितृभ्यः प्रभरेम बर्हिर्देवेभ्यो जीवन्त उत्तरं भरेम । तत्त्वमारोहासो मेध्यो भव यमेन त्वं यम्या संविदानः । मा त्वा वृक्षौ संबाधिष्टां मा माता पृथिवि त्वम् । पितॄन् ह्यत्र गच्छास्येधासं यमराज्ये । मा त्वा वृक्षौ संबाधेथां मा माता पृथिवी मही । वैवस्वतꣳ हि गच्छासि यमराज्ये विराजसि । नळं प्लवमारोहैतं नळेन पथोऽन्विहि । स त्वं नळप्लवो भूत्वा संतर प्रतरोत्तर ॥ ०। ६। ७। १८॥

१९ सवितैतानि शरीराणि पृथिव्यै मातुरुपस्थ आदधे । तेभ्यः पृथिवि शम्भव । षड्ढोता सूर्यं ते चक्षुर्गच्छतु वातमात्मा द्यां च गच्छ पृथिवीं च धर्मणा । अपो वा गच्छ यदि तत्र ते हितमोषधीषु प्रतितिष्ठा शरीरैः । परं मृत्यो अनुपरेहि पन्थां यस्ते स्व इतरो देवयानात् । चक्षुष्मते शृण्वते ते ब्रवीमि मा नः प्रजाꣳ रीरिषो मोत वीरान् । शं वातः शꣳहि ते घृणिः शमु ते सन्त्वोषधीः । कल्पन्तां मे दिशः शग्माः । पृथिव्यास्त्वा लोके सादयाम्यमुष्य शर्मासि पितरो देवता । प्रजापतिस्त्वा सादयतु तया देवतया । अन्तरिक्षस्य त्वा दिवस्त्वा दिशां त्वा नाकस्य त्वा पृष्ठे ब्रध्नस्य त्वा विष्टपे सादयाम्यमुष्य शर्मासि पितरो देवता । प्रजापतिस्त्वा सादयतु तया देवतया ॥ ०। ६। ७। १९॥ अनपस्फुरन्तीरुत्तर देवतया द्वे च ॥ ७॥

२० अपूपवान्घृतवाग्श्चरुरेह सीदतूत्तभ्नुवन्पृथिवीं द्यामुतोपरि । योनिकृतः पथिकृतस्सपर्यत ये देवानां घृतभागा इह स्थ । एषा ते यमसादने स्वधा निधीयते

गृहेऽसौ । दशाक्षरा ताꣳ रक्षस्व तां गोपायस्व तां ते परिददामि तस्यां त्वा मा दभन्पितरो देवता । प्रजापतिस्त्वा सादयतु तया देवतया । अपूपवाञ्छृतवान् क्षीरवान् दधिवान् मधुमाग्श्चरुरेह सीदतूत्तभ्नुवन्पृथिवीं द्यामुतोपरि । योनिकृतः पथिकृतस्सपर्यत ये देवानाꣳ शृतभागाः, क्षीरभागा दधिभागा मधुभागा इह स्थ । एषा ते यमसादने स्वधा निधीयते गृहेऽसौ । शताक्षरा सहस्राक्षराऽयुताक्षराऽच्युताक्षरा ताꣳ रक्षस्व तां गोपायस्व तां ते परिददामि तस्यां त्वामादभन्पितरो देवता । प्रजापतिस्त्वा सादयतु तया देवतया ॥ ०। ६। ८। २०॥ अपूपवानसौ दश ॥ ८॥
२१ एतास्ते स्वधा अमृताः करोमि यास्ते धानाः परिकिराम्यत्र । तास्ते यमः पितृभिस्संविदानोऽत्र धेनूः कामदुघाः करोतु । त्वामर्जुनौषधीनां पयो ब्रह्माण इद्विदुः । तासां त्वा मध्यादाददे चरुभ्यो अपिधातवे । दूर्वाणाग् स्तम्बमाहरैतां प्रियतमां मम । इमां दिशं मनुष्याणां भूयिष्ठाऽनु विरोहतु । काशानाग् स्तम्बमाहर रक्षसामपहत्यै । य एतस्यै दिशः पराभवन्नघायवो यथा ते नाभवान्पुनः । दर्भाणाग् स्तम्बमाहर पितृणामोषधीं प्रियाम् । अन्वस्यै मूलं जीवादनु काण्डमथो फलम् ॥ ०। ६। ९। २१॥
२२ लोकं पृण ता अस्य सूददोहसः । शं वातः शꣳ हिते घृणिः शमु ते सन्त्वोषधीः । कल्पन्तां ते दिशस्सर्वाः । इदमेव मेतोऽपरामार्तिमाराम कांचन । तथा तदश्विभ्यां कृतं मित्रेण वरुणेन च । वरणो वारयादिदं देवो वनस्पतिः । आर्त्यै निर्ऋत्यै द्वेषाच्च वनस्पतिः । विधृतिरसि विधारयास्मदघा द्वेषाꣳसि शमि शमयास्मदघा द्वेषाꣳसि यव यवयास्मदघा द्वेषाꣳसि । पृथिवीं गच्छान्तरिक्षं गच्छ दिवं गच्छ दिशो गच्छ सुवर्गच्छ सुवर्गच्छ दिशो गच्छ दिवं गच्छान्तरिक्षं गच्छ पृथिवीं गच्छापो वा गच्छ यदि तत्र ते हितमोषधीषु प्रतितिष्ठा शरीरैः । अश्मन्वती रेवतीर्यद्वै देवस्य सवितुः पवित्रं या राष्ट्रात्पन्नादुद्वयं तमसस्परि धाता पुनातु ॥ ०। ६। ९। २२॥ फलं पुनातु ॥ ९॥
२३ आरोहताऽऽयुर्जरसं गृणाना अनुपूर्वं यतमाना यतिष्ट । इह त्वष्टा सुजनिमा सुरत्नो दीर्घमायुः करतु जीवसे वः । यथाऽहान्यनुपूर्वं भवन्ति यथर्तव ऋतुभिर्यन्ति क्लृप्ताः । यथा न पूर्वमपरो जहात्येवा धातरायूꣳषि कल्पयैषाम् । न हि ते अग्ने तनुवै क्रूरं चकार मर्त्यः । कपिर्बभस्ति तेजनं पुनर्जरायु गौरिव । अप नः शोशुचदघमग्ने शुशुद्ध्या रयिम् । अप नः शोशुचदघं मृत्यवे स्वाहा । अनड्वाहमन्वारभामहे स्वस्तये । स न इन्द्र इव देवेभ्यो वह्निस्संपारणो भव ॥ ०। ६। १०। २३॥

२४ इमे जीवा वि मृतैरावर्वर्तिन्नभूद्भद्रा देवहूतिं नो अद्य । प्राञ्चोऽगामा नृतये हसाय द्राघीय आयुः प्रतरां दधानाः । मृत्योः पदं योपयन्तो यदैम द्राघीय आयुः प्रतरां दधानाः । आप्यायमानाः प्रजया धनेन शुद्धाः पूता भवथ यज्ञियासः । इमं जीवेभ्यः परिधिं दधामि मा नोऽनु गादपरो अर्धमेतम् । शतं जीवन्तु शरदः पुरूचीस्तिरो मृत्युं दद्महे पर्वतेन । इमा नारीरविधवाः सुपत्नीराञ्जनेन सर्पिषा संमृशन्ताम् । अनश्रवो अनमीवास्सुशेवा आरोहन्तु जनयो योनिमग्रे । यदाञ्जनं त्रैककुदं जातꣳ हिमवतस्परि । तेनामृतस्य मूलेनारातीर्जम्भयामसि । यथा त्वमुद्भिनथ्स्योषधे पृथिव्या अधि । एवमिम उद्भिन्दन्तु कीर्त्या यशसा ब्रह्मवर्चसेन । अजोऽस्यजास्मदघा द्वेषाꣳसि यवोऽसि यवयास्मदघा द्वेषाꣳसि ॥ ०। ६। १०। २४॥ भव जम्भयामसि त्रीणि च ॥ १०॥
२५ अप नः शोशुचदघमग्ने शुशुद्ध्या रयिम् । अप नः शोशुचदघम् । सुक्षेत्रिया सुगातुया वसूया च यजामहे । अप नः शोशुचदघम् । प्र यद्भन्दिष्ठ एषां प्रास्माकासश्च सूरयः । अप नः शोशुचदघम् । प्र यदग्नेस्सहस्वतो विश्वतो यन्ति सूरयः । अप नः शोशुचदघम् । प्र यत्ते अग्ने सूरयो जायेमहि प्र ते वयम् । अप नः शोशुचदघम् ॥
०। ६। ११। २५॥
२६ त्वꣳ हि विश्वतोमुख विश्वतः परिभूरसि । अप नः शोशुचदघम् । द्विषो नो विश्वतो मुखाऽति नावेव पारय । अप नः शोशुचदघम् । स नस्सिन्धुमिव नावयाऽतिपर्षा स्वस्तये । अप नः शोशुचदघम् । आपः प्रवणादिव यतीरपास्मथ्स्यन्दतामघम् । अप नः शोशुचदघम् । उद्वनादुदकानीवापास्मथ्स्यन्दतामघम् । अप नः शोशुचदघम् । आनन्दाय प्रमोदाय पुनरागाग् स्वान्गृहान् । अप नः शोशुचदघम् । न वै तत्र प्रमीयते गौरश्वः पुरुषः पशुः । यत्रेदं ब्रह्म क्रियते परिधिर्जीवनाय कमप नः शोशुचदघम् ॥ ०। ६। ११। २६॥ अघमघं चत्वारि च ॥ ११॥
२७ अपश्याम युवतिमाचरन्तीं मृताय जीवां परिणीयमानाम् । अन्धेन या तमसा प्रावृताऽसि प्राचीमवाचीमवयन्नरिष्ट्यै । मयैतां मागस्तां भ्रियमाणा देवी सती पितृलोकं यदैषि । विश्ववारा नभसा संव्ययन्त्युभौ नो लोकौ पयसाऽऽवृणीहि । रयिष्ठामग्निं मधुमन्तमूर्मिणमूर्जस्सन्तं त्वा पयसोपसꣳसदेम । सꣳ रय्या समु वर्चसा सचस्वा नस्स्वस्तये । ये जीवा ये च मृता ये जाता ये च जन्त्याः । तेभ्यो घृतस्य धारयितुं मधुधारा व्युन्दती । माता रुद्राणां दुहिता वसूनाग् स्वसाऽऽदित्यानाममृतस्य नाभिः । प्र णु वोचं चिकितुषे जनाय मा गामनागामदितिं वधिष्ट । पिबतूदकं तृणान्यत्तु ।

ओमुथ्सृजत ॥ ०। ६। १२। २७॥ वधिष्ट द्वे च ॥ १२॥

परेयुवाꣳसं प्रविद्वान्भुवनस्याभ्याववृथ्स्वाजो भागोऽयं वै चतुश्चत्वारिꣳशद्य एतस्य त्वत्पञ्च प्र केतुनेदं ते नाके सुपर्णं यौ ते ये युध्यन्ते तपसाऽश्मन्वती रेवतीस्सꣳरभध्वमष्टाविꣳशतिर्यं ते यत्त उत्तिष्ठेदं त उत्तिष्ठ प्रेह्यश्मन् यद्वा उद्वयमयं पञ्चविꣳशतिरायातु त्रिꣳशद्वैश्वानरे तस्मिन्द्रप्स इममपेताहोभिर्युज्यन्तामग्निया अदिते पारं व आप्यायस्व सप्तविꣳशतिरुत्ते तभ्नोम्यक्षितिस्तेभ्यः पृथिवि षड्ढोता परं मे शग्माः पृथिव्या अन्तरिक्षस्य द्वात्रिꣳशदपूपवानसौ दश शत दशैतास्ते ते दिशस्सर्वा इदमश्मन्विꣳशतिरारोहत तनुवै क्रूरं चकार पुनर्मृत्यवे मा नोऽनु गाद्द्यह इमा नारीः परि त्रयोविꣳशतिरप नस्सुक्षेत्रिया प्र यद्धन्दिष्ठः प्रयदग्नेः प्र यत्ते अग्ने त्वꣳहि द्विषस्सनस्सिन्धुमापः प्रवणादुद्वनादानन्दाय न वै तत्र यत्रेदं चतुर्विꣳशतिरपश्यामाऽऽवृणीहि द्वादश द्वादश ॥ १२॥

परे युवाꣳ समायात्वेतास्ते सप्तविꣳशतिः ॥ २७॥

परेयुवाꣳसमोमुथ्सृजत ॥

० सं त्वा सिञ्चामि यजुषा प्रजामायुर्धनं च ॥ ओं शान्तिः शान्तिः शान्तिः ॥

सुमङ्गलीरियं वधूरिमाꣳ समेत पश्यत । सौभाग्यमस्यै दत्वायाथास्तं विपरेतन ॥

ओं शान्तिः शान्तिः शान्तिः ॥

इति तैत्तिरीय-आरण्यकम् १॥

# तैत्तिरीय-आरण्यक

## तैत्तिरीय-आरण्यकम् - २

॥ उपनिषदः एकाग्निकाण्डं च ॥
॥ श्री गुरुभ्यो नमः ॥ हरिः ओ(४)म् ॥

### आरण्यके सप्तमः प्रश्नः ७

१ शं नो मित्रः शं वरुणः । शं नो भवत्वर्यमा । शं न इन्द्रो बृहस्पतिः । शं नो विष्णुरुरुक्रमः । नमो ब्रह्मणे । नमस्ते वायो । त्वमेव प्रत्यक्षं ब्रह्मासि । त्वमेव प्रत्यक्षं ब्रह्म वदिष्यामि । ऋतं वदिष्यामि । सत्यं वदिष्यामि । तन्मामवतु । तद्वक्तारमवतु । अवतु माम् । अवतु वक्तारम् । ओं शान्तिः शान्तिः शान्तिः ॥ ०। ७। १। १॥ सत्यं वदिष्यामि पञ्च च ॥ १॥

२ ओं शीक्षां व्याख्यास्यामः । वर्णस्स्वरः । मात्रा बलम् । साम सन्तानः । इत्युक्तः शीक्षाध्यायः ॥ ०। ७। २। २॥ शीक्षां पञ्च ॥ २॥

३ सह नौ यशः । सह नौ ब्रह्मवर्चसम् । अथातस्सꣳहिताया उपनिषदं व्याख्यास्यामः । पञ्चस्वधिकरणेषु । अधिलोक मधिज्यौतिष मधिविद्य मधिप्रज मध्यात्मम् । ता महासꣳहिता इत्याचक्षते । अथाधिलोकम् । पृथिवी पूर्वरूपम् । द्यौरुत्तररूपम् । आकाशस्सन्धिः ॥ ०। ७। ३। ३॥

४ वायुस्सन्धानम् । इत्यधिलोकम् । अथाधिज्यौतिषम् । अग्निः पूर्वरूपम् । आदित्य उत्तररूपम् । आपस्सन्धिः । वैद्युतस्सन्धानम् । इत्यधिज्यौतिषम् । अथाधिविद्यम् । आचार्यः पूर्वरूपम् ॥ ०। ७। ३। ४॥

५ अन्तेवास्युत्तररूपम् । विद्या सन्धिः । प्रवचनꣳ सन्धानम् । इत्यधिविद्यम् । अथाधिप्रजम् । माता पूर्वरूपम् । पितोत्तररूपम् । प्रजा सन्धिः । प्रजननꣳ सन्धानम् । इत्यधिप्रजम् ॥ ०। ७। ३। ५॥

६ अथाध्यात्मम् । अधरा हनुः पूर्वरूपम् । उत्तरा हनुरुत्तररूपम् । वाक्सन्धिः ।

जिह्वा सन्धानम् । इत्यध्यात्मम् । इतीमा महासँहिताः । य एवमेता महासँहिता व्याख्याता वेद । सन्धीयते प्रजया पशुभिः । ब्रह्मवर्चसेनान्नाद्येन सुवर्ग्येण लोकेन ॥ ०। ७। ३। ६॥ सन्धिराचार्यः पूर्वरूपमित्यधिप्रजं लोकेन ॥ ३॥
७ यश्छन्दसामृषभो विश्वरूपः । छन्दोभ्योऽध्यमृताथ्सं बभूव । स मेन्द्रो मेधया स्पृणोतु । अमृतस्य देव धारणो भूयासम् । शरीरं मे विचर्षणम् । जिह्वा मे मधुमत्तमा । कर्णाभ्यां भूरि विश्रुवम् । ब्रह्मणः कोशोऽसि मेधयाऽपिहितः । श्रुतं मे गोपाय । आवहन्ती वितन्वाना ॥ ०। ७। ४। ७॥
८ कुर्वाणा चीरमात्मनः । वासाँसि मम गावश्च । अन्नपाने च सर्वदा । ततो मे श्रियमावह । लोमशां पशुभिस्सह स्वाहा । आ मा यन्तु ब्रह्मचारिणस्स्वाहा । वि माऽऽयन्तु ब्रह्मचारिणस्स्वाहा । प्र माऽऽयन्तु ब्रह्मचारिणस्स्वाहा । दमायन्तु ब्रह्मचारिणस्स्वाहा । शमायन्तु ब्रह्मचारिणस्स्वाहा ॥ ०। ७। ४। ८॥
९ यशो जनेऽसानि स्वाहा । श्रेयान् वस्यसोऽसानि स्वाहा । तं त्वा भग प्रविशानि स्वाहा । स मा भग प्रविश स्वाहा । तस्मिन्थ्सहस्रशाखे । नि भगाहं त्वयि मृजे स्वाहा । यथाऽऽपः प्रवताऽऽयन्ति । यथा मासा अहर्जरम् । एवं मां ब्रह्मचारिणः । धातरायन्तु सर्वतस्स्वाहा । प्रतिवेशोऽसि प्र मा भाहि प्र मा पद्यस्व ॥ ०। ७। ४। ९॥ वितन्वाना शमायन्तु ब्रह्मचारिणस्स्वाहा धातरायन्तु सर्वतः स्वाहैकं च ॥ ४॥
१० भूर्भुवस्सुवरिति वा एतास्तिस्रो व्याहृतयः । तासामु ह स्मै तां चतुर्थीम् । माहाचमस्यः प्रवेदयते । मह इति । तद्ब्रह्म । स आत्मा । अङ्गान्यन्या देवताः । भूरिति वा अयं लोकः । भुव इत्यन्तरिक्षम् । सुवरित्यसौ लोकः ॥ ०। ७। ५। १०॥
११ मह इत्यादित्यः । आदित्येन वाव सर्वे लोका महीयन्ते । भूरिति वा अग्निः । भुव इति वायुः । सुवरित्यादित्यः । मह इति चन्द्रमाः । चन्द्रमसा वाव सर्वाणि ज्योतीँषि महीयन्ते । भूरिति वा ऋचः । भुव इति सामानि । सुवरिति यजूँषि ॥ ०। ७। ५। ११॥
१२ मह इति ब्रह्म । ब्रह्मणा वाव सर्वे वेदा महीयन्ते । भूरिति वै प्राणः । भुव इत्यपानः । सुवरिति व्यानः । मह इत्यन्नम् । अन्नेन वाव सर्वे प्राणा महीयन्ते । ता वा एताश्चतस्रश्चतुर्धा । चतस्रश्चतस्रो व्याहृतयः । ता यो वेद । स वेद ब्रह्म । सर्वेऽस्मै देवा बलिमावहन्ति ॥
०। ७। ५। १२॥ असौ लोको यजूँषि वेद द्वे च ॥ ५॥

१३ स य एषोऽन्तर्हृदय आकाशः । तस्मिन्नयं पुरुषो मनोमयः । अमृतो हिरण्मयः ।
अन्तरेण तालुके । य एष स्तन इवावलम्बते । सेन्द्रयोनिः । यत्रासौ केशान्तो विवर्तते
। व्यपोह्य शीर्षकपाले । भूरित्यग्नौ प्रतितिष्ठति । भुव इति वायौ ॥ ०। ७। ६। १३॥
१४ सुवरित्यादित्ये । मह इति ब्रह्मणि । आप्नोति स्वाराज्यम् । आप्नोति मनसस्पतिम्
। वाक्पतिश्चक्षुष्पतिः । श्रोत्रपतिर्विज्ञानपतिः । एतत्ततो भवति । आकाशशरीरं ब्रह्म ।
सत्यात्म प्राणारामं मन आनन्दम् । शान्तिसमृद्धममृतम् । इति प्राचीनयोग्योपास्स्व ॥
०। ७। ६। १४॥
वायावमृतमेकं च ॥ ६॥
१५ पृथिव्यन्तरिक्षं द्यौर्दिशोऽवान्तरदिशाः । अग्निर्वायुरादित्यश्चन्द्रमा नक्षत्राणि । आप
ओषधयो वनस्पतय आकाश आत्मा । इत्यधिभूतम् । अथाध्यात्मम् । प्राणो व्यानोऽपान
उदानस्समानः । चक्षुः श्रोत्रं मनो वाक्त्वक् । चर्म माꣳस२ꣳ स्नावास्थि मज्जा ।
एतदधिविधाय ऋषिरवोचत् । पाङ्क्तं वा इदꣳ सर्वम् । पाङ्क्तेनैव पाङ्क्तग्ग् स्पृणोतीति ॥
०। ७। ७। १५॥ सर्वमेकं च ॥ ७॥
१६ ओमिति ब्रह्म । ओमितीदꣳ सर्वम् । ओमित्येतदनुकृति ह स्म वा अप्यो
श्रावयेत्याश्रावयन्ति । ओमिति सामानि गायन्ति । ओꣳ शोमिति शस्त्राणि शꣳसन्ति ।
ओमित्यध्वर्युः प्रतिगरं प्रतिगृणाति । ओमिति ब्रह्मा प्रसौति । ओमित्यग्निहोत्रमनुजानाति
। ओमिति ब्राह्मणः प्रवक्ष्यन्नाह ब्रह्मोपाप्नवानीति । ब्रह्मैवोपाप्नोति ॥ ०। ७। ८। १६॥
ओं दश ॥ ८॥
१७ ऋतं च स्वाध्यायप्रवचने च । सत्यं च स्वाध्यायप्रवचने च । तपश्च स्वाध्यायप्रवचने
च । दमश्च स्वाध्यायप्रवचने च । शमश्च स्वाध्यायप्रवचने च । अग्नयश्च स्वाध्यायप्रवचने
च । अग्निहोत्रं च स्वाध्यायप्रवचने च । अतिथयश्च स्वाध्यायप्रवचने च । मानुषं च
स्वाध्यायप्रवचने च । प्रजा च स्वाध्यायप्रवचने च । प्रजनश्च स्वाध्यायप्रवचने च ।
प्रजातिश्च स्वाध्यायप्रवचने च । सत्यमिति सत्यवचा राथीतरः । तप इति तपोनित्यः
पौरुशिष्टिः । स्वाध्यायप्रवचने एवेति नाको मौद्गल्यः । तद्धि तपस्तद्धि तपः ॥ ०। ७।
९। १७॥ प्रजा च स्वाध्यायप्रवचने च षट्च ॥ ९॥
१८ अहं वृक्षस्य रेरिवा । कीर्तिः पृष्ठं गिरेरिव । ऊर्ध्वपवित्रो वाजिनीव स्वमृतमस्मि ।
द्रविणꣳ सवर्चसम् । सुमेधा अमृतोक्षितः । इति त्रिशङ्कोर्वेदानुवचनम् ॥ ०। ७। १०।
१८॥ अहꣳ षट् ॥ १०॥

१९ वेदमनूच्याचार्योऽन्तेवासिनमनुशास्ति । सत्यं वद । धर्मं चर । स्वाध्यायान्मा प्रमदः । आचार्याय प्रियं धनमाहृत्य प्रजातन्तुं मा व्यवच्छेत्सीः । सत्यान्न प्रमदितव्यम् । धर्मान्न प्रमदितव्यम् । कुशलान्न प्रमदितव्यम् । भूत्यै न प्रमदितव्यम् । स्वाध्यायप्रवचनाभ्यां न प्रमदितव्यम् ॥ ०। ७। ११। १९॥
२० देवपितृकार्याभ्यां न प्रमदितव्यम् । मातृदेवो भव । पितृदेवो भव । आचार्यदेवो भव । अतिथिदेवो भव । यान्यनवद्यानि कर्माणि । तानि सेवितव्यानि । नो इतराणि । यान्यस्माकँ सुचरितानि । तानि त्वयोपास्यानि ॥ ०। ७। ११। २०॥
२१ नो इतराणि । ये के चास्मच्छ्रेयाँसो ब्राह्मणाः । तेषां त्वयाऽऽसने न प्रश्वसितव्यम् । श्रद्धया देयम् । अश्रद्धयाऽदेयम् । श्रिया देयम् । ह्रिया देयम् । भिया देयम् । संविदा देयम् । अथ यदि ते कर्मविचिकित्सा वा वृत्तविचिकित्सा वा स्यात् ॥ ०। ७। ११। २१॥
२२ ये तत्र ब्राह्मणाः संमर्शिनः । युक्ता आयुक्ताः । अलूक्षा धर्मकामास्स्युः । यथा ते तत्र वर्तेरन्न् । तथा तत्र वर्तेथाः । अथाभ्याख्यातेषु । ये तत्र ब्राह्मणास्संमर्शिनः । युक्ता आयुक्ताः । अलूक्षा धर्मकामास्स्युः । यथा ते तेषु वर्तेरन्न् । तथा तेषु वर्तेथाः । एष आदेशः । एष उपदेशः । एषा वेदोपनिषत् । एतदनुशासनम् । एवमुपासितव्यम् । एवमु चैतदुपास्यम् ॥ ०। ७। ११। २२॥ स्वाध्यायप्रवचनाभ्यां न प्रमदितव्यं तानि त्वयोपास्यानि स्यात्तेषु वर्तेरन्थ्सप्त च ॥ ११॥
२३ शं नो मित्रः शं वरुणः । शं नो भवत्वर्यमा । शं न इन्द्रो बृहस्पतिः । शं नो विष्णुरुरुक्रमः । नमो ब्रह्मणे । नमस्ते वायो । त्वमेव प्रत्यक्षं ब्रह्मासि । त्वामेव प्रत्यक्षं ब्रह्मावादिषम् । ऋतमवादिषम् । सत्यमवादिषम् । तन्मामावीत् । तद्वक्तारमावीत् । आवीन्माम् । आवीद्वक्तारम् । ओं शान्तिः शान्तिः शान्तिः ॥ ०। ७। १२। २३॥ सत्यमवादिषं पञ्च च ॥
१२॥ शं नः शीक्षाँ सह नौ यश्छन्दसां भूस्स यः पृथिव्योमित्यृतं चाहं वेदमनूच्य शं नो द्वादश ॥ १२॥ शं नो मह इत्यादित्यो नो इतराणि त्रयोविँशतिः ॥ २३॥ शं नः शान्तिः शान्तिः ॥
० शं नो मित्रः शं वरुणः । शं नो भवत्वर्यमा । शं न इन्द्रो बृहस्पतिः । शं नो विष्णुरुरुक्रमः । नमो ब्रह्मणे । नमस्ते वायो । त्वमेव प्रत्यक्षं ब्रह्मासि । त्वमेव प्रत्यक्षं ब्रह्म वदिष्यामि । ऋतं वदिष्यामि । सत्यं वदिष्यामि । तन्मामवतु । तद्वक्तारमवतु ।

अवतु माम् । अवतु वक्तारम् । ओं शान्तिः शान्तिः शान्तिः ॥

## आरण्यके अष्टमः प्रश्नः ८

० सह नाववतु । सह नौ भुनक्तु । सह वीर्यं करवावहै । तेजस्वि नावधीतमस्तु मा विद्विषावहै । ओं शान्तिः शान्तिः शान्तिः ॥

१ ब्रह्मविदाप्नोति परम् । तदेषाऽभ्युक्ता । सत्यं ज्ञानमनन्तं ब्रह्म । यो वेद निहितं गुहायां परमे व्योमन्न् । सोऽश्नुते सर्वान्कामान्थ्सह । ब्रह्मणा विपश्चितेति । तस्माद्वा एतस्मादात्मन आकाशस्संभूतः । आकाशाद्वायुः । वायोरग्निः । अग्नेरापः । अद्भ्यः पृथिवी । पृथिव्या ओषधयः । ओषधीभ्योऽन्नम् । अन्नात्पुरुषः । स वा एष पुरुषोऽन्नरसमयः । तस्येदमेव शिरः । अयं दक्षिणः पक्षः । अयमुत्तरः पक्षः । अयमात्मा । इदं पुच्छं प्रतिष्ठा । तदप्येष श्लोको भवति ॥ ०। ८। १। १॥ ॥ १॥

२ अन्नाद्वै प्रजाः प्रजायन्ते । याः काश्च पृथिवीग्ं श्रिताः । अथो अन्नेनैव जीवन्ति । अथैनदपि यन्त्यन्ततः । अन्नꣳ हि भूतानां ज्येष्ठम् । तस्माथ्सर्वौषधमुच्यते । सर्वं वै तेऽन्नमाप्नुवन्ति । येऽन्नं ब्रह्मोपासते । अन्नꣳ हि भूतानां ज्येष्ठम् । तस्माथ्सर्वौषधमुच्यते । अन्नाद्भूतानि जायन्ते । जातान्यन्नेन वर्धन्ते । अद्यतेऽत्ति च भूतानि । तस्मादन्नं तदुच्यत इति । तस्माद्वा एतस्मादन्नरसमयात् । अन्योऽन्तर आत्मा प्राणमयः । तेनैष पूर्णः । स वा एष पुरुषविध एव । तस्य पुरुषविधताम् । अन्वयं पुरुषविधः । तस्य प्राण एव शिरः । व्यानो दक्षिणः पक्षः । अपान उत्तरः पक्षः । आकाश आत्मा । पृथिवी पुच्छं प्रतिष्ठा । तदप्येष श्लोको भवति ॥ ०। ८। २। २॥ ॥ २॥

३ प्राणं देवा अनुप्राणन्ति । मनुष्याः पशवश्च ये । प्राणो हि भूतानामायुः । तस्माथ्सर्वायुषमुच्यते । सर्वमेव त आयुर्यन्ति । ये प्राणं ब्रह्मोपासते । प्राणो हि भूतानामायुः । तस्माथ्सर्वायुषमुच्यत इति । तस्यैष एव शारीर आत्मा । यः पूर्वस्य । तस्माद्वा एतस्मात्प्राणमयात् । अन्योऽन्तर आत्मा मनोमयः । तेनैष पूर्णः । स वा एष पुरुषविध एव । तस्य पुरुषविधताम् । अन्वयं पुरुषविधः । तस्य यजुरेव शिरः । ऋग्दक्षिणः पक्षः । सामोत्तरः पक्षः । आदेश आत्मा । अथर्वाङ्गिरसः पुच्छं प्रतिष्ठा । तदप्येष श्लोको भवति ॥ ०। ८। ३। ३॥ ॥ ३॥

४ यतो वाचो निवर्तन्ते । अप्राप्य मनसा सह । आनन्दं ब्रह्मणो विद्वान् । न बिभेति कदाचनेति । तस्यैष एव शारीर आत्मा । यः पूर्वस्य । तस्माद्वा एतस्मान्मनोमयात्

। अन्योऽन्तर आत्मा विज्ञानमयः । तेनैष पूर्णः । स वा एष पुरुषविध एव । तस्य पुरुषविधताम् । अन्वयं पुरुषविधः । तस्य श्रद्धैव शिरः । ऋतं दक्षिणः पक्षः । सत्यमुत्तरः पक्षः । योग आत्मा । महः पुच्छं प्रतिष्ठा । तदप्येष श्लोको भवति ॥ ०। ८। ४। ४॥ ॥ ४॥

५ विज्ञानं यज्ञं तनुते । कर्माणि तनुतेऽपि च । विज्ञानं देवास्सर्वे । ब्रह्म ज्येष्ठमुपासते । विज्ञानं ब्रह्म चेद्वेद । तस्माच्चेन्न प्रमाद्यति । शरीरे पाप्मनो हित्वा । सर्वान्कामान्थ्समश्नुत इति । तस्यैष एव शारीर आत्मा । यः पूर्वस्य । तस्माद्वा एतस्माद्विज्ञानमयात् । अन्योऽन्तर आत्माऽऽनन्दमयः । तेनैष पूर्णः । स वा एष पुरुषविध एव । तस्य पुरुषविधताम् । अन्वयं पुरुषविधः । तस्य प्रियमेव शिरः । मोदो दक्षिणः पक्षः । प्रमोद उत्तरः पक्षः । आनन्द आत्मा । ब्रह्म पुच्छं प्रतिष्ठा । तदप्येष श्लोको भवति ॥ ०। ८। ५। ५॥ ॥ ५॥

६ असन्नेव स भवति । असद्ब्रह्मेति वेद चेत् । अस्ति ब्रह्मेति चेद्वेद । सन्तमेनं ततो विदुरिति । तस्यैष एव शारीर आत्मा । यः पूर्वस्य । अथातोऽनुप्रश्नाः । उताविद्वानमुं लोकं प्रेत्य । कश्चन गच्छती ३। आहो विद्वानमुं लोकं प्रेत्य । कश्चिथ्समश्नुता ३ उ । सोऽकामयत । बहु स्यां प्रजायेयेति । स तपोऽतप्यत । स तपस्तप्त्वा । इद२ँ सर्वमसृजत । यदिदं किंच । तथ्सृष्ट्वा । तदेवानुप्राविशत् । तदनुप्रविश्य । सच्च त्यच्चाभवत् । निरुक्तं चानिरुक्तं च । निलयनं चानिलयनं च । विज्ञानं चाविज्ञानं च । सत्यं चानृतं च सत्यमभवत् । यदिदं किंच । तथ्सत्यमित्याचक्षते । तदप्येष श्लोको भवति ॥ ०। ८। ६। ६॥ ॥ ६॥

७ असद्वा इदमग्र आसीत् । ततो वै सदजायत । तदात्मान२ँ स्वयमकुरुत । तस्मात्तथ्सुकृतमुच्यत इति । यद्वै तथ्सुकृतम् । रसो वै सः । रस२ँ ह्येवायं लब्ध्वाऽऽनन्दी भवति । को ह्येवान्यात्कः प्राण्यात् । यदेष आकाश आनन्दो न स्यात् । एष ह्येवाऽऽनन्दयाति । यदा ह्येवैष एतस्मिन्नदृश्येऽनात्म्येऽनिरुक्तेऽनिलयनेऽभयं प्रतिष्ठां विन्दते । अथ सोऽभयं गतो भवति । यदा ह्येवैष एतस्मिन्नुदरमन्तरं कुरुते । अथ तस्य भयं भवति । तत्त्वेव भयं विदुषोऽमन्वानस्य । तदप्येष श्लोको भवति ॥ ०। ८। ७। ७॥ ॥ ७॥

८ भीषाऽस्माद्वातः पवते । भीषोदेति सूर्यः । भीषाऽस्मादग्निश्चेन्द्रश्च । मृत्युर्धावति पञ्चम इति । सैषाऽऽनन्दस्य मीमा२ँसा भवति । युवा स्याथ्साधुयुवाऽध्यायकः ।

आशिष्ठो दृढिष्ठो बलिष्ठः । तस्येयं पृथिवी सर्वा वित्तस्य पूर्णा स्यात् । स एको मानुष आनन्दः । ते ये शतं मानुषा आनन्दाः । स एको मनुष्यगन्धर्वाणामानन्दः । श्रोत्रियस्य चाकामहतस्य । ते ये शतं मनुष्यगन्धर्वाणामानन्दाः । स एको देवगन्धर्वाणामानन्दः । श्रोत्रियस्य चाकामहतस्य । ते ये शतं देवगन्धर्वाणामानन्दाः । स एकः पितृणां चिरलोकलोकानामानन्दः । श्रोत्रियस्य चाकामहतस्य । ते ये शतं पितृणां चिरलोकलोकानामानन्दाः । स एक आजानजानां देवानामानन्दः । श्रोत्रियस्य चाकामहतस्य । ते ये शतमाजानजानां देवानामानन्दाः । स एकः कर्मदेवानां देवानामानन्दः । ये कर्मणा देवानपियन्ति । श्रोत्रियस्य चाकामहतस्य । ते ये शतं कर्मदेवानां देवानामानन्दाः । स एको देवानामानन्दः । श्रोत्रियस्य चाकामहतस्य । ते ये शतं देवानामानन्दाः । स एक इन्द्रस्याऽऽनन्दः ॥ श्रोत्रियस्य चाकामहतस्य । ते ये शतमिन्द्रस्याऽऽनन्दाः । स एको बृहस्पतेरानन्दः । श्रोत्रियस्य चाकामहतस्य । ते ये शतं बृहस्पतेरानन्दाः । स एकः प्रजापतेरानन्दः । श्रोत्रियस्य चाकामहतस्य । ते ये शतं प्रजापतेरानन्दाः । स एको ब्रह्मण आनन्दः । श्रोत्रियस्य चाकामहतस्य । स यश्चायं पुरुषे । यश्चासावादित्ये । स एकः । स य एवंवित् । अस्माल्लोकात्प्रेत्य । एतमन्नमयमात्मानमुपसंक्रामति । एतं प्राणमयमात्मानमुपसंक्रामति । एतं मनोमयमात्मानमुपसंक्रामति । एतं विज्ञानमयमात्मानमुपसंक्रामति । एतमानन्दमयमात्मानमुपसंक्रामति । तदप्येष श्लोको भवति ॥ ०। ८। ८। ८॥

९ यतो वाचो निवर्तन्ते । अप्राप्य मनसा सह । आनन्दं ब्रह्मणो विद्वान् । न बिभेति कुतश्चनेति । एतꣳ ह वाव न तपति । किमहꣳ साधु नाकरवम् । किमहं पापमकरवमिति । स य एवं विद्वानेते आत्मान२ꣳ स्पृणुते । उभे ह्येवैष एते आत्मान२ꣳ स्पृणुते । य एवं वेद । इत्युपनिषत् ॥ ०। ८। ९। ९॥ ॥ ९॥ ब्रह्मविदिदमयमिदमेकविꣳशतिरन्नादन्नरसमयात् प्राणो व्यानोऽपान आकाशः पृथिवी पुच्छꣳ षड्विꣳशतिः प्राणं यजुरृक्सामादेशोऽथर्वाङ्गिरसः पुच्छं द्वाविꣳशतिर्यतश्श्रद्धर्तꣳ सत्यं योगो महोऽष्टादश विज्ञानं प्रियं मोदः प्रमोद आनन्दो ब्रह्म पुच्छं द्वाविꣳशतिरसन्नेवाष्टाविꣳशतिरसथ्षोडश भीषाऽस्मान्मानुषो मनुष्यगन्धर्वाणां देवगन्धर्वाणां पितृणां चिरलोकलोकानामाजानजानां कर्मदेवानां ये कर्मणा देवानामिन्द्रस्य बृहस्पतेः प्रजापतेर्ब्रह्मणस्स यश्च संक्रामत्येकपञ्चाशद्युतः

कुतश्च नैकादश नव ॥ ९॥
ब्रह्मविन्नव ॥ ९॥
० सह नाववतु । सह नौ भुनक्तु । सह वीर्यं करवावहै । तेजस्वि नावधीतमस्तु मा विद्विषावहै । ओं शान्तिः शान्तिः शान्तिः ॥

## आरण्यके नवमः प्रश्नः ९

० सह नाववतु । सह नौ भुनक्तु । सह वीर्यं करवावहै । तेजस्वि नावधीतमस्तु मा विद्विषावहै । ओं शान्तिः शान्तिः शान्तिः ॥

१ भृगुर्वै वारुणिः । वरुणं पितरमुपससार । अधीहि भगवो ब्रह्मेति । तस्मा एतत्प्रोवाच । अन्नं प्राणं चक्षुः श्रोत्रं मनो वाचमिति । तꣳ होवाच । यतो वा इमानि भूतानि जायन्ते । येन जातानि जीवन्ति । यत्प्रयन्त्यभिसंविशन्ति । तद्विजिज्ञासस्व । तद्ब्रह्मेति । स तपोऽतप्यत । स तपस्तप्त्वा ॥ ०। ९। १। १॥ ॥ १॥

२ अन्नं ब्रह्मेति व्यजानात् । अन्नाद्ध्येव खल्विमानि भूतानि जायन्ते । अन्नेन जातानि जीवन्ति । अन्नं प्रयन्त्यभिसंविशन्तीति । तद्विज्ञाय । पुनरेव वरुणं पितरमुपससार । अधीहि भगवो ब्रह्मेति । तꣳ होवाच । तपसा ब्रह्म विजिज्ञासस्व । तपो ब्रह्मेति । स तपोऽतप्यत । स तपस्तप्त्वा ॥ ०। ९। २। २॥ ॥ २॥

३ प्राणो ब्रह्मेति व्यजानात् । प्राणाद्ध्येव खल्विमानि भूतानि जायन्ते । प्राणेन जातानि जीवन्ति । प्राणं प्रयन्त्यभिसंविशन्तीति । तद्विज्ञाय । पुनरेव वरुणं पितरमुपससार । अधीहि भगवो ब्रह्मेति । तꣳ होवाच । तपसा ब्रह्म विजिज्ञासस्व । तपो ब्रह्मेति । स तपोऽतप्यत । स तपस्तप्त्वा ॥ ०। ९। ३। ३॥ ॥ ३॥

४ मनो ब्रह्मेति व्यजानात् । मनसो ह्येव खल्विमानि भूतानि जायन्ते । मनसा जातानि जीवन्ति । मनः प्रयन्त्यभिसंविशन्तीति । तद्विज्ञाय । पुनरेव वरुणं पितरमुपससार । अधीहि भगवो ब्रह्मेति । तꣳ होवाच । तपसा ब्रह्म विजिज्ञासस्व । तपो ब्रह्मेति । स तपोऽतप्यत । स तपस्तप्त्वा ॥ ०। ९। ४। ४॥ ॥ ४॥

५ विज्ञानं ब्रह्मेति व्यजानात् । विज्ञानाद्ध्येव खल्विमानि भूतानि जायन्ते । विज्ञानेन जातानि जीवन्ति । विज्ञानं प्रयन्त्यभिसंविशन्तीति । तद्विज्ञाय । पुनरेव वरुणं पितरमुपससार । अधीहि भगवो ब्रह्मेति । तꣳ होवाच । तपसा ब्रह्म विजिज्ञासस्व । तपो ब्रह्मेति । स तपोऽतप्यत । स तपस्तप्त्वा ॥ ०। ९। ५। ५॥ ॥ ५॥

६ आनन्दो ब्रह्मेति व्यजानात् । आनन्दाद्ध्येव खल्विमानि भूतानि जायन्ते । आनन्देन जातानि जीवन्ति । आनन्दं प्रयन्त्यभिसंविशन्तीति । सैषा भार्गवी वारुणी विद्या । परमे व्योमन्प्रतिष्ठिता । स य एवं वेद प्रतितिष्ठति । अन्नवानन्नादो भवति । महान्भवति प्रजया पशुभिर्ब्रह्मवर्चसेन । महान्कीर्त्या ॥ ०। ९। ६। ६॥ ॥ ६॥

७ अन्नं न निन्द्यात् । तद्व्रतम् । प्राणो वा अन्नम् । शरीरमन्नादम् । प्राणे शरीरं प्रतिष्ठितम् । शरीरे प्राणः प्रतिष्ठितः । तदेतदन्नमन्ने प्रतिष्ठितम् । स य एतदन्नमन्ने प्रतिष्ठितं वेद प्रतितिष्ठति । अन्नवानन्नादो भवति । महान्भवति प्रजया पशुभिर्ब्रह्मवर्चसेन । महान्कीर्त्या ॥ ०। ९। ७। ७॥ ॥ ७॥

८ अन्नं न परिचक्षीत । तद्व्रतम् । आपो वा अन्नम् । ज्योतिरन्नादम् । अप्सु ज्योतिः प्रतिष्ठितम् । ज्योतिष्यापः प्रतिष्ठिताः । तदेतदन्नमन्ने प्रतिष्ठितम् । स य एतदन्नमन्ने प्रतिष्ठितं वेद प्रतितिष्ठति । अन्नवानन्नादो भवति । महान्भवति प्रजया पशुभिर्ब्रह्मवर्चसेन । महान्कीर्त्या ॥ ०। ९। ८। ८॥ ॥ ८॥

९ अन्नं बहु कुर्वीत । तद्व्रतम् । पृथिवी वा अन्नम् । आकाशोऽन्नादः । पृथिव्यामाकाशः प्रतिष्ठितः । आकाशे पृथिवी प्रतिष्ठिता । तदेतदन्नमन्ने प्रतिष्ठितम् । स य एतदन्नमन्ने प्रतिष्ठितं वेद प्रतितिष्ठति । अन्नवानन्नादो भवति । महान्भवति प्रजया पशुभिर्ब्रह्मवर्चसेन । महान्कीर्त्या ॥ ०। ९। ९। ९॥ ॥ ९॥

१० न कंचन वसतौ प्रत्याचक्षीत । तद्व्रतम् । तस्माद्यया कया च विधया बह्वन्नं प्राप्नुयात् । अराध्यस्मा अन्नमित्याचक्षते । एतद्वै मुखतोऽन्नँ राद्धम् । मुखतोऽस्मा अन्नँ राध्यते । एतद्वै मध्यतोऽन्नँ राद्धम् । मध्यतोऽस्मा अन्नँ राध्यते । एतद्वा अन्ततोऽन्नँ राद्धम् । अन्ततोऽस्मा अन्नँ राध्यते । य एवं वेद । क्षेम इति वाचि । योगक्षेम इति प्राणापानयोः । कर्मेति हस्तयोः । गतिरिति पादयोः । विमुक्तिरिति पायौ । इति मानुषीः समाज्ञाः । अथ दैवीः । तृप्तिरिति वृष्टौ । बलमिति विद्युति । यश इति पशुषु । ज्योतिरिति नक्षत्रेषु । प्रजातिरमृतमानन्द इत्युपस्थे । सर्वमित्याकाशे । तत्प्रतिष्ठेत्युपासीत । प्रतिष्ठावान्भवति । तन्मह इत्युपासीत । महान्भवति । तन्मन इत्युपासीत । मानवान्भवति । तन्नम इत्युपासीत । नम्यन्तेऽस्मै कामाः । तद्ब्रह्मेत्युपासीत । ब्रह्मवान्भवति । तद्ब्रह्मणः परिमर इत्युपासीत । पर्येणं म्रियन्ते द्विषन्तस्सपत्नाः । परि येऽप्रिया भ्रातृव्याः । स यश्चायं पुरुषे । यश्चासावादित्ये । स एकः । स य एवं वित् । अस्माल्लोकात्प्रेत्य । एतमन्नमयमात्मानमुपसंक्रम्य

। एतं प्राणमयमात्मानमुपसंक्रम्य । एतं मनोमयमात्मानमुपसंक्रम्य । एतं विज्ञानमयमात्मानमुपसंक्रम्य । एतमानन्दमयमात्मानमुपसंक्रम्य । इमां ल्लोकन्कामान्नी कामरूप्यनुसंचरन्न् । एतथ्साम गायन्नास्ते । हा ३ वु हा ३ वु हा ३ वु । अहमन्नमहमन्नमहमन्नम् । अहमन्नादोऽ ३ओ हमन्नादोऽ ३ओ हमन्नादः । अह२ँ श्लोककृदह२ँ श्लोककृदह२ँ श्लोककृत् । अहमस्मि प्रथमजा ऋता ३ स्य । पूर्वं देवेभ्यो अमृतस्य ना ३ भायि । यो मा ददाति स इदेव मा ३ वाः । अहमन्नमन्नमदन्तमा ३ द्मि । अहं विश्वं भुवनमभ्यभवाम् । सुवर्न ज्योतीः । य एवं वेद । इत्युपनिषत् ॥ ०। ९। १०। १०॥

राद्ध्यते विद्युति मानवान्भवत्येको हा३वु य एवं वेदैकं च ॥ १०॥

भृगुस्तस्मै यतो विशन्ति तद्विजिज्ञासस्व तत्रयोदशान्नं प्राणो मनो विज्ञानमिति विज्ञाय तन्तपसा द्वादश द्वादशानन्द इति सैषा दशान्नं न निन्द्यात्प्राणः शरीरं अन्नं न परिचक्षीतापो ज्योतिरन्नं बहु कुर्वीत पृथिव्याकाश एकादशैकादश न कञ्चनैकषष्टिर्दश ॥ १०॥

० सह नाववतु । सह नौ भुनक्तु । सह वीर्यं करवावहै । तेजस्वि नावधीतमस्तु मा विद्विषावहै । ओं शान्तिः शान्तिः शान्तिः ॥

## आरण्यके दशमः प्रश्नः १०

० सह नाववतु । सह नौ भुनक्तु । सह वीर्यं करवावहै । तेजस्वि नावधीतमस्तु मा विद्विषावहै । ओं शान्तिः शान्तिः शान्तिः ॥

१ अम्भस्य पारे भुवनस्य मध्ये नाकस्य पृष्ठे महतो महीयान् । शुक्रेण ज्योतीꣳषि समनुप्रविष्टः प्रजापतिश्चरति गर्भे अन्तः । यस्मिन्निदꣳ सं च वि चैति सर्वं यस्मिन्देवा अधि विश्वे निषेदुः । तदेव भूतं तदु भव्यमा इदं तदक्षरे परमे व्योमन्न् । येनावृतं खं च दिवं महीं च येनादित्यस्तपति तेजसा भ्राजसा च । यमन्तस्समुद्रे कवयो वयन्ति यदक्षरे परमे प्रजाः । यतः प्रसूता जगतः प्रसूती तोयेन जीवान्व्यचसर्ज भूम्याम् । यदोषधीभिः पुरुषान्पशूꣳश्च विवेश भूतानि चराचराणि । अतः परं नान्यदणीयसꣳ हि परात्परं यन्महतो महान्तम् । यदेकमव्यक्तमनन्तरूपं विश्वं पुराणं तमसः परस्तात् ॥ ०। १०। १। १॥

२ तदेवर्तं तदु सत्यमाहुस्तदेव ब्रह्म परमं कवीनाम् । इष्टापूर्तं बहुधा जातं जायमानं विश्वं बिभर्ति भुवनस्य नाभिः । तदेवाग्निस्तद्वायुस्तथ्सूर्यस्तदु चन्द्रमाः । तदेव शुक्रममृतं

तद्ब्रह्म तदापस्स प्रजापतिः । सर्वे निमेषा जज्ञिरे विद्युतः पुरुषादधि । कला मुहूर्ताः काष्ठाश्चाहोरात्राश्च सर्वशः । अर्धमासा मासा ऋतवः संवथ्सरश्च कल्पन्ताम् । स आपः प्रदुघे उभे इमे अन्तरिक्षमथो सुवः । नैनमूर्ध्वं न तिर्यञ्चं न मध्ये परिजग्रभत् । न तस्येशे कश्चन तस्य नाम महद्यशः ॥ ०। १०। १। २॥

३ न संदृशे तिष्ठति रूपमस्य न चक्षुषा पश्यति कश्चनैनम् । हृदा मनीषा मनसाऽभिक्लृप्तो य एनं विदुरमृतास्ते भवन्ति । अद्भ्यस्संभूतो हिरण्यगर्भ इत्यष्टौ । एष हि देवः प्रदिशोऽनु सर्वाः पूर्वो हि जातस्स उ गर्भे अन्तः । स विजायमानस्स जनिष्यमाणः प्रत्यङ्मुखास्तिष्ठति विश्वतोमुखः । विश्वतश्चक्षुरुत विश्वतोमुखो विश्वतोहस्त उत विश्वतस्पात् । सं बाहुभ्यां नमति सं पतत्रैर्द्यावापृथिवी जनयन्देव एकः । वेनस्तत्पश्यन्विश्वा भुवनानि विद्वान्, यत्र विश्वं भवत्येकनीळम् । यस्मिन्निदꣳ सं च वि चैकꣳ स ओतः प्रोतश्च विभुः प्रजासु । प्र तद्वोचे अमृतं नु विद्वान्गन्धर्वो नाम निहितं गुहासु ॥ ०। १०। १। ३॥

४ त्रीणि पदा निहिता गुहासु यस्तद्वेद सवितुः पिता सत् । स नो बन्धुर्जनिता स विधाता धामानि वेद भुवनानि विश्वा । यत्र देवा अमृतमानशानास्तृतीये धामान्यभ्यैरयन्त । परि द्यावापृथिवी यन्ति सद्यः परि लोकान्परि दिशः परि सुवः । ऋतस्य तन्तुं विततं विचृत्य तदपश्यत्तदभवत्प्रजासु । परीत्य लोकान्परीत्य भूतानि परीत्य सर्वाः प्रदिशो दिशश्च । प्रजापतिः प्रथमजा ऋतस्यात्मनाऽऽत्मानमभिसंबभूव । सदसस्पतिमद्भुतं प्रियमिन्द्रस्य काम्यम् । सनिं मेधामयासिषम् । उद्दीप्यस्व जातवेदोऽपघ्नन्निर्ऋतिं मम ॥ ०। १०। १। ४॥

५ पशूꣳश्च मह्यमावह जीवनं च दिशो दिश । मा नो हिꣳसीज्ञातवेदो गामश्वं पुरुषं जगत् । अबिभ्रदग्न आगहि श्रिया मा परिपातय । पुरुषस्य विद्म सहस्राक्षस्य महादेवस्य धीमहि । तन्नो रुद्रः प्रचोदयात् । तत्पुरुषाय विद्महे महादेवाय धीमहि । तन्नो रुद्रः प्रचोदयात् । तत्पुरुषाय विद्महे वक्रतुण्डाय धीमहि । तन्नो दन्तिः प्रचोदयात् । तत्पुरुषाय विद्महे चक्रतुण्डाय धीमहि ॥ ०। १०। १। ५॥

६ तन्नो नन्दिः प्रचोदयात् । तत्पुरुषाय विद्महे महासेनाय धीमहि । तन्नष्षण्मुखः प्रचोदयात् । तत्पुरुषाय विद्महे सुवर्णपक्षाय धीमहि । तन्नो गरुडः प्रचोदयात् । वेदात्मनाय विद्महे हिरण्यगर्भाय धीमहि । तन्नो ब्रह्म प्रचोदयात् । नारायणाय विद्महे वासुदेवाय धीमहि । तन्नो विष्णुः प्रचोदयात् । वज्रनखाय विद्महे तीक्ष्णदꣳष्ट्राय धीमहि

॥ ०। १०। १। ६॥
७ तन्नो नारसिँहः प्रचोदयात् । भास्कराय विद्महे महद्युतिकराय धीमहि । तन्नो आदित्यः प्रचोदयात् । वैश्वानराय विद्महे लालीलाय धीमहि । तन्नो अग्निः प्रचोदयात् । कात्यायनाय विद्महे कन्यकुमारि धीमहि । तन्नो दुर्गिः प्रचोदयात् । सहस्रपरमा देवी शतमूला शताङ्कुरा । सर्वँहरतु मे पापं दूर्वा दुस्स्वप्ननाशनी । काण्डात्काण्डात्प्ररोहन्ती परुषःपरुषः परि ॥ ०। १०। १। ७॥
८ एवा नो दूर्वे प्रतनु सहस्रेण शतेन च । या शतेन प्रतनोषि सहस्रेण विरोहसि । तस्यास्ते देवीष्टके विधेम हविषा वयम् । अश्वक्रान्ते रथक्रान्ते विष्णुक्रान्ते वसुन्धरा । शिरसा धारयिष्यामि रक्षस्व मां पदेपदे । भूमिर्धेनुर्धरणी लोकधारिणी । उद्धृताऽसि वराहेण कृष्णेन शतबाहुना । मृत्तिके हन मे पापं यन्मया दुष्कृतं कृतम् । मृत्तिके ब्रह्मदत्ताऽऽसि काश्यपेनाभिमन्त्रिता । मृत्तिके देहि मे पुष्टिं त्वयि सर्वं प्रतिष्ठितम् ॥ ०। १०। १। ८॥
९ मृत्तिके प्रतिष्ठिते सर्वं तन्मे निर्णुद मृत्तिके । तया हतेन पापेन गच्छामि परमां गतिम् । यत इन्द्र भयामहे ततो नो अभयं कृधि । मघवञ्छग्धि तव तन्न ऊतये विद्विषो विमृधो जहि । स्वस्तिदा विशस्पतिर्वृत्रहा विमृधो वशी । वृषेन्द्रः पुर एतु नस्स्वस्तिदा अभयंकरः । स्वस्ति न इन्द्रो वृद्धश्रवास्स्वस्ति नः पूषा विश्ववेदाः । स्वस्ति नस्ताक्ष्र्यो अरिष्टनेमिस्स्वस्ति नो बृहस्पतिर्दधातु । आपान्त मन्युस्तृपलप्रभर्मा धुनिः शिमीवाञ्छरुमाँ ऋजीषी । सोमो विश्वान्यतसा वनानि नार्वागिन्द्रं प्रतिमानानि देभुः ॥ ०। १०। १। ९॥
१० ब्रह्म जज्ञानं प्रथमं पुरस्ताद्वि सीमतस्सुरुचो वेन आवः । स बुध्निया उपमा अस्य विष्ठास्सतश्च योनिमसतश्च विवः । स्योना पृथिवि भवा नृक्षरा निवेशनी । यच्छा नः शर्म सप्रथाः । गन्धद्वारां दुराधर्षां नित्यपुष्टां करीषिणीम् । ईश्वरीँ सर्वभूतानां तामिहोपह्वये श्रियम् । श्रीर्मे भजतु । अलक्ष्मीर्मे नश्यतु । विष्णुमुखा वै देवाश्छन्दोभिरिमान् लोकाननपजय्यमभ्यजयन् । महाँ इन्द्रो वज्रबाहुः षोडशी शर्म यच्छतु ॥ ०। १०। १। १०॥
११ स्वस्ति नो मघवा करोतु हन्तु पाप्मानं योऽस्मान्द्वेष्टि । सोमानग्ग् स्वरणं कृणुहि ब्रह्मणस्पते । कक्षीवन्तं य औशिजम् । शरीरं यज्ञशमलं कुसीदं तस्मिन्थ्सीदतु योऽस्मान्द्वेष्टि । चरणं पवित्रं विततं पुराणं येन पूतस्तरति दुष्कृतानि । तेन पवित्रेण

शुद्धेन पूता अति पाप्मानमरातिं तरेम । सजोषा इन्द्र सगणो मरुद्भिः सोमं पिब वृत्रहञ्छूर विद्वान् । जहि शत्रू ँ॒रप मृधो नुदस्वाथाभयं कृणुहि विश्वतो नः । सुमित्रा न आप ओषधयस्सन्तु दुर्मित्रास्तस्मै भूयासुर्योऽस्मान्द्वेष्टि यं च वयं द्विष्मः । आपो हि ष्ठा मयोभुवस्ता न ऊर्जे दधातन ॥ ०। १०। १। ११॥
१२ महे रणाय चक्षसे । यो वः शिवतमो रसस्तस्य भाजयतेह नः । उशतीरिव मातरः । तस्मा अरं गमाम वो यस्य क्षयाय जिन्वथ । आपो जनयथा च नः । हिरण्यशृङ्गं वरुणं प्रपद्ये तीर्थं मे देहि याचितः । यन्मया भुक्तमसाधूनां पापेभ्यश्च प्रतिग्रहः । यन्मे मनसा वाचा कर्मणा वा दुष्कृतं कृतम् । तन्न इन्द्रो वरुणो बृहस्पतिस्सविता च पुनन्तु पुनः पुनः । नमोऽग्नयेऽप्सुमते नम इन्द्राय नमो वरुणाय नमो वारुण्यै नमोऽद्भ्यः ॥ ०। १०। १। १२॥
१३ यदपां क्रूरं यदमेध्यं यदशान्तं तदपगच्छतात् । अत्याशनादतीपानाद्यच्च उग्रात्प्रतिग्रहात् । तन्नो वरुणो राजा पाणिना ह्यवमर्शतु । सोऽहमपापो विरजो निर्मुक्तो मुक्तकिल्बिषः । नाकस्य पृष्ठमारुह्य गच्छेद्ब्रह्म सलोकताम् । यश्चाप्सु वरुणस्स पुनात्वघमर्षणः । इमं मे गङ्गे यमुने सरस्वति शुतुद्रि स्तोमँ सचता परुष्णिया । असिक्निया मरुद्वृधे वितस्तयाऽऽर्जीकीये शृणुह्या सुषोमया । ऋतं च सत्यं चाभीद्धात्तपसोऽध्यजायत । ततो रात्रिरजायत ततः समुद्रो अर्णवः ॥ ०। १०। १। १३॥
१४ समुद्रादर्णवादधि संवथ्सरो अजायत । अहोरात्राणि विदधद्विश्वस्य मिषतो वशी । सूर्याचन्द्रमसौ धाता यथापूर्वमकल्पयत् । दिवं च पृथिवीं चान्तरिक्षमथो सुवः । यत्पृथिव्याँ रजस्स्वमान्तरिक्षे विरोदसी । इमाग्स्तदापो वरुणः पुनात्वघमर्षणः । पुनन्तु वसवः पुनातु वरुणः पुनात्वघमर्षणः । एष भूतस्य मध्ये भुवनस्य गोप्ता । एष पुण्यकृतां लोकानेष मृत्योर्हिरण्मयम् । द्यावापृथिव्योर्हिरण्मय ँ॒ स२ँश्रित ँ॒ सुवः ॥ ०। १०। १। १४॥
१५ स नस्सुवः स२ँशिशाधि । आर्द्रं ज्वलति ज्योतिरहमस्मि । ज्योतिर्ज्वलति ब्रह्माहमस्मि । योऽहमस्मि ब्रह्माहमस्मि । अहमस्मि ब्रह्माहमस्मि । अहमेवाहं मां जुहोमि स्वाहा । अकार्यकार्यवकीर्णी स्तेनो भ्रूणहा गुरुतल्पगः । वरुणोऽपामघमर्षणस्तस्मात् पापात् प्रमुच्यते । रजोभूमिस्त्व माँ रोदयस्व प्रवदन्ति धीराः । आक्रान्थ्समुद्रः प्रथमे विधर्मञ्जनयन्प्रजा भुवनस्य राजा । वृषा पवित्रे अधि

सानो अव्ये बृहथ्सोमो वावृधे सुवान इन्दुः ॥ ०। १०। १। १५॥ पुरस्ताद्यशो निहितं गुहासु मम चक्रतुण्डाय धीमहि तीक्ष्णदग्ग्ष्ट्राय धीमहि परि प्रतिष्ठितं देभुर्यच्छतु दधातनाद्यौऽर्णवस्सुवो राजैकं च ॥ १॥ रुद्रो रुद्रश्च दन्तिश्च नन्दिः षण्मुख एव च । गरुडो ब्रह्म विष्णुश्च नारसिꣳहस्तथैव च । आदित्योऽग्निश्च दुर्गिश्च क्रमेण द्वादशाम्भसि ॥ म म व च म सु वे ना व भा वै कात्यायनाय ॥

१६ जातवेदसे सुनवाम सोममरातीयतो निदहाति वेदः । स नः पर्षदति दुर्गाणि विश्वा नावेव सिन्धुं दुरिताऽत्यग्निः । तामग्निवर्णां तपसा ज्वलन्तीं वैरोचनीं कर्मफलेषु जुष्टाम् । दुर्गां देवीꣳ शरणमहं प्रपद्ये सुतरसि तरसे नमः । अग्ने त्वं पारया नव्यो अस्मान्थ्स्वस्तिभिरति दुर्गाणि विश्वा । पूश्च पृथ्वी बहुला न उर्वी भवा तोकाय तनयाय शंयोः । विश्वानि नो दुर्गहा जातवेदस्सिन्धुं न नावा दुरिताऽतिपर्षि । अग्ने अत्रिवन्मनसा गृणानोऽस्माकं बोध्यविता तनूनाम् । पृतनाजितꣳ सहमानमुग्रमग्निꣳ हुवेम परमाथ्सधस्थात् । स नः पर्षदति दुर्गाणि विश्वा क्षामद्देवो अतिदुरिताऽत्यग्निः । प्रत्नोषि कमीड्यो अध्वरेषु सनाच्च होता नव्यश्च सथ्सि । स्वां चाग्ने तनुवं पिप्रयस्वास्मभ्यं च सौभगमायजस्व । गोभिर्जुष्टमयुजो निषिक्तं तवेन्द्र विष्णोरनुसंचरेम । नाकस्य पृष्ठमभि संवसानो वैष्णवीं लोक इह मादयन्ताम् ॥ ०। १०। २। १६॥

दुरिताऽत्यग्निश्चत्वारि च ॥ २॥

१७ भूरन्नमग्नये पृथिव्यै स्वाहा भुवोऽन्नं वायवेऽन्तरिक्षाय स्वाहा सुवरन्नमादित्याय दिवे स्वाहा भूर्भुवस्सुवरन्नं चन्द्रमसे दिग्भ्यस्स्वाहा नमो देवेभ्यस्स्वधा पितृभ्यो भूर्भुवस्सुवरन्नमोम् ॥

०। १०। ३। १७॥ ॥ ३॥

१८ भूरग्नये पृथिव्यै स्वाहा भुवो वायवेऽन्तरिक्षाय स्वाहा सुवरादित्याय दिवे स्वाहा भूर्भुवस्सुवश्चन्द्रमसे दिग्भ्यस्स्वाहा नमो देवेभ्यस्स्वधा पितृभ्यो भूर्भुवस्सुवरग्न ओम् ॥

०। १०। ४। १८॥ ॥ ४॥

१९ भूरग्नये च पृथिव्यै च महते च स्वाहा भुवो वायवे चान्तरिक्षाय च महते च स्वाहा सुवरादित्याय च दिवे च महते च स्वाहा भूर्भुवस्सुवश्चन्द्रमसे च नक्षत्रेभ्यश्च दिग्भ्यश्च महते च स्वाहा नमो देवेभ्यस्स्वधा पितृभ्यो भूर्भुवस्सुवर्महरोम् ॥ ०। १०। ५। १९॥ ॥ ५॥

२० पाहि नो अग्न एनसे स्वाहा । पाहि नो विश्ववेदसे स्वाहा । यज्ञं पाहि विभावसो

स्वाहा । सर्वं पाहि शतक्रतो स्वाहा ॥ ०। १०। ६। २०॥ ॥ ६॥

२१ पाहि नो अग्न एकया । पाह्युत द्वितीयया । पाह्यूर्जं तृतीयया । पाहि गीर्भिश्चतसृभिर्वसो स्वाहा ॥ ०। १०। ७। २१॥ ॥ ७॥

२२ यश्छन्दसामृषभो विश्वरूपश्छन्दोभ्यश्छन्दाग्स्याविवेश । सताꣳ शिक्यः पुरोवाचोपनिषदिन्द्रो ज्येष्ठ इन्द्रियाय ऋषिभ्यो नमो देवेभ्यस्स्वधा पितृभ्यो भूर्भुवस्सुवश्छन्द ओम् ॥ ०। १०। ८। २२॥ ॥ ८॥

२३ नमो ब्रह्मणे धारणं मे अस्त्वनिराकरणं धारयिता भूयासं कर्णयोः श्रुतं मा च्योढ्वं ममामुष्य ओम् ॥ ०। १०। ९। २३॥ ॥ ९॥

२४ ऋतं तपस्सत्यं तपः श्रुतं तपः शान्तं तपो दमस्तपः शमस्तपो दानं तपो यज्ञं तपो भूर्भुवस्सुवर्ब्रह्मैतदुपास्यैतत्तपः ॥ ०। १०। १०। २४॥ ॥ १०॥

२५ यथा वृक्षस्य संपुष्पितस्य दूराद्गन्धो वात्येवं पुण्यस्य कर्मणो दूराद्गन्धो वाति यथाऽसिधारां कर्तेऽवहितामवक्रामे यद्युवे युवे हवा विह्वयिष्यामि कर्तं पतिष्यामीत्येवममृतादात्मानं जुगुप्सेत् ॥
०। १०। ११। २५॥ ॥ ११॥

२६ अणोरणीयान्महतो महीयानात्मा गुहायां निहितोऽस्य जन्तोः । तमक्रतुं पश्यति वीतशोको धातुः प्रसादान्महिमानमीशम् । सप्त प्राणाः प्रभवन्ति तस्माथ्सप्तार्चिषस्समिधस्सप्त जिह्वाः । सप्त इमे लोका येषु चरन्ति प्राणा गुहाशयां निहितास्सप्तसप्त । अतस्समुद्रा गिरयश्च सर्वेऽस्माथ्स्यन्दन्ते सिन्धवस्सर्वरूपाः । अतश्च विश्वा ओषधयो रसाच्च येनैष भूतस्तिष्ठत्यन्तरात्मा । ब्रह्मा देवानां पदवीः कवीनामृषिर्विप्राणां महिषो मृगाणाम् । श्येनो गृद्ध्राणाग् स्वधितिर्वनानाꣳ सोमः पवित्रमत्येति रेभन्न् । अजामेकां लोहितशुक्लकृष्णां बह्वीं प्रजां जनयन्तीꣳ सरूपाम् । अजो ह्येको जुषमाणोऽनुशेते जहात्येनां भुक्तभोगामजोऽन्यः ॥ ०। १०। १२। २६॥

२७ हꣳसः शुचिषद्वसुरन्तरिक्षसद्धोता वेदिषदतिथिर्दुरोणसत् । नृषद्वरसदृतसद्व्योमसदब्जा गोजा ऋतजा अद्रिजा ऋतं बृहत् । घृतं मिमिक्षिरे घृतमस्य योनिर्घृते श्रितो घृतमुवस्य धाम । अनुष्वधमावह मादयस्व स्वाहाकृतं वृषभ वक्षि हव्यम् । समुद्रादूर्मिर्मधुमाꣳ उदारदुपाꣳशुना सममृतत्वमानट् । घृतस्य नाम गुह्यं यदस्ति जिह्वा देवानाममृतस्य नाभिः । वयं नाम प्रब्रवामा घृतेनास्मिन्, यज्ञे धारयामा नमोभिः । उप ब्रह्मा शृणवच्छस्यमानं चतुः शृङ्गोऽवमीद्गौर एतत् । चत्वारि शृङ्गा त्रयो अस्य पादा द्वे शीर्षे

सप्त हस्तासो अस्य । त्रिधा बद्धो वृषभो रोरवीति महो देवो मर्त्याꣳ आविवेश ॥ ०। १०। १२। २७॥
२८ त्रिधा हितं पणिभिर्गुह्यमानं गवि देवासो घृतमन्वविन्दन् । इन्द्र एकꣳ सूर्य एकं जजान वेनादेकग्ग् स्वधया निष्टतक्षुः । यो देवानां प्रथमं पुरस्ताद्विश्वाधियो रुद्रो महर्षिः । हिरण्यगर्भं पश्यत जायमानꣳ स नो देवः शुभया स्मृत्यास्संयुनक्तु । यस्मात्परं नापरमस्ति किंचिद्यस्मान्नाणीयो न ज्यायोऽस्ति कश्चित् । वृक्ष इव स्तब्धो दिवि तिष्ठत्येकस्तेनेदं पूर्णं पुरुषेण सर्वम् । न कर्मणा न प्रजया धनेन त्यागेनैके अमृतत्वमानशुः । परेण नाकं निहितं गुहायां विभ्राजदेतद्यतयो विशन्ति । वेदान्तविज्ञानसुनिश्चितार्थाः संन्यासयोगाद्यतयः शुद्धसत्त्वाः । ते ब्रह्मलोके तु परान्तकाले परामृतात्परिमुच्यन्ति सर्वे । दह्रं विपापं परमेश्मभूतं यत्पुण्डरीकं पुरमध्यसग्ग्स्थम् । तत्रापि दह्रं गगनं विशोकस्तस्मिन्, यदन्तस्तदुपासितव्यम् । यो वेदादौ स्वरः प्रोक्तो वेदान्ते च प्रतिष्ठितः । तस्य प्रकृतिलीनस्य यः परस्स महेश्वरः ॥ ०। १०। १२। २८॥ अजोऽन्य आविवेश सर्वे चत्वारि च ॥ १२॥
२९ सहस्रशीर्षं देवं विश्वाक्षं विश्वशंभुवम् । विश्वं नारायणं देवमक्षरं परमं पदम् । विश्वतः परमान्नित्यं विश्वं नारायणꣳ हरिम् । विश्वमेवेदं पुरुषस्तद्विश्वमुपजीवति । पतिं विश्वस्यात्मेश्वरꣳ शाश्वतꣳ शिवमच्युतम् । नारायणं महाज्ञेयं विश्वात्मानं परायणम् । नारायण परो ज्योतिरात्मा नारयणः परः । नारायण परं ब्रह्मतत्त्वं नारायणः परः । नारायण परो ध्याता ध्यानं नारायणः परः । यच्च किंचिज्जगथ्सर्वं दृश्यते श्रूयतेऽपि वा ॥ ०। १०। १३। २९॥
३० अन्तर्बहिश्च तथ्सर्वं व्याप्य नारायणस्स्थितः । अनन्तमव्ययं कविꣳ समुद्रेऽन्तं विश्वशम्भुवम् । पद्मकोशप्रतीकाशꣳ हृदयं चाप्यधोमुखम् । अधो निष्ट्या वितस्त्यान्ते नाभ्यामुपरि तिष्ठति । ज्वालमालाकुलं भाती विश्वस्यायतनं महत् । सन्ततꣳ शिलाभिस्तु लम्बत्याकोशसन्निभम् । तस्यान्ते सुषिरꣳ सूक्ष्मं तस्मिन्थ्सर्वं प्रतिष्ठितम् । तस्य मध्ये महानग्निर्विश्वार्चिर्विश्वतोमुखः । सोऽग्रभुग्विभजन्तिष्ठन्नाहारमजरः कविः । तिर्यगूर्ध्वमधः शायी रश्मयस्तस्य सन्तता । सन्तापयति स्वं देहमापादतलमस्तकः । तस्य मध्ये वह्निशिखा अणीयोर्ध्वा व्यवस्थितः । नीलतोयदमध्यस्थाद्विद्युल्लेखेव भास्वरा । नीवारशूकवत्तन्वी पीता भास्वत्यणूपमा । तस्याः शिखाया मध्ये परमात्मा व्यवस्थितः । स ब्रह्म स शिवः स हरिः सेन्द्रः सोऽक्षरः परमस्स्वराट् ॥ ०। १०। १३। ३०॥ अपि

वा सन्तता षट्व ॥ १३॥
३१ आदित्यो वा एष एतन्मण्डलं तपति तत्र ता ऋचस्तदृचा मण्डलꣳ स ऋचां लोकोऽथ य एष एतस्मिन्मण्डलेऽर्चिर्दीप्यते तानि सामानि स साम्नां लोकोऽथ य एष एतस्मिन्मण्डलेऽर्चिषि पुरुषस्तानि यजूꣳषि स यजुषा मण्डलꣳ स यजुषां लोकस्सैषा त्रय्येव विद्या तपति य एषोऽन्तरादित्ये हिरण्मयः पुरुषः ॥ ०। १०। १४। ३१॥ ॥ १४॥
३२ आदित्यो वै तेज ओजो बलं यशश्चक्षुः श्रोत्रमात्मा मनो मन्युर्मनुर्मृत्युः सत्यो मित्रो वायुराकाशः प्राणो लोकपालः कः किं कं तथ्सत्यमन्नममृतो जीवो विश्वः कतमः स्वयंभु ब्रह्मैतदमृत एष पुरुष एष भूतानामधिपतिर्ब्रह्मणः सायुज्यꣳ सलोकतामाप्नोत्येतासामेव देवतानाꣳ सायुज्यꣳ सार्ष्टिताꣳ समानलोकतामाप्नोति य एवं वेदेत्युपनिषत् ॥ ०। १०। १५। ३२॥
॥ १५॥
३३ निधनपतये नमः । निधनपतान्तिकाय नमः । ऊर्ध्वाय नमः । ऊर्ध्वलिङ्गाय नमः । हिरण्याय नमः । हिरण्यलिङ्गाय नमः । सुवर्णाय नमः । सुवर्णलिङ्गाय नमः । दिव्याय नमः । दिव्यलिङ्गाय नमः ॥ ०। १०। १६। ३३॥
३४ भवाय नमः । भवलिङ्गाय नमः । शर्वाय नमः । शर्वलिङ्गाय नमः । शिवाय नमः । शिवलिङ्गाय नमः । ज्वलाय नमः । ज्वललिङ्गाय नमः । आत्माय नमः । आत्मलिङ्गाय नमः । परमाय नमः । परमलिङ्गाय नमः । एतथ्सोमस्य सूर्यस्य सर्वलिङ्गग्ग्ं स्थापयति पाणिमन्त्रं पवित्रम् ॥ ०। १०। १६। ३४॥ ॥ १६॥
३५ सद्योजातं प्रपद्यामि सद्योजाताय वै नमो नमः । भवेभवे नातिभवे भवस्व माम् । भवोद्भवाय नमः ॥ ०। १०। १७। ३५॥ ॥ १७॥
३६ वामदेवाय नमो ज्येष्ठाय नमः श्रेष्ठाय नमो रुद्राय नमः कालाय नमः कलविकरणाय नमो बलविकरणाय नमो बलाय नमो बलप्रमथनाय नमस्सर्वभूतदमनाय नमो मनोन्मनाय नमः ॥ ०। १०। १८। ३६॥ ॥ १८॥
३७ अघोरेभ्योऽथ घोरेभ्यो घोरघोरतरेभ्यः । सर्वेभ्यस्सर्व शर्वेभ्यो नमस्ते अस्तु रुद्ररूपेभ्यः ॥ ०। १०। १९। ३७॥ ॥ १९॥
३८ तत्पुरुषाय विद्महे महादेवाय धीमहि । तन्नो रुद्रः प्रचोदयात् ॥ ०। १०। २०। ३८॥ ॥ २०॥
३९ ईशानः सर्वविद्यानामीश्वरः सर्वभूतानां ब्रह्माधिपतिर्ब्रह्मणोऽधिपतिर्ब्रह्मा शिवो मे अस्तु सदाशिवोम् ॥ ०। १०। २१। ३९॥ ॥ २१॥

४० नमो हिरण्यबाहवे हिरण्यवर्णाय हिरण्यरूपाय हिरण्यपतयेऽम्बिकापतय उमापतये पशुपतये नमो नमः ॥ ०। १०। २२। ४०॥ ॥ २२॥

४१ ऋतꣳ सत्यं परं ब्रह्म पुरुषं कृष्णपिङ्गलम् । ऊर्ध्वरेतं विरूपाक्षं विश्वरूपाय वै नमो नमः ॥ ०। १०। २३। ४१॥ ॥ २३॥

४२ सर्वो वै रुद्रस्तस्मै रुद्राय नमो अस्तु । पुरुषो वै रुद्रस्सन्महो नमोनमः । विश्वं भूतं भुवनं चित्रं बहुधा जातं जायमानं च यत् । सर्वो ह्येष रुद्रस्तस्मै रुद्राय नमो अस्तु ॥ ०। १०। २४। ४२॥ ॥ २४॥

४३ कद्रुद्राय प्रचेतसे मीढुष्टमाय तव्यसे । वोचेम शंतमꣳ हृदे । सर्वो ह्येष रुद्रस्तस्मै रुद्राय नमो अस्तु ॥ ०। १०। २५। ४३॥ ॥ २५॥

४४ यस्य वैकङ्कत्यग्निहोत्रहवणी भवति प्रत्येवास्याहुतयस्तिष्ठन्त्यथो प्रतिष्ठित्यै ॥ ०। १०। २६। ४४॥ ॥ २६॥

४५ कृणुष्व पाज इति पञ्च ॥ ०। १०। २७। ४५॥ ॥ २७॥

४६ अदितिर्देवा गन्धर्वा मनुष्याः पितरोऽसुरास्तेषाꣳ सर्वभूतानां माता मेदिनी महता मही सावित्री गायत्री जगत्युर्वी पृथ्वी बहुला विश्वा भूता कतमा काया सा सत्येत्यमृतेति वसिष्ठः ॥ ०। १०। २८। ४६॥ ॥ २८॥

४७ आपो वा इदꣳ सर्वं विश्वा भूतान्यापः प्राणा वा आपः पशव आपोऽन्नमापोऽमृतमापः सम्राडापो विराडापः स्वराडापश्छन्दाग्‌स्यापो ज्योतीग्‌ष्यापो यजूग्‌ष्यापः सत्यमापः सर्वा देवता आपो भूर्भुवः सुवराप ओम् ॥ ०। १०। २९। ४७॥ ॥ २९॥

४८ आपः पुनन्तु पृथिवीं पृथिवी पूता पुनातु माम् । पुनन्तु ब्रह्मणस्पतिर्ब्रह्म पूता पुनातु माम् ॥ यदुच्छिष्टमभोज्यं यद्वा दुश्चरितं मम । सर्वं पुनन्तु मामापोऽसतां च प्रतिग्रहग्ग् स्वाहा ॥ ०। १०। ३०। ४८॥ ॥ ३०॥

४९ अग्निश्च मा मन्युश्च मन्युपतयश्च मन्युकृतेभ्यः । पापेभ्यो रक्षन्ताम् । यदह्ना पापमकारषम् । मनसा वाचा हस्ताभ्याम् । पद्भ्यामुदरेण शिश्ना । अहस्तदवलुम्पतु । यत्किंच दुरितं मयि । इदमहं माममृतयोनौ । सत्ये ज्योतिषि जुहोमि स्वाहा ॥ ०। १०। ३१। ४९॥ ॥ ३१॥

५० सूर्यश्च मा मन्युश्च मन्युपतयश्च मन्युकृतेभ्यः । पापेभ्यो रक्षन्ताम् । यद्रात्रिया पापमकारषम् । मनसा वाचा हस्ताभ्याम् । पद्भ्यामुदरेण शिश्ना । रात्रिस्तदवलुम्पतु । यत्किंच दुरितं मयि । इदमहं माममृतयोनौ । सूर्ये ज्योतिषि जुहोमि स्वाहा ॥ ०।

१०। ३२। ५०॥ ॥ ३२॥
५१ ओमित्येकाक्षरं ब्रह्म । अग्निर्देवता ब्रह्म इत्यार्षम् । गायत्रं छन्दं परमात्मं सरूपम् । सायुज्यं विनियोगम् ॥ ०। १०। ३३। ५१॥ ॥ ३३॥
५२ आयातु वरदा देवी अक्षरं ब्रह्म सम्मितम् । गायत्रीं छन्दसां मातेदं ब्रह्म जुषस्व मे । यदह्नात्कुरुते पापं तदह्नात्प्रतिमुच्यते । यद्रात्रियात्कुरुते पापं तद्रात्रियात्प्रतिमुच्यते । सर्ववर्णे महादेवि सन्ध्याविद्ये सरस्वति ॥ ०। १०। ३४। ५२॥ ॥ ३४॥
५३ ओजोऽसि सहोऽसि बलमसि भ्राजोऽसि देवानां धामनामाऽसि विश्वमसि विश्वायुस्सर्वमसि सर्वायुरभिभूरों गायत्रीमावाहयामि सावित्रीमावाहयामि सरस्वतीमावाहयामि छन्दर्षीनावाहयामि श्रियमावाहयामि गायत्रिया गायत्रीच्छन्दो विश्वामित्र ऋषिः सविता देवताऽग्निर्मुखं ब्रह्मा शिरो विष्णुर्हृदयꣳ रुद्रः शिखा पृथिवी योनिः प्राणापानव्यानोदानसमाना सप्राणा श्वेतवर्णा सांख्यायनसगोत्रा गायत्री चतुर्विꣳशत्यक्षरा त्रिपदा षटकुक्षिः पञ्चशीर्षोपनयने विनियोग ओं भूः । ओं भुवः । ओꣳ सुवः । ओं महः । ओं जनः । ओं तपः ॥ ओꣳ सत्यम् । ओं तथ्सवितुर्वरेण्यं भर्गो देवस्य धीमहि । धियो यो नः प्रचोदयात् । ओमापो ज्योती रसोऽमृतं ब्रह्म भूर्भुवस्सुवरोम् ॥ ०। १०। ३५। ५३॥ ॥ ३५॥
५४ उत्तमे शिखरे जाते भूम्यां पर्वतमूर्धनि । ब्राह्मणेभ्योऽभ्यनुज्ञाता गच्छ देवि यथासुखम् । स्तुतो मया वरदा वेदमाता प्रचोदयन्ती पवने द्विजाता । आयुः पृथिव्यां द्रविणं ब्रह्मवर्चसं मह्यं दत्त्वा प्रजातुं ब्रह्मलोकम् ॥ ०। १०। ३६। ५४॥ ॥ ३६॥
५५ घृणिस्सूर्य आदित्यो न प्रभा वात्यक्षरम् । मधु क्षरन्ति तद्रसम् । सत्यं वै तद्रसमापो ज्योती रसोऽमृतं ब्रह्म भूर्भुवस्सुवरोम् ॥ ०। १०। ३७। ५५॥ ॥ ३७॥
५६ ब्रह्ममेतु माम् । मधुमेतु माम् । ब्रह्ममेव मधुमेतु माम् । यास्ते सोम प्रजा वथ्सोऽभि सो अहम् । दुष्ष्वप्रहन्दुरुष्षह । यास्ते सोम प्राणाग्स्ताञ्जुहोमि । त्रिसुपर्णमयाचितं ब्राह्मणाय दद्यात् । ब्रह्महत्यां वा एते घ्नन्ति । ये ब्राह्मणास्त्रिसुपर्णं पठन्ति । ते सोमं प्राप्नुवन्ति । आसहस्रात्पङ्क्तिं पुनन्ति । ओम् ॥ ०। १०। ३८। ५६॥ ॥ ३८॥
५७ ब्रह्म मेधया । मधु मेधया । ब्रह्ममेव मधु मेधया । अद्या नो देव सवितः प्रजावथ्सावीः सौभगम् । परा दुष्ष्वप्नियꣳ सुव । विश्वानि देव सवितर्दुरितानि परासुव । यद्भद्रं तन्म आसुव । मधु वाता ऋतायते मधु क्षरन्ति सिन्धवः । माध्वीर्नः सन्त्वोषधीः । मधु नक्तमुतोषसि मधुमत्पार्थिवꣳ रजः । मधु द्यौरस्तु नः पिता । मधु

मान्नो वनस्पतिर्मधुमाँ२ अस्तु सूर्यः । माध्वीर्गावो भवन्तु नः । य इमं त्रिसुपर्णमयाचितं ब्राह्मणाय दद्यात् । भ्रूणहत्यां वा एते घ्नन्ति । ये ब्राह्मणास्त्रिसुपर्णं पठन्ति । ते सोमं प्राप्नुवन्ति । आसहस्रात्पङ्क्तिं पुनन्ति । ओम् ॥ ०। १०। ३९। ५७॥ ॥ ३९॥
५८ ब्रह्म मेधवा । मधु मेधवा । ब्रह्ममेव मधु मेधवा । ब्रह्मा देवानां पदवीः कवीनामृषिर्विप्राणां महिषो मृगाणाम् । श्येनो गृद्ध्राणाग् स्वधितिर्वनानाँ२ सोमः पवित्रमत्येति रेभन्न् । ह२ँसः शुचिषद्वसुरन्तरिक्षसद्धोता वेदिषदतिथिर्दुरोणसत् । नृषद्वरसदृतसद्व्योमसदब्जा गोजा ऋतजा अद्रिजा ऋतं बृहत् । ऋचे त्वा रुचे त्वा समिथ्स्रवन्ति सरितो न धेनाः । अन्तर्हृदा मनसा पूयमानाः । घृतस्य धारा अभिचाकशीमि । हिरण्ययो वेतसो मद्ध्य आसाम् । तस्मिन्थ्सुपर्णो मधुकृत्कुलायी भजन्नास्ते मधु देवताभ्यः । तस्यासते हरयः सप्त तीरे स्वधां दुहाना अमृतस्य धाराम् । य इदं त्रिसुपर्णमयाचितं ब्राह्मणाय दद्यात् । वीरहत्यां वा एते घ्नन्ति । ये ब्राह्मणास्त्रिसुपर्णं पठन्ति । ते सोमं प्राप्नुवन्ति । आसहस्रात्पङ्क्तिं पुनन्ति । ओम् ॥ ०। १०। ४०। ५८॥ ॥ ४०॥
५९ मेधा देवी जुषमाणा न आगाद्विश्वाची भद्रा सुमनस्यमाना । त्वया जुष्टा नुदमाना दुरुक्तान्बृहद्वदेम विदथे सुवीराः । त्वया जुष्ट ऋषिर्भवति देवि त्वया ब्रह्मा गतश्रीरुत त्वया । त्वया जुष्टश्चित्रं विन्दते वसु सा नो जुषस्व द्रविणो न मेधे ॥ ०। १०। ४१। ५९॥
॥ ४१॥
६० मेधां म इन्द्रो ददातु मेधां देवी सरस्वती । मेधां मे अश्विनावुभावाधत्तां पुष्करस्रजा । अप्सरासु च या मेधा गन्धर्वेषु च यन्मनः । दैवीं मेधा सरस्वती सा मां मेधा सुरभिर्जुषताग् स्वाहा ॥ ०। १०। ४२। ६०॥ ॥ ४२॥
६१ आ मां मेधा सुरभिर्विश्वरूपा हिरण्यवर्णा जगती जगम्या । ऊर्जस्वती पयसा पिन्वमाना सा मां मेधा सुप्रतीका जुषन्ताम् ॥ ०। १०। ४३। ६१॥ ॥ ४३॥
६२ मयि मेधां मयि प्रजां मय्यग्निस्तेजो दधातु मयि मेधां मयि प्रजां मयीन्द्र इन्द्रियं दधातु मयि मेधां मयि प्रजां मयि सूर्यो भ्राजो दधातु ॥ ०। १०। ४४। ६२॥ ॥ ४४॥
६३ अपैतु मृत्युरमृतं न आगन्वैवस्वतो नो अभयं कृणोतु । पर्णं वनस्पतेरिवाभि नः शीयताँ२ रयिस्सचतां नः शचीपतिः ॥ ०। १०। ४५। ६३॥ ॥ ४५॥
६४ परं मृत्यो अनु परेहि पन्थां यस्ते स्व इतरो देवयानात् । चक्षुष्मते शृण्वते ते

ब्रवीमि मा नः प्रजाꣳ रीरिषो मोत वीरान् ॥
०। १०। ४६। ६४॥ ॥ ४६॥
६५ वात प्राणं मनसाऽन्वारभामहे प्रजापतिं यो भुवनस्य गोपाः । स नो मृत्योस्त्रायतां पात्वꣳहसो ज्योग्जीवा जरामशीमहि ॥ ०। १०। ४७। ६५॥ ॥ ४७॥
६६ अमुत्रभूयादध यद्यमस्य बृहस्पते अभिशस्तेरमुञ्चः । प्रत्यौहतामश्विना मृत्युमस्मद्देवानामग्ने भिषजा शचीभिः ॥ ०। १०। ४८। ६६॥ ॥ ४८॥
६७ हरिꣳ हरन्तमनुयन्ति देवा विश्वस्येशानं वृषभं मतीनाम् । ब्रह्म सरूपमनु मेदमागादयनं मा विवधीर्विक्रमस्व ॥ ०। १०। ४९। ६७॥ ॥ ४९॥
६८ शल्कैरग्निमिन्धान उभौ लोकौ सनेमहम् । उभयोर्लोकयोर्ऋध्वाऽति मृत्युं तराम्यहम् ॥ ०। १०। ५०। ६८॥ ॥ ५०॥
६९ मा छिदो मृत्यो मा वधीर्मा मे बलं विवृहो मा प्रमोषीः । प्रजां मा मे रीरिष आयुरुग्र नृचक्षसं त्वा हविषा विधेम ॥ ०। १०। ५१। ६९॥ ॥ ५१॥
७० मा नो महान्तमुत मा नो अर्भकं मा न उक्षन्तमुत मा न उक्षितम् । मा नो वधीः पितरं मोत मातरं प्रिया मा नस्तनुवो रुद्र रीरिषः ॥ ०। १०। ५२। ७०॥ ॥ ५२॥
७१ मा नस्तोके तनये मा न आयुषि मा नो गोषु मा नो अश्वेषु रीरिषः । वीरान्मा नो रुद्र भामितो वधीर्हविष्मन्तो नमसा विधेम ते ॥ ०। १०। ५३। ७१॥ ॥ ५३॥
७२ प्रजापते न त्वदेतान्यन्यो विश्वा जातानि परि ता बभूव । यत्कामास्ते जुहुमस्तन्नो अस्तु वयꣳस्याम पतयो रयीणाम् ॥ ०। १०। ५४। ७२॥ ॥ ५४॥
७३ स्वस्तिदा विशस्पतिर्वृत्रहा विमृधो वशी । वृषेन्द्रः पुर एतु नस्स्वस्तिदा अभयंकरः ॥ ०। १०। ५५। ७३॥ ॥ ५५॥
७४ त्र्यम्बकं यजामहे सुगन्धिं पुष्टिवर्धनम् । उर्वारुकमिव बन्धनान्मृत्योर्मुक्षीय मामृतात् ॥ ०। १०। ५६। ७४॥ ॥ ५६॥
७५ ये ते सहस्रमयुतं पाशा मृत्यो मर्त्याय हन्तवे । तान्, यज्ञस्य मायया सर्वानवयजामहे ॥ ०। १०। ५७। ७५॥ ॥ ५७॥
७६ मृत्यवे स्वाहा मृत्यवे स्वाहा ॥ ०। १०। ५८। ७६॥ ॥ ५८॥
७७ देवकृतस्यैनसोऽवयजनमसि स्वाहा । मनुष्यकृतस्यैनसोऽवयजनमसि स्वाहा । पितृकृतस्यैनसोऽवयजनमसि स्वाहा । आत्मकृतस्यैनसोऽवयजनमसि स्वाहा । अन्यकृतस्यैनसोऽवयजनमसि स्वाहा । अस्मत्कृतस्यैनसोऽवयजनमसि स्वाहा ।

यद्दिवा च नक्तं चैनश्चकृम तस्यावयजनमसि स्वाहा । यथ्स्वपन्तश्च जाग्रतश्चैनश्चकृम तस्यावयजनमसि स्वाहा । यथ्सुषुप्तश्च जाग्रतश्चैनश्चकृम तस्यावयजनमसि स्वाहा । यद्विद्वाँ सश्चाविद्वाँ सश्चैनश्चकृम तस्यावयजनमसि स्वाहा । एनस एनसोऽवयजनमसि स्वाहा ॥ ०। १०। ५९। ७७॥ ॥ ५९॥

७८ यद्वो देवाश्चकृम जिह्वया गुरु मनसो वा प्रयुती देवहेडनम् । अरा वायो नो अभि दुच्छुनायते तस्मिन्तदेनो वसवो निधेतन स्वाहा ॥ ०। १०। ६०। ७८॥ ॥ ६०॥

७९ कामोऽकार्षीन्नमो नमः । कामोऽकार्षीत्कामः करोति नाहं करोमि कामः कर्ता नाहं कर्ता कामः कारयिता नाहं कारयिता एष ते काम कामाय स्वाहा ॥ ०। १०। ६१। ७९॥ ॥ ६१॥

८० मन्युरकार्षीन्नमो नमः । मन्युरकार्षीन्मन्युः करोति नाहं करोमि मन्युः कर्ता नाहं कर्ता मन्युः कारयिता नाहं कारयिता एष ते मन्यो मन्यवे स्वाहा ॥ ०। १०। ६२। ८०॥ ॥ ६२॥

८१ तिलाञ्जुहोमि सरसाँ सपिष्टान्गन्धार मम चित्ते रमन्तु स्वाहा । गावो हिरण्यं धनमन्नपानँ सर्वेषाग् श्रियै स्वाहा । श्रियं च लक्ष्मिं च पुष्टिं च कीर्तिं चाऽऽनृण्यताम् । ब्रह्मण्यं बहुपुत्रताम् । श्रद्धामेधे प्रजाः संददातु स्वाहा ॥
०। १०। ६३। ८१॥ ॥ ६३॥

८२ तिलाः कृष्णास्तिलाः श्वेतास्तिलाः सौम्या वशानुगाः । तिलाः पुनन्तु मे पापं यत्किञ्चिद्दुरितं मयि स्वाहा ॥ चोरस्यान्नं नवश्राद्धं ब्रह्महा गुरुतल्पगः । गोस्तेयँ सुरापानं भ्रूणहत्या तिला शान्तिँ शमयन्तु स्वाहा ॥ श्रीश्च लक्ष्मीश्च पुष्टीश्च कीर्तिं चाऽऽनृण्यताम् । ब्रह्मण्यं बहुपुत्रताम् । श्रद्धामेधे प्रज्ञा तु जातवेदः संददातु स्वाहा ॥
०। १०। ६४। ८२॥ ॥ ६४॥

८३ प्राणापानव्यानोदानसमाना मे शुध्यन्तां ज्योतिरहं विरजा विपाप्मा भूयासग्ग् स्वाहा । वाङ्मनश्चक्षुः श्रोत्रजिह्वाघ्राणरेतो बुद्ध्याकूतिः संकल्पा मे शुध्यन्तां ज्योतिरहं विरजा विपाप्मा भूयासग्ग् स्वाहा । त्वक्चर्म माँ स रुधिर मेदो मज्जा स्नायवोऽस्थीनि मे शुध्यन्तां ज्योतिरहं विरजा विपाप्मा भूयासग्ग् स्वाहा । शिरःपाणि पाद पार्श्व पृष्ठोरूदर जङ्घ शिश्नोपस्थ पायवो मे शुध्यन्तां ज्योतिरहं विरजा विपाप्मा भूयासग्ग् स्वाहा । उत्तिष्ठ पुरुष हरित पिङ्गल लोहिताक्षि देहि देहि ददापयिता मे शुध्यन्तां ज्योतिरहं विरजा विपाप्मा भूयासग्ग् स्वाहा ॥ ०। १०। ६५। ८३॥ ॥ ६५॥

८४ पृथिव्यापस्तेजो वायुराकाशा मे शुध्यन्तां ज्योतिरहं विरजा विपाप्मा भूयासग्ग्

स्वाहा । शब्दस्पर्शरूपरसगन्धा मे शुध्यन्तां ज्योतिरहं विरजा विपाप्मा भूयासग्ग् स्वाहा । मनोवाक्कायकर्माणि मे शुध्यन्तां ज्योतिरहं विरजा विपाप्मा भूयासग्ग् स्वाहा । अव्यक्तभावैरहंकारैर्ज्योतिरहं विरजा विपाप्मा भूयासग्ग् स्वाहा । आत्मा मे शुध्यन्तां ज्योतिरहं विरजा विपाप्मा भूयासग्ग् स्वाहा । अन्तरात्मा मे शुध्यन्तां ज्योतिरहं विरजा विपाप्मा भूयासग्ग् स्वाहा । परमात्मा मे शुध्यन्तां ज्योतिरहं विरजा विपाप्मा भूयासग्ग् स्वाहा । क्षुधे स्वाहा । क्षुत्पिपासाय स्वाहा । विविट्ट्यै स्वाहा । ऋग्विधानाय स्वाहा । कषोत्काय स्वाहा । क्षुत्पिपासामलं ज्येष्ठामलक्ष्मीर्नाशयाम्यहम् । अभूतिमसमृद्धिं च सर्वान्निर्णुद मे पाप्मान२ँ स्वाहा । अन्नमय प्राणमय मनोमय विज्ञान मयमानन्दमयमात्मा मे शुध्यन्तां ज्योतिरहं विरजा विपाप्मा भूयासग्ग् स्वाहा ॥ ०। १०। ६६। ८४॥ ॥ ६६॥

८५ अग्नये स्वाहा । विश्वेभ्यो देवेभ्यस्स्वाहा । ध्रुवाय भूमाय स्वाहा । ध्रुवक्षितये स्वाहा । अच्युतक्षितये स्वाहा । अग्नये स्विष्टकृते स्वाहा । धर्माय स्वाहा । अधर्माय स्वाहा । अद्भ्यस्स्वाहा । ओषधिवनस्पतिभ्यः स्वाहा ॥ ०। १०। ६७। ८५॥

८६ रक्षोदेवजनेभ्यस्स्वाहा । गृह्याभ्यस्स्वाहा । अवसानेभ्यस्स्वाहा । अवसानपतिभ्यस्स्वाहा । सर्वभूतेभ्यस्स्वाहा । कामाय स्वाहा । अन्तरिक्षाय स्वाहा । यदेजति जगति यच्च चेष्टति नाम्नो भागोऽयं नाम्ने स्वाहा । पृथिव्यै स्वाहा । अन्तरिक्षाय स्वाहा ॥ ०। १०। ६७। ८६॥

८७ दिवे स्वाहा । सूर्याय स्वाहा । चन्द्रमसे स्वाहा । नक्षत्रेभ्यस्स्वाहा । इन्द्राय स्वाहा । बृहस्पतये स्वाहा । प्रजापतये स्वाहा । ब्रह्मणे स्वाहा । स्वधा पितृभ्यस्स्वाहा । नमो रुद्राय पशुपतये स्वाहा ॥
०। १०। ६७। ८७॥

८८ देवेभ्यस्स्वाहा । पितृभ्यस्स्वधाऽस्तु । भूतेभ्यो नमः । मनुष्येभ्यो हन्ता । प्रजापतये स्वाहा । परमेष्ठिने स्वाहा । यथा कूपः शतधारः सहस्रधारो अक्षितः । एवा मे अस्तु धान्य२ँ सहस्रधारमक्षितम् । धनधान्यै स्वाहा । ये भूताः प्रचरन्ति दिवानक्तं बलिमिच्छन्तो वितुदस्य प्रेष्याः । तेभ्यो बलिं पुष्टिकामो हरामि मयि पुष्टिं पुष्टिपतिर्दधातु स्वाहा ॥ ०। १०। ६७। ८८॥

ओषधिवनस्पतिभ्यः स्वाहाऽन्तरिक्षाय स्वाहा नमो रुद्राय पशुपतये स्वाहा वितुदस्य प्रेष्या एकं च ॥ ६७॥

८९ ओं तद्ब्रह्म । ओं तद्वायुः । ओं तदात्मा । ओं तथ्सत्यम् । ओं तथ्सर्वम् । ओं तत्पुरोर्नमः । अन्तश्चरति भूतेषु गुहायां विश्वमूर्तिषु । त्वं यज्ञस्त्वं वषट्कारस्त्वमिन्द्रस्त्वꣳ रुद्रस्त्वं विष्णुस्त्वं ब्रह्म त्वं प्रजापतिः । त्वं तदाप आपो ज्योती रसोऽमृतं ब्रह्म भूर्भुवस्सुवरोम् ॥ ०। १०। ६८। ८९॥ ॥ ६८॥

९० श्रद्धायां प्राणे निविष्टोऽमृतं जुहोमि । श्रद्धायामपाने निविष्टोऽमृतं जुहोमि । श्रद्धायां व्याने निविष्टोऽमृतं जुहोमि । श्रद्धायामुदाने निविष्टोऽमृतं जुहोमि । श्रद्धायाꣳ समाने निविष्टोऽमृतं जुहोमि । ब्रह्मणि म आत्माऽमृतत्वाय । अमृतोपस्तरणमसि । श्रद्धायां प्राणे निविष्टोऽमृतं जुहोमि । शिवो मा विशाप्रदाहाय । प्राणाय स्वाहा । श्रद्धायामपाने निविष्टोऽमृतं जुहोमि । शिवो मा विशाप्रदाहाय । अपानाय स्वाहा । श्रद्धायां व्याने निविष्टोऽमृतं जुहोमि । शिवो मा विशाप्रदाहाय । व्यानाय स्वाहा । श्रद्धायामुदाने निविष्टोऽमृतं जुहोमि । शिवो मा विशाप्रदाहाय । उदानाय स्वाहा । श्रद्धायाꣳ समाने निविष्टोऽमृतं जुहोमि । शिवो मा विशाप्रदाहाय । समानाय स्वाहा । ब्रह्मणि म आत्माऽमृतत्वाय । अमृतापिधानमसि ॥ ०। १०। ६९। ९०॥ ॥ ६९॥

९१ श्रद्धायां प्राणे निविश्यामृतꣳहुतम् । प्राणमन्नेनाप्यायस्व । श्रद्धायामपाने निविश्यामृतꣳहुतम् । अपानमन्नेनाप्यायस्व । श्रद्धायां व्याने निविश्यामृतꣳहुतम् । व्यानमन्नेनाप्यायस्व । श्रद्धायामुदाने निविश्यामृतꣳ हुतम् । उदानमन्नेनाप्यायस्व । श्रद्धायाꣳ समाने निविश्यामृतꣳहुतम् । समानमन्नेनाप्यायस्व ॥
०। १०। ७०। ९१॥ ॥ ७०॥

९२ अङ्गुष्ठमात्रः पुरुषोऽङ्गुष्ठं च समाश्रितः । ईशस्सर्वस्य जगतः प्रभुः प्रीणाति विश्वभुक् ॥ ०। १०। ७१। ९२॥ ॥ ७१॥

९३ वाङ्म आसन्न् । नसोः प्राणः । अक्ष्योश्चक्षुः । कर्णयोः श्रोत्रम् । बाहुवोर्बलम् । ऊरुवोरोजः । अरिष्टा विश्वान्यङ्गानि तनूः । तनुवा मे सह नमस्ते अस्तु मा मा हिꣳसीः ॥ ०। १०। ७२। ९३॥ ॥ ७२॥

९४ वयस्सुपर्णा उपसेदुरिन्द्रं प्रियमेधा ऋषयो नाधमानाः । अप ध्वान्तमूर्णुहि पूर्धि चक्षुर्मुमुग्ध्यस्मान्निधयेऽव बद्धान् ॥ ०। १०। ७३। ९४॥ ॥ ७३॥

९५ प्राणानां ग्रन्थिरसि रुद्रो मा विशान्तकः । तेनान्नेनाप्यायस्व ॥ ०। १०। ७४। ९५॥ ॥ ७४॥

९६ नमो रुद्राय विष्णवे मृत्युर्मे पाहि ॥ ०। १०। ७५। ९६॥ ॥ ७५॥

९७ त्वमग्ने द्युभिस्त्वमाशु शुक्षणिस्त्वमद्भ्यस्त्वमश्मनस्परि । त्वं वनेभ्यस्त्वमोषधीभ्यस्त्वं नृणां नृपते जायसे शुचिः ॥ ०। १०। ७६। ९७॥ ॥ ७६॥

९८ शिवेन मे सन्तिष्ठस्व स्योनेन मे सन्तिष्ठस्व सुभूतेन मे सन्तिष्ठस्व ब्रह्मवर्चसेन मे सन्तिष्ठस्व यज्ञस्यर्द्धिमनु सन्तिष्ठस्वोप ते यज्ञ नम उप ते नम उप ते नमः ॥ ०। १०। ७७। ९८॥ ॥ ७७॥

९९ सत्यं परं परꣳ सत्यꣳ सत्येन न सुवर्गाल्लोकाच्च्यवन्ते कदाचन सताꣳ हि सत्यं तस्माथ्सत्ये रमन्ते तप इति तपो नानशनात्परं यद्धि परं तपस्तद्दुर्धर्षं तद्दुराधर्षं तस्मात्तपसि रमन्ते दम इति नियतं ब्रह्मचारिणस्तस्माद्दमे रमन्ते शम इत्यरण्ये मुनयस्तस्माच्छमे रमन्ते दानमिति सर्वाणि भूतानि प्रशꣳसन्ति दानान्नातिदुश्चरं तस्माद्दाने रमन्ते धर्म इति धर्मेण सर्वमिदं परिगृहीतं धर्मान्नातिदुष्करं तस्माद्धर्मे रमन्ते प्रजन इति भूयाꣳसस्तस्माद्भूयिष्ठाः प्रजायन्ते तस्माद्भूयिष्ठाः प्रजनने रमन्तेऽग्नय इत्याह तस्मादग्नय आधातव्या अग्निहोत्रमित्याह तस्मादग्निहोत्रे रमन्ते यज्ञ इति यज्ञो हि देवास्तस्माद्यज्ञे रमन्ते मानसमिति विद्वाꣳसस्तस्माद्विद्वाꣳस एव मानसे रमन्ते न्यास इति ब्रह्मा ब्रह्मा हि परः परो हि ब्रह्मा तानि वा एतान्यवराणि पराꣳसि न्यास एवात्यरेचयद्य एवं वेदेत्युपनिषत् ॥
०। १०। ७८। ९९॥ ॥ ७८॥

१०० प्राजापत्यो हारुणिः सुपर्णेयः प्रजापतिं पितरमुपससार किं भगवन्तः परमं वदन्तीति तस्मै प्रोवाच सत्येन वायुरावाति सत्येनादित्यो रोचते दिवि सत्यं वाचः प्रतिष्ठा सत्ये सर्वं प्रतिष्ठितं तस्माथ्सत्यं परमं वदन्ति तपसा देवा देवतामग्र आयन्तपसर्षयः सुवरन्वविन्दन्तपसा सपत्नान्प्रणुदामारातीस्तपसि सर्वं प्रतिष्ठितं तस्मात्तपः परमं वदन्ति दमेन दान्ताः किल्बिषमवधून्वन्ति दमेन ब्रह्मचारिणः सुवरगच्छन्दमो भूतानां दुराधर्षं दमे सर्वं प्रतिष्ठितं तस्माद्दमः परमं वदन्ति शमेन शान्ताः शिवमाचरन्ति शमेन नाकं मुनयोऽन्वविन्दञ्छमो भूतानां दुराधर्षञ्छमे सर्वं प्रतिष्ठितं तस्माच्छमः परमं वदन्ति दानं यज्ञानां वरूथं दक्षिणा लोके दातारꣳ सर्वभूतान्युपजीवन्ति दानेनारातीरपानुदन्त दानेन द्विषन्तो मित्रा भवन्ति दाने सर्वं प्रतिष्ठितं तस्माद्दानं परमं वदन्ति धर्मो विश्वस्य जगतः प्रतिष्ठा लोके धर्मिष्ठं प्रजा उपसर्पन्ति धर्मेण पापमपनुदति धर्मे सर्वं प्रतिष्ठितं तस्माद्धर्मं परमं वदन्ति प्रजननं वै प्रतिष्ठा लोके साधु प्रजायास्तन्तुं तन्वानः पितृणामनृणो भवति तदेव तस्या अनृणं तस्मात्प्रजननं परमं वदन्त्यग्नयो वै त्रयी विद्या देवयानः

पन्था गार्हपत्य ऋक्पृथिवी रथन्तरमन्वाहार्यपचनं यजुरन्तरिक्षं वामदेव्यमाहवनीयः साम सुवर्गो लोको बृहत्तस्मादग्नीन्परमं वदन्त्यग्निहोत्रꣳ सायं प्रातर्गृहाणां निष्कृतिस्स्विष्टꣳ सुहुतं यज्ञक्रतूनां प्रायणꣳ सुवर्गस्य लोकस्य ज्योतिस्तस्मादग्निहोत्रं परमं वदन्ति यज्ञ इति यज्ञेन हि देवा दिवं गता यज्ञेनासुरानपानुदन्त यज्ञेन द्विषन्तो मित्रा भवन्ति यज्ञे सर्वं प्रतिष्ठितं तस्माद्यज्ञं परमं वदन्ति मानसं वै प्राजापत्यं पवित्रं मानसेन मनसा साधु पश्यति मानसा ऋषयः प्रजा असृजन्त मानसे सर्वं प्रतिष्ठितं तस्मान्मानसं परमं वदन्ति न्यास इत्याहुर्मनीषिणो ब्रह्माणं ब्रह्मा विश्वः कतमः स्वयंभुः प्रजापतिः संवथ्सर इति संवथ्सरोऽसावादित्यो य एष आदित्ये पुरुषः स परमेष्ठी ब्रह्मात्मा याभिरादित्यस्तपति रश्मिभिस्ताभिः पर्जन्यो वर्षति पर्जन्येनौषधिवनस्पतयः प्रजायन्त ओषधिवनस्पतिभिरन्नं भवत्यन्नेन प्राणाः प्राणैर्बलं बलेन तपस्तपसा श्रद्धा श्रद्धया मेधा मेधया मनीषा मनीषया मनो मनसा शान्तिः शान्त्या चित्तं चित्तेन स्मृतिग्ग् स्मृत्या स्मारग्ग् स्मारेण विज्ञानं विज्ञानेनात्मानं वेदयति तस्मादन्नं ददन्थ्सर्वाण्येतानि ददात्यन्नात्प्राणा भवन्ति भूतानां प्राणैर्मनो मनसश्च विज्ञानं विज्ञानादानन्दो ब्रह्म योनिस्स वा एष पुरुषः पञ्चधा पञ्चात्मा येन सर्वमिदं प्रोतं पृथिवी चान्तरिक्षं च द्यौश्च दिशश्चावान्तरदिशाश्च स वै सर्वमिदं जगथ्स स भूतꣳ स भव्यं जिज्ञासक्लृप्त ऋतजा रयिष्ठाः श्रद्धा सत्यो महस्वान्तपसोवरिष्ठाद्ज्ञात्वा तमेवं मनसा हृदा च भूयो न मृत्युमुपयाहि विद्वान्तस्मान्न्यासमेषां तपसामतिरिक्तमाहुर्वसुरण्वो विभूरसि प्राणे त्वमसि संधाता ब्रह्मन्त्वमसि विश्वधृत्तेजोदास्त्वमस्यग्निरसि वर्चोदास्त्वमसि सूर्यस्य द्युम्नोदास्त्वमसि चन्द्रमस उपयामगृहीतोऽसि ब्रह्मणे त्वा महस ओमित्यात्मानं युञ्जीतैतद्वै महोपनिषदं देवानां गुह्यं य एवं वेद ब्रह्मणो महिमानमाप्नोति तस्माद्ब्रह्मणो महिमानमित्युपनिषत् ॥
०। १०। ७९। १००॥ ॥ ७९॥

१०१ तस्यैवं विदुषो यज्ञस्यात्मा यजमानः श्रद्धा पत्नी शरीरमिध्ममुरो वेदिर्लोमानि बर्हिर्वेदः शिखा हृदयं यूपः काम आज्यं मन्युः पशुस्तपोऽग्निर्दमः शमयिता दक्षिणा वाग्घोता प्राण उद्गाता चक्षुरध्वर्युर्मनो ब्रह्मा श्रोत्रमग्नीद्यावद्ध्रियते सा दीक्षा यदश्नाति तद्धविर्यत्पिबति तदस्य सोमपानं यद्रमते तदुपसदो यथ्संचरत्युपविशत्युत्तिष्ठते च स प्रवर्ग्यो यन्मुखं तदाहवनीयो या व्याहृतिराहुतिर्यदस्य विज्ञानं तज्जुहोति यथ्सायं प्रातरत्ति तथ्समिधं यत्प्रातर्मध्यंदिनꣳ सायं च तानि सवनानि ये अहोरात्रे ते दर्शपूर्णमासौ येऽर्धमासाश्च मासाश्च ते चातुर्मास्यानि य ऋतवस्ते पशुबन्धा ये संवथ्सराश्च परिवथ्सराश्च

तेऽहर्गणाः सर्ववेदसं वा एतथ्सत्रं यन्मरणं तदवभृथ एतद्वै जरामर्यमग्निहोत्रँ सत्रं य एवं विद्वानुदगयने प्रमीयते देवानामेव महिमानं गत्वाऽऽदित्यस्य सायुज्यं गच्छत्यथ यो दक्षिणे प्रमीयते पितृणामेव महिमानं गत्वा चन्द्रमसः सायुज्यँ सलोकतामाप्नोत्येतौ वै सूर्याचन्द्रमसोर्महिमानौ ब्राह्मणो विद्वानभिजयति तस्माद्ब्रह्मणो महिमानमाप्नोति तस्माद्ब्रह्मणो महिमानम् (इत्युपनिषत्) ॥ ०। १०। ८०। १०१॥
॥ ८०॥

अम्भस्येकपञ्चाशदुत्तरशतं जातवेदसे चतुर्दश भूरन्नं भूरग्नये भूरग्नये चैकमेकं पाहि पाहि चत्वारि चत्वारि यश्छन्दसां द्वे नमो ब्रह्मण ऋतं तपो यथा वृक्षस्यैकमेकमणोरणीयाग्श्चतुस्त्रिँशत् सहस्रशीर्षँ षड्विँशतिरादित्यो वा एष आदित्यो वै तेज एकमेकं निधनपतये त्रयोविँशतिः सद्योजातं त्रीणि वामदेवायैकमघोरेभ्यस्तत्पुरुषाय द्वे द्वे ईशानो नमो हिरण्यबाहव एकमेकमृतँ सत्यं द्वे सर्वो वै चत्वारि कद्रुद्राय त्रीणि यस्य वैकङ्कती कृणुष्व पाजोऽदितिरापो वा इदमेकमेकमापः पुनन्तु चत्वार्यग्निश्च सूर्यश्च नव नवोमिति चत्वार्यायातु पञ्चौजोऽसि दशोत्तमे चत्वारि घृणिस्त्रीणि ब्रह्ममेतु मां यास्ते ब्रह्महत्यां द्वादश ब्रह्म मेधयाऽद्या न इमं भ्रूणहत्यां ब्रह्म मेधवा ब्रह्मा देवानामिदं वीरहत्यामेकान्न विँशतिरेकान्न विँशतिर्मेधा देवी मेधां म इन्द्रश्चत्वारि चत्वार्या मां मेधा द्वे मयि मेधामेकमपैतु परं वातं प्राणममुत्रभूयाद्धरिँ शल्कैरग्निं माछिदो मृत्यो मा नो महान्तं मा नस्तोके प्रजापते स्वस्तिदा त्र्यम्बकं ये ते सहस्रमयुतं द्वे द्वे मृत्यवे स्वाहैकं देवकृतस्यैकादश यद्वो देवाः कामोऽकार्षीन्मन्युरकार्षीं द्वे द्वे तिलाञ्जुहोमि गावः श्रियं प्रजाः पञ्च तिलाः कृष्णाश्चोरस्य श्रीः प्रज्ञातु जातवेदः सप्त प्राणवाक्त्वक्छिर उत्तिष्ठ पञ्च पृथिवीशब्दमनोवाग्व्यक्तात्माऽन्तरात्मा परमात्मा मे क्षुधेऽन्नमय पञ्चदशाग्नये स्वाहैकचत्वारिँशदोन्तद्ब्रह्म नव श्रद्धायां प्राणे निविष्टोऽमृतं जुहोमि चतुर्विँशतिः श्रद्धायां प्राणे निविश्यामृतँ हुतन्दशाङ्गुष्ठमात्रः पुरुषो द्वे वाङ्म आसन्नष्टौ वयस्सुपर्णाः प्राणानां ग्रन्थिरसि द्वे द्वे नमो रुद्रायैकं त्वमग्ने द्युभिर्द्वे शिवेन मे सन्तिष्ठस्व सत्यं प्राजापत्यस्तस्यैवमेकमेकमशीतिः ॥ ८०॥

अम्भस्यपारे स्वस्ति नः पाहि नो अग्न एकयाऽऽदित्यो वा एष ऋतँ सत्यमोमित्या मां मेधा मा नस्तोके तिलाञ्जुहोमि श्रद्धायां प्राणे निविश्य तस्यैवमेकोत्तरशतम् ॥ १०१॥

० सह नाववतु । सह नौ भुनक्तु । सह वीर्यं करवावहै । तेजस्वि नावधीतमस्तु मा विद्विषावहै । ओं शान्तिः शान्तिः शान्तिः ॥

# एकाग्निकाण्डे प्रथमः प्रश्नः १

१ प्रसुग्मन्ता धियसानस्य सक्षणि वरेभिर्वराँ अभिषुप्रसीदत । अस्माकमिन्द्र उभयं जुजोषति यथ्सौम्यस्यान्धसो बुबोधति । अनृक्षरा ऋजवस्सन्तु पन्था येभिस्सखायो यन्ति नो वरेयम् । समर्यमा सं भगो नो निनीयाथ्सं जास्पत्यँ सुयममस्तु देवाः । अभ्रातृघ्नीं वरुणापतिघ्नीं बृहस्पते । इन्द्रापुत्रघ्नीं लक्ष्म्यं तामस्यै सवितस्सुव । अघोरचक्षुरपतिघ्न्येधि शिवा पतिभ्यस्सुमनास्सुवर्चाः । जीवसूर्देवकामा स्योना शं नो भव द्विपदे शं चतुष्पदे । इदमहं या त्वयि पतिघ्न्यलक्ष्मिस्तां निर्दिशामि । जीवाँरुदन्ति विमयन्ते अध्वरे दीर्घामनु प्रसितिं दीधियुर्नरः । वामं पितृभ्यो य इदँ समेरि रे मयः पतिभ्यो जनयः परिष्वजे । व्युक्षत्क्रूरमुदचन्त्वाप आऽस्यै ब्राह्मणास्स्नपनँ हरन्तु । अवीरघ्नीरुदचन्त्वापः । अर्यम्णो अग्निं परि यन्तु क्षिप्रं प्रतीक्षन्ताग् श्वश्र्वो देवराश्च । खेऽनसः खे रथः खे युगस्य शचीपते । अपालामिन्द्र त्रिः पूत्व्यकरथ्सूर्यवर्चसम् । शं ते हिरण्यँशमु सन्त्वापः शं ते मेधी भवतु शं युगस्य तृद्म । शं त आपः शतपवित्रा भवन्त्वथा पत्या तन्वँसँ सृजस्व ॥ ०। ०। १। १॥ दीधियुर्नरोऽष्टौ च ॥ १॥

२ हिरण्यवर्णाः शुचयः पावकाः प्रचक्रमुर् हित्वाऽवद्यमापः । शतं पवित्रा वितता ह्यासु ताभिष्ट्वा देवः सविता पुनातु । हिरण्यवर्णाः शुचयः पावका यासु जातः कश्यपो यास्वग्निः । या अग्निं गर्भं दधिरे सुवर्णास्तास्त आपः शऱ्ँ स्योना भवन्तु । यासाँ राजा वरुणो याति मध्ये सत्यानृते अवपश्यञ्जनानाम् । या अग्निं गर्भं दधिरे सुवर्णास्तास्त आपः शऱ्ँ स्योना भवन्तु । यासां देवा दिवि कृण्वन्ति भक्षं या अन्तरिक्षे बहुधा निविष्टाः । या अग्निं गर्भं दधिरे सुवर्णास्तास्त आपः शऱ्ँ स्योना भवन्तु । शिवेन त्वा चक्षुषा पश्यन्त्वापः शिवया तन्वोपस्पृशन्तु त्वचं ते । घृतश्चुतः शुचयो याः पावकास्तास्त आपः शऱ्ँ स्योना भवन्तु । परि त्वा गिर्वणो गिर इमा भवन्तु विश्वतः । वृद्धायुमनु वृद्धयो जुष्टा भवन्तु जुष्टयः । आशासानेत्येषा । पूषा त्वेतो नयतु हस्तगृह्याश्विनौ त्वा प्रवहताँ रथेन । गृहान्गच्छ गृहपत्नी यथाऽसो वशिनी त्वं विदथमावदासि ॥ ०। ०। १। २॥ भवन्तु पञ्च च ॥ २॥

३ सोमः प्रथमो विविदे गन्धर्वो विविद उत्तरः । तृतीयो अग्निष्टे पतिस्तुरीयस्ते मनुष्यजाः । सोमोऽददद्गन्धर्वाय गन्धर्वोऽददद्ग्नये । रयिं च पुत्राग्श्चादादग्निर्मह्यमथो इमाम् । गृभ्णामि ते सुप्रजास्त्वाय हस्तं मया पत्या जरदष्टिर्यथाऽसः । भगो अर्यमा सविता

पुरन्धिर्मह्यं त्वाऽदुर्गार्हपत्याय देवाः । ते ह पूर्वे जनासो यत्र पूर्ववहो हिताः ।
मूर्धन्वान्, यत्र सौभ्रवः पूर्वो देवेभ्य आतपत् । सरस्वति प्रेदमव सुभगे वाजिनीवति ।
तां त्वा विश्वस्य भूतस्य प्रगायामस्यग्रतः । य एति प्रदिशः सर्वा दिशोऽनु पवमानः ।
हिरण्यहस्त ऐरम्मस्स त्वा मन्मनसं कृणोतु । एकमिषे विष्णुस्त्वाऽन्वेतु द्वे ऊर्जे त्रीणि
व्रताय चत्वारि मायोभवाय पञ्च पशुभ्यष्षडृतुभ्यस्सप्त सप्तभ्यो होत्राभ्यो विष्णुस्त्वाऽन्वेतु
। सखा सप्तपदा भव सखायौ सप्तपदा बभूव सख्यं ते गमेयꣳ सख्यात्ते मा योषꣳ
सख्यान्मे मा योष्ठाः समयाव संकल्पावहै संप्रियौ रोचिष्णू सुमनस्यमानौ । इषमूर्जमभि
संवसानौ सं नौ मनाꣳसि सं व्रता समु चित्तान्याकरम् । सा त्वमस्यमूहममूहमस्मि सा
त्वं द्यौरहं पृथिवी त्वꣳ रेतोऽहꣳ रेतोभृत्त्वं मनोऽहमस्मि वाक्त्वꣳ सामाहमस्म्यृक्त्वꣳ
सा मामनुव्रता भव पुꣳसे पुत्राय वेत्तवै श्रियै पुत्राय वेत्तव एहि सूनृते ॥ ०। ०। १।
३॥ अग्रतष्षड्व ॥ ३॥

४ सोमाय जनिविदे स्वाहा गन्धर्वाय जनिविदे स्वाहाऽग्नये जनिविदे स्वाहा ।
कन्यला पितृभ्यो यती पतिलोकमव दीक्षामदास्थ स्वाहा । प्रेतो मुञ्चाति नामुतः
सुबद्धाममुतस्करत् । यथेयमिन्द्र मीढ्वः सुपुत्रा सुभगाऽसति । इमां त्वमिन्द्र मीढ्वः
सपुत्राꣳ सुभगां कृणु । दशास्यां पुत्रानाधेहि पतिमेकादशं कृधि । अग्निरैतु प्रथमो
देवतानाꣳ सोऽस्यै प्रजां मुञ्चतु मृत्युपाशात् । तदयꣳ राजा वरुणोऽनुमन्यतां यथेय२ꣳ
स्त्री पौत्रमघं न रोदात् । इमामग्निस्त्रायतां गार्हपत्यः प्रजामस्यै नयतु दीर्घमायुः ।
अशून्योपस्था जीवतामस्तु माता पौत्रमानन्दमभि प्रबुध्यतामियम् । मा ते गृहे निशि
घोष उत्थादन्यत्र त्वद्रुदत्यः संविशन्तु । मा त्वं विकेश्युर आवधिष्ठा जीवपत्नी पतिलोके
विराज पश्यन्ती प्रजाꣳ सुमनस्यमानाम् । द्यौस्ते पृष्ठꣳ रक्षतु वायुरूरू अश्विनौ च
स्तनं धयन्तꣳ सविताऽभि रक्षतु । आवाससः परिधानाद्बृहस्पतिर्विश्वे देवा अभि रक्षन्तु
पश्चात् । अप्रजस्तां पौत्रमृत्युं पाप्मानमुत वाऽघम् । शीर्ष्णः स्रजमिवोन्मुच्य द्विषद्भ्यः
प्रति मुञ्चामि पाशम् । इमं मे वरुण तत्त्वा यामि त्वं नो अग्ने स त्वं नो अग्ने त्वमग्ने
अयाऽस्यया सन्मनसा हितः । अया सन् हव्यमूहिषेऽया नो धेहि भेषजम् ॥ ०। ०।
१। ४॥
इयमष्टौ च ॥ ४॥

५ आ तिष्ठेममश्मानमश्मेव त्व२ꣳ स्थिरा भव । अभि तिष्ठ पृतन्यतः सहस्व पृतनायतः
। इयं नार्युप ब्रूते कुल्पान्यावपन्तिका । दीर्घायुरस्तु मे पतिर्जीवातु शरदः शतम् ।

तुभ्यमग्ने पर्यवहन्थ्सूर्यां वहतुना सह । पुनः पतिभ्यो जायां दा अग्ने प्रजया सह । पुनः
पत्नीमग्निरदादायुषा सह वर्चसा । दीर्घायुरस्या यः पतिस्स एतु शरदः शतम् । विश्वा उत
त्वया वयं धारा उदन्या इव । अतिगाहेमहि द्विषः । आ तिष्ठेममश्मानम् । अर्यमणं नु
देवं कन्या अग्निमयक्षत । स इमां देवो अध्वरः प्रेतो मुञ्चाति नामुतः सुबद्धाममुतस्करत्
। तुभ्यमग्ने पर्यवहन्पुनः पत्नीमग्निरदाद्विश्वा उत त्वया वय मा तिष्ठेममश्मानम् । त्वमर्यमा
भवसि यत्कनीनां नाम स्वधावथ्स्वर्यं बिभर्षि । अञ्जन्ति वृक्षँ सुधितं न गोभिर्यद्दम्पती
समनसा कृणोषि । तुभ्यमग्ने पर्यवहन्पुनः पत्नीमग्निरदाद्विश्वा उत त्वया वयम् । प्र त्वा
मुञ्चामि वरुणस्य पाशाद्येन त्वाऽबध्नाथ्सविता सुकेतः । धातुश्च योनौ सुकृतस्य लोके
स्योनं ते सह पत्या करोमि । इमं विष्यामि वरुणस्य पाशं यमबध्नीत सविता सुशेवः ।
धातुश्च योनौ सुकृतस्य लोकेऽरिष्टां त्वा सह पत्या कृणोमि । अयाश्चाग्नेऽस्यनभिशस्तीश्च
सत्यमित्त्वमया असि । अयसा मनसा धृतोऽयसा हव्यमूहिषेऽया नो धेहि भेषजम् ॥
०। ०। १। ५॥ द्विषः सुशेवस्त्रीणि च ॥ ५॥
६ सत्येनोत्तभिता भूमिस्सूर्येणोत्तभिता द्यौः । ऋतेनादित्यास्तिष्ठन्ति दिवि सोमो अधि
श्रितः । युञ्जन्ति ब्रध्नं योगेयोगे । सुकिँशुकँ शल्मलिं विश्वरूपँ हिरण्यवर्णँ
सुवृतँ सुचक्रम् । आरोह वध्वमृतस्य लोकँ स्योनं पत्ये वहतुं कृणुष्व ।
उदुत्तरमारोहन्ती व्यस्यन्ती पृतन्यतः । मूर्धानं पत्युरारोह प्रजया च विराड्भव । संराज्ञी
श्वशुरे भव संराज्ञी श्वश्रुवां भव । ननान्दरि संराज्ञी भव संराज्ञी अधि देवृषु । स्नुषाणाग्
श्वशुराणां प्रजायाश्च धनस्य च । पतीनां च देवृणां च सजातानां विराड्भव । नीललोहिते
भवतः कृत्या सक्तिर्व्यज्यते । एधन्तेऽस्या ज्ञातयः पतिर्बन्धेषु बध्यते । ये वध्वश्चन्द्रं
वहतुं यक्ष्मा यन्ति जनाँ अनु । पुनस्तान्, यज्ञिया देवा नयन्तु यत आगताः ।
मा विदन्परिपन्थिनो य आसीदन्ति दम्पती । सुगेभिर्दुर्गमतीतामपद्रान्त्वरातयः । सुगं
पन्थानमारुक्षमरिष्टँ स्वस्तिवाहनम् । यस्मिन्वीरो न रिष्यत्यन्येषां विन्दते वसु ॥
०। ०। १। ६॥ धनस्य च नव च ॥ ६॥
७ ता मन्दसाना मनुषो दुरोण आधत्तँ रयिं दशवीरं वचस्यवे । कृतं तीर्थँ
सुप्रपाणँ शुभस्पती स्थाणुं पथेष्ठामप दुर्मतिँ हतम् । अयं नो मह्याः पारँ
स्वस्ति नेषद्वनस्पतिः । सीरा नस्सुतरा भव दीर्घायुत्वाय वर्चसे । अस्य पारे निर्ऋतस्य
जीवा ज्योतिरशीमहि । मह्या इन्द्रस्स्वस्तये । यद्दते चिदभिश्रिषः पुरा जर्तृभ्य आतृदः

। सन्धाता सन्धिं मघवा पुरोवसुर्निष्कर्ता विह्रुतं पुनः । इडामग्न इमं मे वरुण तत्त्वा यामि त्वं नो अग्ने स त्वं नो अग्ने त्वमग्ने अयाऽसि । ये गन्धर्वा अप्सरसश्च देवीरेषु वृक्षेषु वानस्पत्येष्वासते । शिवास्ते अस्यै वध्वै भवन्तु मा हिꣳसिषुर्वहतुमूह्यमानाम् । या ओषधयो या नद्यो यानि धन्वानि ये वना । ते त्वा वधु प्रजावतीं प्र त्वे मुञ्चन्त्वꣳहसः । संकाशयामि वहतुं ब्रह्मणा गृहैरघोरेण चक्षुषा मैत्रेण । पर्याणद्धं विश्वरूपं यदस्याग् स्योनं पतिभ्यस्सविता कृणोतु तत् । आ वामगन्थ्सुमतिर्वाजिनीवसू न्यश्विना हृथ्सु कामाꣳ अयꣳसत । अभूतं गोपा मिथुना शुभस्पती प्रिया अर्यम्णो दुर्याꣳ अशीमहि । अयं नो देवस्सविता बृहस्पतिरिन्द्राग्नी मित्रावरुणा स्वस्तये । त्वष्टा विष्णुः प्रजया सꣳरराणः काम आयातं कामाय त्वा विमुञ्चतु ॥ ०। ०। १। ७॥ आसते नव च ॥ ७॥

८ शर्म वर्मेदमाहरास्यै नार्या उपस्तिरे । सिनीवालि प्रजायतामियं भगस्य सुमता असत् । गृहान्भद्रान्थ्सुमनसः प्रपद्येऽवीरघ्नी वीरवतस्सुवीरान् । इरां वहतो घृतमुक्षमाणास्तेष्वहꣳ सुमनास्सं विशामि । आगन्गोष्ठं महिषी गोभिरश्वैरायुष्मत्पत्नी प्रजया स्वर्वित् । बह्वीं प्रजां जनयन्ती सुरत्नेममग्निꣳ शतहिमास्सपर्यात् । अयमग्निर्गृहपतिः सुसꣳसत्पुष्टिवर्धनः । यथा भगस्याभ्यां ददद्रयिं पुष्टिमथो प्रजाम् । प्रजाया आभ्यां प्रजापत इन्द्राग्नी शर्म यच्छतम् । यथैनयोर्न प्रमीयाता उभयोर्जीवतोः प्रजाः । तेन भूतेन हविषाऽयमाप्यायतां पुनः । जायां यामस्मा आवाक्षुस्ताꣳ रसेनाभिवर्धताम् । अभिवर्धतां पयसाऽभि राष्ट्रेण वर्धताम् । रय्या सहस्रपोषसेमौ स्तामनपेक्षितौ । इहैव स्तं मा वियोष्टं विश्वमायुर्व्यश्नुतम् । मह्या इन्द्रस्स्वस्तये । ध्रुवैधि पोष्या मयि मह्यं त्वाऽदाद्बृहस्पतिः । मया पत्या प्रजावती सं जीव शरदः शतम् । त्वष्टा जायामजनयत्त्वष्टाऽस्यै त्वां पतिम् । त्वष्टा सहस्रमायूꣳषि दीर्घमायुः कृणोतु वाम् । इमं मे वरुण तत्त्वा यामि त्वं नो अग्ने स त्वं नो अग्ने त्वमग्ने अयाऽसि ॥ ०। ०। १। ८॥
जीवतोः प्रजा वामेकं च ॥ ८॥

९ इह गावः प्रजायध्वमिहाश्वा इह पूरुषाः । इहो सहस्रदक्षिणो रायस्पोषो निषीदतु । सोमेनादित्या बलिनस्सोमेन पृथिवी दृढा । अथो नक्षत्राणामेषामुपस्थे सोम आधितः । प्रस्वस्स्थः प्रेयं प्रजया भुवने शोचेष्ट । इह प्रियं प्रजया ते समृध्यतामस्मिन् गृहे गार्हपत्याय जागृहि । एना पत्या तन्वꣳ सꣳसृजस्वाथा जीव्री विदथमावदासि

। सुमङ्गलीरियं वधूरिमाँ समेत पश्यत । सौभाग्यमस्यै दत्वायाथास्तं विपरेतन । ध्रुवक्षितिर्ध्रुवयोनिर्ध्रुवमसि ध्रुवतस्स्थितम् । त्वं नक्षत्राणां मेथ्यसि स मा पाहि पृतन्यतः । सप्त ऋषयः प्रथमां कृत्तिकानामरुन्धतीं यद्ध्रुवताँ ह निन्युः । षट्कृत्तिका मुख्ययोगं वहन्तीयमस्माकमेधत्वष्टमी । सदसस्पतिमद्भुतं प्रियमिन्द्रस्य काम्यम् । सनिं मेधामयासिषम् । उद्दीप्यस्व जातवेदोऽपघ्नन्निर्ऋतिं मम । पशूꣳश्च मह्यमावह जीवनं च दिशो दिश । मानो हिँसीज्जातवेदो गामश्वं पुरुषं जगत् । अबिभ्रदग्न आगहि श्रिया मा परि पातय ॥ ०। ०। १। ९॥ ध्रुवतः स्थितं नव च ॥ ९॥

१० उदीर्ष्वातो विश्वावसो नमसेडामहे त्वा । अन्यामिच्छ प्रफर्व्यँसं जायां पत्या सृज । उदीर्ष्वातः पतिवति ह्येषा विश्वावसुं नमसा गीर्भिरीट्टे । अन्यामिच्छ पितृषदं व्यक्ताँ स ते भागो जनुषा तस्य विद्धि । अग्ने प्रायश्चित्ते त्वं देवानां प्रायश्चित्तिरसि ब्राह्मणस्त्वा नाथकामः प्रपद्ये याऽस्यां पतिघ्नी तनूः प्रजाघ्नी पशुघ्नी लक्ष्मिघ्नी जारघ्नीमस्यैतां कृणोमि स्वाहा । वायो प्रायश्चित्त आदित्य प्रायश्चित्ते प्रजापते प्रायश्चित्ते त्वं देवानां प्रायश्चित्तिरसि ब्राह्मणस्त्वा नाथकामः प्रपद्ये याऽस्यां पतिघ्नी तनूः प्रजाघ्नी पशुघ्नी लक्ष्मिघ्नी जारघ्नीमस्यै तां कृणोमि स्वाहा । प्रसवश्चोपयामश्च काटश्चार्णवश्च धर्णसिश्च द्रविणं च भगश्चान्तरिक्षं च सिन्धुश्च समुद्रश्च सरस्वाꣳश्च विश्वव्यचाश्च ते यं द्विष्मो यश्च नो द्वेष्टि तमेषां जम्भे दध्मः स्वाहा । मधुश्च माधवश्च शुक्रश्च शुचिश्च नभश्च नभस्यश्चेषश्चोर्जश्च सहश्च सहस्यश्च तपश्च तपस्यश्च ते यं द्विष्मो यश्च नो द्वेष्टि तमेषां जम्भे दध्मः स्वाहा । चित्तं च चित्तिश्चाकूतं चाकूतिश्चाधीतं चाधीतिश्च विज्ञातं च विज्ञानं च नाम च क्रतुश्च दर्शश्च पूर्णमासश्च ते यं द्विष्मो यश्च नो द्वेष्टि तमेषां जम्भे दध्मः स्वाहा । भूस्स्वाहा भुवस्स्वाहा सुवस्स्वाहोꣳस्वाहा ॥ ०। ०। १। १०॥ उदीर्ष्वातो दश ॥ १०॥

११ अपश्यं त्वा मनसा चेकितानं तपसो जातं तपसो विभूतम् । इह प्रजामिह रयिँ रराणः प्रजायस्व प्रजया पुत्रकाम । अपश्यं त्वा मनसा दीध्यानाग् स्वायां तनूँ ऋत्विये नाथमानाम् । उप मामुच्चा युवतिर्बभूयाः प्रजायस्व प्रजया पुत्रकामे । समञ्जन्तु विश्वे देवास्समापो हृदयानि नौ । सं मातरिश्वा सं धाता समु देष्ट्री दिदेष्टु नौ । प्रजापते तन्वं मे जुषस्व त्वष्टर्देवेभिस्सहसाम इन्द्र । विश्वैर्देवै रातिभिः सँरराणः पुँसां बहूनां मातरः स्याम । आ नः प्रजां जनयतु प्रजापतिराजरसाय समनक्त्वर्यमा । अदुर्मङ्गलीः पतिलोकमाविश शं नो भव द्विपदे शं चतुष्पदे । तां पूषञ्-छिवतमामेरयस्व यस्यां

बीजं मनुष्या वपन्ति । या न ऊरू उशती विस्रयाते यस्यामुशन्तः प्रहरेम शेफम् ॥ ०। ०। १। ११॥ शं चतुष्पदे द्वे च ॥ ११॥

१२ आरोहोरुमुपबर्हस्व बाहुं परिष्वजस्व जाया सुमनस्यमानः । तस्यां पुष्यतं मिथुनौ सयोनी बह्वीं प्रजां जनयन्तौ सरेतसा । आर्द्रयाऽरण्या यत्रामन्थत्पुरुषं पुरुषेण शक्रः । तदेतौ मिथुनौ सयोनी प्रजयाऽमृतेनेह गच्छतम् । अहं गर्भमदधामोषधीष्वहं विश्वेषु भुवनेष्वन्तः । अहं प्रजा अजनयं पितृणामहं जनिभ्यो अपरीषु पुत्रान् । पुत्रिणेमा कुमारिणा विश्वमायुर्व्यश्नुतम् । उभा हिरण्यपेशसा वीतिहोत्रा कृतद्वसू । दशस्यन्त्वाऽमृताय क शमूधो रोमश हथो देवेषु कृणुतो दुवः ॥ ०। ०। १। १२॥ आरोह नव ॥ १२॥

१३ विष्णुर्योनिं कल्पयतु त्वष्टा रूपाणि पिशतु । आसिञ्चतु प्रजापतिर्धाता गर्भं दधातु ते । गर्भं धेहि सिनीवालि गर्भं धेहि सरस्वति । गर्भं ते अश्विनौ देवावाधत्तां पुष्करस्रजा । हिरण्ययी अरणी यं निर्मन्थतो अश्विना । तं ते गर्भं हवामहे दशमे मासि सूतवे । यथेयं पृथिवी मही तिष्ठन्ती गर्भमादधे । एवं त्वं गर्भमाधत्स्व दशमे मासि सूतवे । यथा पृथिव्यग्निगर्भा द्यौर्यथेन्द्रेण गर्भिणी । वायुर्यथा दिशां गर्भ एवं गर्भं दधामि ते । विष्णो श्रेष्ठेन रूपेणास्यां नार्यां गवीन्याम् । पुमांसं गर्भमाधेहि दशमे मासि सूतवे । नेजमेष परापत सपुत्रः पुनरापत । अस्यै मे पुत्रकामायै गर्भमाधेहि यः पुमान् । व्यस्य योनिं प्रति रेतो गृहाण पुमान्पुत्रो धीयतां गर्भो अन्तः । तं माता दशमासो बिभर्तु स जायतां वीरतमस्स्वानाम् । आ ते गर्भो योनिमेतु पुमान्बाण इवेषुधिम् । आ वीरो जायतां पुत्रस्ते दशमास्यः ॥ ०। ०। १। १३॥ गर्भं दधामि तेऽष्टौ च ॥ १३॥

१४ करोमि ते प्राजापत्यमा गर्भो योनिमेतु ते । अनूनः पूर्णो जायतामश्लोणोऽपिशाचधीतः । पुमाग्स्ते पुत्रो नारि तं पुमाननुजायताम् । तानि भद्राणि बीजान्यृषभा जनयन्तु नौ । यानि भद्राणि बीजान्यृषभा जनयन्ति नः । तैस्त्वं पुत्रान्‌, विन्दस्व सा प्रसूर्धेनुका भव । कामप्रमृध्यतां मह्यमपराजितमेव मे । यं कामं कामये देव तं मे वायो समर्धय । अनुहवं परिहवं परीवादं परिक्षपम् । दुस्स्वप्नं दुरुदितं तद्द्विषद्भ्यो दिशाम्यहम् । अनुहूतं परिहूत शकुनेर्यदशाकुनम् । मृगस्य सृतमक्ष्णया तद्द्विषद्भ्यो दिशाम्यहम् । आरात्ते अग्निरस्त्वारात्परशुरस्तु ते । निवाते त्वाऽभि वर्षतु स्वस्ति तेऽस्तु वनस्पते स्वस्ति मेऽस्तु वनस्पते । नमः शकृत्सदे रुद्राय नमो रुद्राय शकृत्सदे । गोष्ठमसि नमस्ते

अस्तु मा मा हिँसीः सिगसि नसि वज्रो नमस्ते अस्तु मा मा हिँसीः । उद्गातेव शकुने साम गायसि ब्रह्मपुत्र इव सवनेषु शँससि । स्वस्ति नः शकुने अस्तु प्रति नस्सुमना भव ॥ ०। ०। १। १४॥ अहमष्टौ च ॥ १४॥
१५ प्रातरग्निं प्रातरिन्द्रँहवामहे प्रातर्मित्रावरुणा प्रातरश्विना । प्रातर्भगं पूषणं ब्रह्मणस्पतिं प्रातः सोममुत रुद्रँ हुवेम । प्रातर्जितं भगमुग्रँ हुवेम वयं पुत्रमदितेर्यो विधर्ता । आध्रश्चिद्यं मन्यमानस्तुरश्चिद्राजा चिद्यं भगं भक्षीत्याह । भग प्रणेतर्भग सत्यराधो भगेमां धियमुदव ददन्नः । भग प्रणो जनय गोभिरश्वैर्भग प्रनृभिर्नृवन्तः स्याम । उतेदानीं भगवन्तः स्यामोत प्रपित्व उत मध्ये अह्नाम् । उतोदिता मघवन्थ्सूर्यस्य वयं देवानाँ सुमतौ स्याम । भग एव भगवाँ अस्तु देवास्तेन वयं भगवन्तस्स्याम । तं त्वा भग सर्व इज्जोहवीमि स नो भग पुर एता भवेह । समध्वरायोषसो नमन्त दधिक्रावेव शुचये पदाय । अर्वाचीनं वसुविदं भगं नो रथमिवाश्वा वाजिन आवहन्तु । अश्वावतीर्गोमतीर्न उषासो वीरवतीस्सदमुच्छन्तु भद्राः । घृतं दुहाना विश्वतः प्रपीना यूयं पात स्वस्तिभिस्सदा नः ॥ ०। ०। १। १५॥
भवेह चत्वारि च ॥ १५॥
१६ इमां खनाम्योषधीं वीरुधं बलवत्तमाम् । यया सपत्नीं बाधते यया संविन्दते पतिम् । उत्तानपर्णे सुभगे सहमाने सहस्वति । सपत्नीं मे पराधम पतिं मे केवलं कृधि । उत्तराऽहमुत्तर उत्तरेदुत्तराभ्यः । अथा सपत्नी या ममाधरा साऽधराभ्यः । न ह्यस्यै नाम गृभ्णामि नो अस्मिन्रमते जने । परामेव परावतँ सपत्नीं नाशयामसि । अहमस्मि सहमानाऽथ त्वमसि सासहिः । उभे सहस्वती भूत्वा सपत्नीं मे सहावहै । उप तेऽधाँ सहमानामभि त्वाऽधाँ सहीयसा । मामनु प्र ते मनो वथ्सं गौरिव धावतु पथा वारिव धावतु ॥
०। ०। १। १६॥ सहावहै द्वे च ॥ १६॥
१७ उदसौ सूर्यो अगादुदयं मामको भगः । अहं तद्विद्वला पतिमभ्यसाक्षि विषासहिः । अहं केतुरहं मूर्धाऽहमुग्रा विवाचनी । ममेदनु क्रतुं पतिस्सेहानाया उवाचरेत् । मम पुत्राः शत्रुहणोऽथो मे दुहिता विराट् । उताहमस्मि संजया पत्युर्मे श्लोक उत्तमः । येनेन्द्रो हविषा कृत्यभवद्द्युम्न्युत्तमः । अहं तदक्रि देवा असपत्ना किलाभवम् । असपत्ना सपत्निघ्नी जयन्त्यभिभूवरीः । आविथ्सि सर्वासाँ राधो वर्चो अस्थेयसामिव । समजैषमिमा अहँ सपत्नीरभिभूवरीः । यथाऽहमस्य वीरस्य विराजामि धनस्य च ॥ ०। ०। १।

१७॥ अस्थेयसामिव द्वे च ॥ १७॥

१८ अक्षीभ्यां ते नासिकाभ्यां कर्णाभ्यां चुबुकादधि । यक्ष्मꣳशीर्षण्यं मस्तिष्काज्जिह्वाया विवृहामि ते । ग्रीवाभ्यस्त उष्णिहाभ्यः कीकसाभ्योऽनूक्यात् । यक्ष्मं दोषण्यमꣳसाभ्यां बाहुभ्यां विवृहामि ते । आन्त्रेभ्यस्ते गुदाभ्यो वनिष्ठोर् हृदयादधि । यक्ष्मं मतस्नाभ्यां यक्नः प्लाशिभ्यो विवृहामि ते । ऊरुभ्यां तेऽष्ठीवद्भ्यां जङ्घाभ्यां प्रपदाभ्याम् । यक्ष्ममग्ग् श्रोणीभ्यां भासदाद्ध ꣳसो विवृहामि ते । मेहनाद्वलङ्करणाल्लोमभ्यस्ते नखेभ्यः । यक्ष्म ꣳ सर्वस्मादात्मनस्तमिमं विवृहामि ते । अङ्गादङ्गाल्लोम्नोलोम्नो जातं पर्वणिपर्वणि । यक्ष्म ꣳ सर्वस्मादात्मनस्तमिमं विवृहामि ते । परादेहि शाबल्यं ब्रह्मभ्यो विभजा वसु । कृत्यैषा पद्वती भूत्वा जायाऽऽविशते पतिम् । अश्लीला तनूर्भवति रुशती पापयाऽमुया । पतिर्यद्वध्वै वाससा स्वमङ्गमभि धित्सति । क्रूरमेतत् कटुकमेतदपाष्ठवद्विषवन्नैतदत्तवे । सूर्यां यः प्रत्यक्षं विद्यात्स एतत्प्रतिगृह्णीयात् । आशसनं विशसनमथो अधि विचर्तनम् । सूर्यायाः पश्य रूपाणि तानि ब्रह्मोत शꣳसति ॥ ०। ०। १। १८॥ इमं विवृहामि ते शꣳसति ॥ १८॥ अक्षी(भ्यां) ग्रीवा(भ्य) आन्त्रे(भ्य) ऊरु(भ्यां) मेहनादङ्गादङ्गात्परादेहि सप्त ॥

प्रसुग्मन्ताऽष्टादश हिरण्यवर्णाः पञ्चदश सोमः प्रथमः षोडश सोमाय जनिविदेऽष्टादशातिष्ठेमं त्रयोविꣳशतिः सत्येन ता मन्दसानैकान्न विꣳशतिरेकान्न विꣳशतिः शर्म वर्मैकविꣳशतिरिह गाव एकान्न विꣳशतिरुदीर्ष्वातो दशापश्यं त्वा द्वादशारोहोरुं नव विष्णुर्योनिं करोमि तेऽष्टादशाष्टादश प्रातरग्निं चतुर्दशेमां खनाम्युदसौ सूर्यो द्वादश द्वादशाक्षीभ्यां ते विꣳशतिरष्टादश ॥ १८॥ प्रसुग्मन्ताऽपश्यं त्वाऽष्टादश ॥ १८॥

प्रसुग्मन्ता तानि ब्रह्मोत शꣳसति ॥

## एकाग्निकाण्डे द्वितीयः प्रश्नः २

१ उष्णेन वायवुदकेनेह्यदितिः केशान् वपतु । आप उन्दन्तु जीवसे दीर्घायुत्वाय वर्चसे । ज्योक्च सूर्यं दृशे । येनावपत्सविता क्षुरेण सोमस्य राज्ञो वरुणस्य विद्वान् । तेन ब्रह्माणो वपतेदमस्यायुष्माञ्जरदष्टिर्यथाऽसदयमसौ । येन पूषा बृहस्पतेरग्नेरिन्द्रस्य चायुषेऽवपत् । तेनास्यायुषे वप सौश्लोक्याय स्वस्तये । येन भूयश्चरात्ययं ज्योक्च पश्याति सूर्यम् । तेनास्यायुषे वप सौश्लोक्याय स्वस्तये । येन पूषा बृहस्पतेरग्नेरिन्द्रस्य चायुषेऽवपत् । तेन ते वपाम्यसावायुषा वर्चसा यथा ज्योक्सुमना असाः । यत्क्षुरेण मर्चयता सुपेशसा

वप्त्रा वपसि केशान् । शुन्धि शिरो माऽस्यायुः प्रमोषीः । उप्त्वाय केशान् वरुणस्य
राज्ञो बृहस्पतिः सविता सोमो अग्निः । तेभ्यो निधानं बहुधाऽन्वविन्दन्नन्तरा द्यावापृथिवी
अपस्सुवः ॥ ०। ०। २। १॥ आयुषेऽवपत्पश्च च ॥ १॥
२ आयुर्दा देव जरसं गृणानो घृतप्रतीको घृतपृष्ठो अग्ने । घृतं पिबन्नमृतं चारु
गव्यं पितेव पुत्रं जरसे नयेमम् । आतिष्ठेममश्मानमश्मेव त्वꣳ स्थिरो भव ।
अभितिष्ठ पृतन्यतस्सहस्व पृतनायतः । रेवतीस्त्वा व्यक्ष्णन्कृत्तिकाश्चाकृन्तꣳस्त्वा
। धियोऽवयन्नवग्ना अवृञ्जन्थ्सहस्रमन्ताꣳ अभितो अयच्छन् । देवीर्देवाय परिधी
सवित्रे महत्तदासामभवन्महित्वनम् । या अकृन्तन्नवयन् या अतन्वत याश्च
देवीरन्तानभितोऽददन्त । तास्त्वा देवीर्जरसे संव्ययन्त्वायुष्मानिदं परिधथ्स्व वासः ।
परिधत्त धत्त वाससैनꣳ शतायुषं कृणुत दीर्घमायुः । बृहस्पतिः प्रायच्छद्वास एतथ्सोमाय
राज्ञे परिधातवा उ । जरां गच्छासि परिधथ्स्व वासो भवा कृष्टीनामभिशस्तिपावा
। शतं च जीव शरदः सुवर्चा रायश्च पोषमुप संव्ययस्व । परीदं वासो अधिधाः
स्वस्तयेऽभूरापीनामभिशस्तिपावा । शतं च जीव शरदः पुरूचीर्वसूनि चार्यो विभजासि
जीवन्न् । इयं दुरुक्तात्परिबाधमाना शर्म वरूथं पुनती न आगात् । प्राणापानाभ्यां
बलमाभरन्ती प्रिया देवानाꣳ सुभगा मेखलेयम् । ऋतस्य गोप्त्री तपसः परस्पी घ्नती
रक्षः सहमाना अरातीः । सा नस्समन्तमनु परीहि भद्रया भर्तारस्ते मेखले मा रिषाम
। मित्रस्य चक्षुर्धरुणं बलीयस्तेजो यशस्वि स्थविरꣳ समिद्धम् । अनाहनस्यं वसनं
जरिष्णु परीदं वाज्यजिनं दधेऽहम् ॥ ०। ०। २। २॥ दीर्घमायुः समिद्धमेकं च ॥ २॥
३ आगन्त्रा समगन्महि प्रसु मृत्युं युयोतन । अरिष्टाः संचरेमहि स्वस्ति चरतादिह
स्वस्त्या गृहेभ्यः । समुद्रादूर्मिर्मधुमाꣳ उदारदुपाꣳशुना सममृतत्वमश्याम् । इमे नु
ते रश्मयः सूर्यस्य येभिः सपित्वं पितरो न आयन्न् । अग्निष्टे हस्तमग्रभीथ्सोमस्ते
हस्तमग्रभीथ्सविता ते हस्तमग्रभीथ्सरस्वती ते हस्तमग्रभीत्पूषा ते हस्तमग्रभीदर्यमा
ते हस्तमग्रभीदꣳशुस्ते हस्तमग्रभीद्भगस्ते हस्तमग्रभीन्मित्रस्ते हस्तमग्रभीन्मित्रस्त्वमसि
धर्मणाऽग्निराचार्यस्तव । अग्नये त्वा परि ददाम्यसौ सोमाय त्वा परि ददाम्यसौ सवित्रे
त्वा परि ददाम्यसौ सरस्वत्यै त्वा परि ददाम्यसौ मृत्यवे त्वा परि ददाम्यसौ यमाय
त्वा परि ददाम्यसौ गदाय त्वा परि ददाम्यसावन्तकाय त्वा परि ददाम्यसावद्भ्यस्त्वा
परि ददाम्यसावोषधीभ्यस्त्वा परि ददाम्यसौ पृथिव्यै त्वा सवैश्वानरायै परि ददाम्यसौ

। देवस्य त्वा सवितुः प्रसव उपनयेऽसौ । सुप्रजाः प्रजया भूयाः सुवीरो वीरैः सुवर्चा वर्चसा सुपोषः पोषैः । ब्रह्मचर्यमागामुप मा नयस्व देवेन सवित्रा प्रसूतः । कोनामास्यसौ नामाऽस्मि कस्य ब्रह्मचार्यस्यसौ प्राणस्य ब्रह्मचार्यस्म्यसा वेष ते देव सूर्य ब्रह्मचारी तं गोपाय स मा मृतैष ते सूर्य पुत्रः सदीर्घायुः स मा मृत । याग् स्वस्तिमग्निर्वायुः सूर्यश्चन्द्रमा आपोऽनु सं चरन्ति ताग् स्वस्तिमनु सं चरासावध्वनामध्वपते श्रेष्ठस्याध्वनः पारमशीय ॥ ०। ०। २। ३॥ आगन्त्रा दश ॥ ३॥

४ योगेयोगे तवस्तरमिममग्न आयुषे वर्चसे कृधीति द्वे । शतमिन्नु शरदो अन्ति देवा यत्रा नश्चक्रा जरसं तनूनाम् । पुत्रासो यत्र पितरो भवन्ति मा नो मध्या रीरिषतायुर्गन्तोः । अग्निष्ट आयुः प्रतरां दधात्वग्निष्टे पुष्टिं प्रतरां कृणोतु । इन्द्रो मरुद्भिर् ऋतुधा कृणोत्वादित्यैस्ते वसुभिरा दधातु । मेधां मह्यमंगिरसो मेधाꣳ सप्तर्षयो ददुः । मेधां मह्यं प्रजापतिर्मेधामग्निर्ददातु मे । अप्सरासु च या मेधा गन्धर्वेषु च यद्यशः । दैवी या मानुषी मेधा सा मामाविशतादिह । इमं मे वरुण तत्त्वा यामि त्वं नो अग्ने स त्वं नो अग्ने त्वमग्ने अयाऽसि । राष्ट्रभृदस्याचार्यासन्दी मा त्वद्योषम् । तथ्सवितुर्वरेण्यमित्येषा । अवृधमसौ सौम्य प्राण स्वं मे गोपाय । ब्रह्मण आणी स्थः ॥ ०। ०। २। ४॥ त्वमग्ने अयासि चत्वारि च ॥ ४॥

५ सुश्रवः सुश्रवसं मा कुरु यथा त्वꣳ सुश्रवः सुश्रवा अस्येवमहꣳ सुश्रवः सुश्रवा भूयासं यथा त्वꣳ सुश्रवः सुश्रवो देवानां निधिगोपोऽस्येवमहं ब्राह्मणानां ब्रह्मणो निधिगोपो भूयासम् । स्मृतं च मेऽस्मृतं च मे तन्म उभयं व्रतं निन्दा च मेऽनिन्दा च मे तन्म उभयं व्रत२ꣳ श्रद्धा च मेऽश्रद्धा च मे तन्म उभयं व्रतं विद्या च मेऽविद्या च मे तन्म उभयं व्रत२ꣳ श्रुतं च मेऽश्रुतं च मे तन्म उभयं व्रतꣳ सत्यं च मेऽनृतं च मे तन्म उभयं व्रतं तपश्च मेऽतपश्च मे तन्म उभयं व्रतं व्रतं च मेऽव्रतं च मे तन्म उभयं व्रतं यद्ब्राह्मणानां ब्रह्मणि व्रतं यदग्नेः सेन्द्रस्य सप्रजापतिकस्य सदेवस्य सदेवराजस्य समनुष्यस्य समनुष्यराजस्य सपितृकस्य सपितृराजस्य सगन्धर्वाप्सरस्कस्य । यन्म आत्मन आत्मनि व्रतं तेनाहꣳ सर्वव्रतो भूयासम् । उदायुषा स्वायुषोदोषधीनाꣳ रसेनोत्पर्जन्यस्य शुष्मेणोदस्थाममृताꣳ अनु । तच्चक्षुर्देवहितं पुरस्ताच्छुक्रमुच्चरत् । पश्येम शरदः शतं जीवेम शरदः शतं नन्दाम शरदः शतं मोदाम शरदः शतं भवाम शरदः शतꣳ शृणवाम शरदः शतं प्रब्रवाम शरदः शतमजीताः स्याम शरदः शतं ज्योक्च

सूर्यं दृशे । यस्मिन्भूतं च भव्यं च सर्वे लोकाः समाहिताः । तेन गृह्णामि त्वामहं मह्यं गृह्णामि त्वामहं प्रजापतिना त्वा मह्यं गृह्णाम्यसौ ॥ ०। ०। २। ५॥ सुश्रवः सुश्रवसमष्टौ ॥ ५॥

स्मृतं निंदा श्रद्धा विद्या श्रुतꣳ सत्यं तपो व्रतं यद्ब्राह्मणानां नव ॥

६ परि त्वाऽग्ने परि मृजाम्यायुषा च धनेन च । सुप्रजाः प्रजया भूयासꣳ सुवीरो वीरैः सुवर्चा वर्चसा सुपोषः पोषैः सुगृहो गृहैः सुपतिः पत्या सुमेधा मेधया सुब्रह्मा ब्रह्मचारिभिः । अग्नये समिधमाहार्षं बृहते जातवेदसे यथा त्वमग्ने समिधा समिध्यस एवं मामायुषा वर्चसा सन्या मेधया प्रजया पशुभिर्ब्रह्मवर्चसेनान्नाद्येन समेधय स्वाहा । एधोऽस्येधिषीमहि स्वाहा । समिदसि समेधिषीमहि स्वाहा । तेजोऽसि तेजो मयि धेहि स्वाहा । अपो अद्यान्वचारिषꣳ रसेन समसृक्ष्महि । पयस्वाꣳ अग्न आगमं तं मा सꣳसृज वर्चसा स्वाहा । सं माऽग्ने वर्चसा सृज प्रजया च धनेन च स्वाहा । विद्युन्मे अस्य देवा इन्द्रो विद्यात्सहर्षिभिस्स्वाहा । अग्नये बृहते नाकाय स्वाहा । द्यावापृथिवीभ्याग् स्वाहा । एषा ते अग्ने समित्तया वर्धस्व चाप्यायस्व च तयाऽहं वर्धमानो भूयासमाप्यायमानश्च स्वाहा । यो माऽग्ने भागिनꣳ सन्तमथाभागं चिकीर्षत्यभागमग्ने तं कुरु मामग्ने भागिनं कुरु स्वाहा । समिधमाधायाग्ने सर्वव्रतो भूयासग्ग् स्वाहा । ब्रह्मचार्यस्यपोऽशान कर्म कुरु मा सुषुप्थाः । भिक्षाचर्यं चराचार्याधीनो भव । यस्य ते प्रथमवास्यꣳ हरामस्तं त्वा विश्वे अवन्तु देवाः । तं त्वा भ्रातरस्सुवृधो वर्धमानमनु जायन्तां बहवस्सुजातम् ॥ ०। ०। २। ६॥ सह ऋषिभिः स्वाहा नव च ॥ ६॥

७ इम२ꣳ स्तोममर्हते जातवेदसे रथमिव संमहेमा मनीषया । भद्रा हि नः प्रमतिरस्य सꣳसद्यग्ने सख्ये मा रिषामा वयं तव । त्र्यायुषं जमदग्नेः कश्यपस्य त्र्यायुषम् । यद्देवानां त्र्यायुषं तन्मे अस्तु त्र्यायुषम् । शिवो नामासि स्वधितिस्ते पिता नमस्ते अस्तु मा मा हिꣳसीः । उष्णेन वायवुदकेनेत्येषः । इदमहममुष्यामुष्यायणस्य पाप्मानमुपगूहाम्युत्तरोऽसौ द्विषद्भ्यः । आपो हिष्ठा मयोभुव इति तिस्रो हिरण्यवर्णाः शुचयः पावका इति तिस्रः । अन्नाद्याय व्यूहध्वं दीर्घायुरहमन्नादो भूयासम् । सोमो राजा यमागमथ्स मे मुखं प्रवेक्ष्यति भगेन सह वर्चसा । सोमस्य तनूरसि तनुवं मे पाहि स्वा मा तनूराविश । नमो ग्रहाय चाभिग्रहाय च नमः शाकजञ्जभाभ्यां नमस्ताभ्यो देवताभ्यो या अभिग्राहिणीः । अप्सरस्सु यो गन्धो गन्धर्वेषु च यद्यशः । दैवो यो मानुषो गन्धस्स मा गन्धस्सुरभिर्जुषताम् । इयमोषधे त्रायमाणा सहमाना सहस्वती ।

सा मा हिरण्यवर्चसं ब्रह्मवर्चसिनं मा करोतु । अपाशोऽस्युरो मे मा सꣳ शारीः शिवो
मोप तिष्ठस्व दीर्घायुत्वाय शतशारदाय । शतꣳ शरद्भ्य आयुषे वर्चसे जीवात्वै पुण्याय
। रेवतीस्त्वा व्यक्ष्णन्नित्येताः ॥ ०। ०। २। ७॥ सह वर्चसा नव च ॥ ७॥
८ आयुष्यं वर्चस्यꣳसुवीर्यꣳरायस्पोषमौद्भिद्यम् । इदꣳ हिरण्यं जैत्र्यायाविशतां माम् ।
उच्चैर्वादि पृतनाजि सत्रासाहं धनञ्जयम् । सर्वाः समृद्धीर् ऋद्धयो हिरण्येऽस्मिन्थ्समाहिताः
। शुनमहꣳ हिरण्यस्य पितुरिव नामाग्रभैषम् । तं मा हिरण्यवर्चसं पूरुषु प्रियं कुरु ।
प्रियं मा देवेषु कुरु प्रियं मा ब्रह्मणे कुरु । प्रियं विश्येषु शूद्रेषु प्रियꣳ राजसु मा कुरु
। या तिरश्ची निपद्यसेऽहं विधरणी इति । तां त्वा घृतस्य धारया यजे सꣳराधनीमहम्
। सꣳराधन्यै देव्यै स्वाहा प्रसाधन्यै देव्यै स्वाहा । सम्राजं च विराजं चाभिश्रीर्या च
नो गृहे । लक्ष्मी राष्ट्रस्य या मुखे तया मा सꣳ सृजामसि । शुभिके शिर आ रोह
शोभयन्ती मुखं मम । मुखꣳहि मम शोभय भूयाꣳसं च भगं कुरु । यामाहरज्जमदग्निः
श्रद्धायै कामायान्यै । इमां तामपि नह्येऽहं भगेन सह वर्चसा । यदाञ्जनं त्रैककुदं जातꣳ
हिमवत उपरि । तेन वामाञ्जे तेजसे वर्चसे भगाय च ॥ ०। ०। २। ८॥
सꣳराधनीमहं नव च ॥ ८॥
९ मयि पर्वतपूरुषं मयि पर्वतवर्चसं मयि पर्वतभेषजं मयि पर्वतायुषम् । यन्मे
वर्चः परागतमात्मानमुपतिष्ठतु । इदं तत्पुनराददे दीर्घायुत्वाय वर्चसे । प्रतिष्ठे
स्थो देवतानां मा मा संताप्तम् । प्रजापतेः शरणमसि ब्रह्मणश्छदिर्विश्वजनस्य
छायाऽसि सर्वतो मा पाहि । देवस्य त्वा सवितुः प्रसवेऽश्विनोर्बाहुभ्यां पूष्णो
हस्ताभ्यामाददे द्विषतो वधायेन्द्रस्य वज्रोसि वार्त्रघ्नः शर्म मे भव यत्पापं तन्निवारय
। देवीष्षडुर्वीरित्येषा । राष्ट्रभृदस्याचार्यासन्दी मा त्वद्योषꣳ राष्ट्रभृदसि सम्राडासन्दी मा
त्वद्योषꣳ राष्ट्रभृदस्यधिपत्न्यासन्दी मा त्वद्योषम् । आपः पादावनेजनीर्द्विषन्तं नाशयन्तु
मे । अस्मिन्कुले ब्रह्मवर्चस्यसानि । मयि महो मयि यशो मयीन्द्रियं वीर्यम् । आमागन्
यशसा वर्चसा सꣳसृज पयसा तेजसा च । तं मा प्रियं प्रजानां कुर्वधिपतिं पशूनाम्
। विराजो दोहोऽसि विराजो दोहमशीय मम पद्याय विराज । समुद्रं वः प्र हिणोमि
स्वां योनिमपिगच्छत । अच्छिद्रः प्रजया भूयासं मा परासेचि मत्पयः ॥ ०। ०। २।
९॥ असानि षट् च ॥ ९॥
१० त्रय्यै विद्यायै यशोऽसि यशसो यशोऽसि ब्रह्मणो दीप्तिरसि । तं मा प्रियं प्रजानां

कुर्वधिपतिं पशूनाम् । आ मा गन्नित्येषा । अमृतोपस्तरणमस्यमृतापिधानमसि ।
यन्मधुनो मधव्यं परममन्नाद्यं वीर्यम् । तेनाहं मधुनो मधव्येन परमेणान्नाद्येन वीर्येण
परमोऽन्नादो मधव्योऽसानि । गौरस्यपहतपाप्माऽप पाप्मानं जहि मम चामुष्य च ।
अग्निः प्राश्नातु प्रथमस्स हि वेद यथा हविः । अनष्टमस्माकं कृण्वन्ब्राह्मणो ब्राह्मणेभ्यः
। यज्ञो वर्धतां यज्ञस्य वृद्धिमनु वर्धाऽप चितिरस्यपचितिं मा कुर्वपचितोऽहं मनुष्येषु
भूयासम् । गौर्धेनुभव्या माता रुद्राणां दुहिता वसूनाग् स्वसाऽऽदित्यानाममृतस्य नाभिः
। प्रणु वोचं चिकितुषे जनाय मा गामनागामदितिं वधिष्ट । पिबतूदकं तृणान्यत्तु ।
ओमुथ्सृजत । भूतम् । सा विराट् । तन्मा क्षायि तस्य तेऽशीय तन्म ऊर्जं धाः ।
ओं कल्पयत ॥
०। ०। २। १०॥
भूयासमष्टौ च ॥ १०॥
११ धाता ददातु नो रयिमिति चतस्रो यस्त्वा हृदा कीरिणेति चतस्रः । भूर्भुवस्सुवो
राकामहं यास्ते राके । यौगन्धरिरेव नो राजेति साल्वीरवादिषुः । विवृत्तचक्रा
आसीनास्तीरेण यमुने तव । सोम एव नो राजेत्याहुर्ब्राह्मणीः प्रजाः । विवृत्तचक्रा
आसीनास्तीरेणासौ तव । पुꣳसुवनमसि । आभिष्ट्वाऽहं दशभिरभिमृशामि दशमास्याय
सूतवे । यथैव सोमः पवते यथा समुद्र एजति । एवं ते गर्भ एजतु सह जरायुणा निष्क्रम्य
प्रतितिष्ठत्वायुषि ब्रह्मवर्चसि यशसि वीर्येऽन्नाद्ये । दशमासांच शयानो धात्रा हि तथा
कृतम् । ऐतु गर्भो अक्षतो जीवो जीवन्त्याः । आयमनीर्यमयत गर्भमापो देवीः सरस्वतीः
। ऐतु गर्भो अक्षतो जीवो जीवन्त्याः । तिलदेऽव पद्यस्व न माꣳसमसि नोदलम् ।
स्थवित्र्यवपद्यस्व न माꣳसेषु न स्नावसु न बद्धमसि मज्ञसु । निरैतु पृश्नि शेवलꣳ
शुने जराय्वत्तवे । दिवस्परीत्येषोऽनुवाकः । अस्मिन्नहꣳ सहस्रं पुष्याम्येधमानस्स्वे वशे
। अङ्गादङ्गाथ्सं भवसि हृदयादधि जायसे । आत्मा वै पुत्रनामाऽसि स जीव शरदः
शतम् ॥ ०। ०। २। ११॥
अन्नाद्ये जायस एकं च ॥ ११॥
१२ अश्मा भव परशुर्भव हिरण्यमस्तृतं भव । पशूनां त्वा हिंकारेणाभिजिघ्राम्यसौ ।
मेधां ते देवः सविता मेधां देवी सरस्वती । मेधां ते अश्विनौ देवावाधत्तां पुष्करस्रजा ।
त्वयि मेधां त्वयि प्रजां त्वय्यग्निस्तेजो दधातु त्वयि मेधां त्वयि प्रजां त्वयीन्द्र इन्द्रियं
दधातु त्वयि मेधां त्वयि प्रजां त्वयि सूर्यो भ्राजो दधातु । क्षेत्रियै त्वा निर्ऋत्यै त्वा

द्रुहो मुञ्चामि वरुणस्य पाशात् । अनागसं ब्रह्मणे त्वा करोमि शिवे ते द्यावापृथिवी उभे इमे । शं ते अग्निस्सहाद्भिरस्तु शं द्यावापृथिवी सहौषधीभिः । शमन्तरिक्षꣳ सह वातेन ते शं ते चतस्रः प्रदिशो भवन्तु । या दैवीश्चतस्रः प्रदिशो वातपत्नीरभि सूर्यो विचष्टे । तासां त्वाऽऽजरस आ दधामि प्र यक्ष्म एतु निर्ऋतिं पराचैः । अमोचि यक्ष्माद्दुरितादवर्त्यै द्रुहः पाशान्निर्ऋत्यै चोदमोचि । अहा अवर्तिमविदथ्स्योनमप्यभूद्भद्रे सुकृतस्य लोके । सूर्यमृतं तमसो ग्राह्या यद्देवा अमुञ्चन्नसृजन्व्येनसः । एवमहमिमं क्षेत्रियाज्जामिशꣳसाद्द्रुहो मुञ्चामि वरुणस्य पाशात् । भूस्स्वाहा भुवस्स्वाहा सुवस्स्वाहोग् स्वाहा ॥ ०। ०। २। १२॥ विचष्टे षट्च ॥ १२॥

१३ मा ते कुमारꣳ रक्षो वधीन्मा धेनुरत्यासारिणी । प्रिया धनस्य भूया एधमाना स्वे गृहे । अयं कुमारो जरां धयतु दीर्घमायुः । यस्मै त्वꣳ स्तन प्राप्यायायुर्वर्चो यशो बलम् । यद्भूमेर्हृदयं दिवि चन्द्रमसि श्रितम् । तदुर्वि पश्यं माऽहं पौत्रमघꣳ रुदम् । यत्ते सुसीमे हृदयं वेदाहं तत्प्रजापतौ । वेदाम तस्य ते वयं माऽहं पौत्रमघꣳ रुदम् । नामयति न रुदति यत्र वयं वदामसि यत्र चाभिमृशामसि । आपः सुप्तेषु जाग्रत रक्षाꣳसि निरितो नुदध्वम् । अयं कलिं पतयन्तꣳ श्वानमिवोद्वृद्धम् । अजां वाशितामिव मरुतः पर्याध्वग्ग् स्वाहा । शण्डेरथः शण्डिकेर उलूखलः । च्यवनो नश्यतादितस्स्वाहा । अयः शण्डो मर्क उपवीर उलूखलः । च्यवनो नश्यतादितस्स्वाहा । केशिनीश्श्वलोमिनीः खजापोऽजोपकाशिनीः । अपेत नश्यतादितस्स्वाहा । मिश्रवाससः कौबेरका रक्षोराजेन प्रेषिताः । ग्रामꣳ सजानयो गच्छन्तीच्छन्तोऽपरिदाकृतान्थ्स्वाहा । एतान् घ्नतैतान्गृह्णीतेत्ययं ब्रह्मणस्पुत्रः । तानग्निः पर्यसरत्तानिन्द्रस्तान्बृहस्पतिः । तानहं वेद ब्राह्मणः प्रमृशतः कूटदन्तान्, विकेशान् लम्बनस्तनान्थ्स्वाहा ॥ ०। ०। २। १३॥ निरितो नुदध्वग्ग् स्वाहा त्रीणि च ॥ १३॥

१४ नक्तंचारिण उरस्पेशाञ्छूलहस्तान्कपालपान् । पूर्व एषां पितेत्युच्चैः श्राव्यकर्णकः । माता जघन्या सर्पति ग्रामे विधुरमिच्छन्ती स्वाहा । निशीथचारिणी स्वसा सन्धिना प्रेक्षते कुलम् । या स्वपन्तं बोधयति यस्यै विजातायां मनः । तासां त्वं कृष्णवर्त्मने क्लोमानꣳ हृदयं यकृत् । अग्ने अक्षीणि निर्दह स्वाहा । अङ्गादङ्गाथ्संभवसि हृदयादधि जायसे । वेदो वै पुत्रनामाऽसि स जीव शरदः शतम् । अश्मा भवेत्येषा । अग्निरायुष्मानिति पश्च । सर्वस्मादात्मनः संभूताऽसि सा जीव शरदः शतम् ।

भूरपां त्वौषधीना१ँ रसं प्राशयामि शिवास्त आप ओषधयः सन्त्वनमीवास्त आप ओषधयस्सन्त्वसौ भुवोऽपा१ँ सुवरपां भूर्भुवस्सुवरपां त्वौषधीना१ँ रसं प्राशयामि शिवास्त आप ओषधयः सन्त्वनमीवास्त आप ओषधयः सन्त्वसौ । उष्णेन वायवुदकेनेत्येषः ॥ ०। ०। २। १४॥ एषा चत्वारि च ॥ १४॥

१५ यद्भूमेः क्रूरं तदितो हरामि पराचीं निर्ऋतिं निर्वाहयामि । इद२ँ श्रेयोऽवसानमागन्म देवा गोमदश्वावदिदमस्तु प्र भूम । स्योना पृथिवि भवानृक्षरा निवेशनी । यच्छा नः शर्म सप्रथाः । इहैव तिष्ठ निमिता तिल्वला स्यादिरावती । मध्ये ताल्प्यस्य तिष्ठान्मा त्वा प्रापन्नघायवः । आ त्वा कुमारस्तरुण आ वथ्सो जगता सह । आ त्वा परिस्रुतः कुम्भा आ दध्नः कलशीरयन् । ऋतेन स्थूणावधिरोह व१ँशोग्रो विराजन्नपसेध शत्रून् । ब्रह्म च ते क्षत्रं च पूर्वे स्थूणे अभि रक्षतु । यज्ञश्च दक्षिणाश्च दक्षिणे इषश्चोर्जश्चापरे मित्रश्च वरुणश्चोत्तरे । धर्मस्ते स्थूणा राजश्श्रीस्ते स्तूपः । उद्धियमाण उद्धर पाप्मनो मा यदविद्वान् यच्च विद्वाग्श्चकार । अह्ना यदेनः कृतमस्ति पाप१ँ रात्र्या यदेनः कृतमस्ति पाप१ँ सर्वस्मान्मोद्धृतो मुञ्च तस्मात् । इन्द्रस्य गृहा वसुमन्तो वरूथिनस्तानह१ँ सुमनसः प्रपद्ये । अमृताहुतिममृतायां जुहोम्यग्निं पृथिव्याममृतस्य जित्यै तयाऽनन्तं काममहं जयानि प्रजापतिर्यं प्रथमो जिगायाग्निमग्नौ स्वाहा । अन्नपत इत्येषा । अरिष्टा अस्माकं वीरास्सन्तु मा परासेचि मे धनम् । भूमिर्भूमिमगान्माता मातरमप्यगात् । भूयास्म पुत्रैः पशुभिर्यो नो द्वेष्टि स भिद्यताम् । वास्तोष्पत इति द्वे । वास्तोष्पते प्रतरणो न एधि गोभिरश्वेभिरिन्दो । अजरासस्ते सख्ये स्याम पितेव पुत्रान् प्रति नो जुषस्व । अमीवहा वास्तोष्पते विश्वा रूपाण्याविशन् । सखासु शेव एधि नः । शिव१ँ शिवम् ॥ ०। ०। २। १५॥ अभिरक्षतु भिद्यता१ँ षट् च ॥ १५॥

१६ कूर्कुरः सुकूर्कुरः कूर्कुरो बालबन्धनः । उपरिष्टाद्यदेजाय तृतीयस्या इतो दिवः । औलब इत्तमुपाह्वयथार्जीञ्छ्यामः शबलः । अधोराम उलुम्बलः सारमेयोह धावति समुद्रमवचाकशत् । बिभ्रन्निष्कं च रुक्मं च शुनामग्र१ँ सुबीरिणः । सुबीरिण सृजसृज शुनक सृजैकव्रात्य सृजच्छत् । तथ्सत्यं यत्त्वेन्द्रोऽब्रवीद्गाः स्पाशयस्वेति तास्त्व२ँ स्पाशयित्वाऽऽगच्छस्तं त्वाऽब्रवीदविद हा ३ इत्यविद१ँहीति वरं वृणीष्वेति कुमारमेवाहं वरं वृण इत्यब्रवीर्विगृह्य बाहू प्लवसे द्यामवचाकशत् । बिभ्रन्निष्कं च रुक्मं च शुनामग्र१ँ

सुबीरिणः । सुबीरिण सृजसृज शुनक सृजैकव्रात्य सृजच्छत् । तथ्सत्यं यत्ते सरमा माता लोहितः पिता । अमी एके सरस्यका अवधावति तृतीयस्या इतो दिवः । तेकश्च ससरमतण्डश्च तूलश्च वितूलश्चार्जुनश्च लोहितश्च । दुला ह नाम वो माता मन्थाकको ह वः पिता । सं तक्षा हन्ति चक्री वो न सीसरीदत । छुदपेहि सीसरम सारमेय नमस्ते अस्तु सीसर । समश्वा वृषणः पदो न सीसरीदत । छुदपेहि सीसरम सारमेय नमस्ते अस्तु सीसर । श्वानमिच्छ्वाऽदन्न पुरुषञ्छत् । एते ते प्रतिदृश्येते समानवसने उभे । ते अहꣳ सारयेण मुसलेनावहन्म्युलूखले । हतः शङ्खो हतः शङ्खपिता हतः शङ्खकुतुर्वकः । अप्येषाग् स्थपतिर्हतः । ऋषिर्बोधः प्रबोधस्स्वप्नो मातरिश्वा । ते ते प्राणान्थ्स्परिष्यन्ति मा भैषीर्न मरिष्यसि । जग्धो मशको जग्धा वितृष्टिर्जग्धो व्यध्वरस्स्वाहा जग्धो व्यध्वरो जग्धो मशको जग्धा वितृष्टिस्स्वाहा जग्धा वितृष्टिर्जग्धो व्यध्वरो जग्धो मशकस्स्वाहा
॥ ०। ०। २। १६॥

पिताऽवहन्म्युलूखले पंच च ॥ १६॥

१७ इन्द्र जहि दन्दशूकं पक्षिणं यस्सरीसृपः । दंक्ष्णन्तं च दशन्तं च सर्वाग्स्तानिन्द्र जम्भय स्वाहा । अप्सु जात सरे वृद्ध देवानामपि हस्त्य । त्वमग्न इन्द्र प्रेषितस्स नो मा हिꣳसीः स्वाहा । त्राणमसि परित्राणमसि परिधिरसि । अन्नेन मनुष्याग् स्त्रायसे तृणैः पशून्गर्तेन सर्पान्, यज्ञेन देवान्थ्स्वधया पितॄन्थ्स्वाहा । तथ्सत्यं यत्तेऽमावास्यायां च पौर्णमास्यां च विषबलिꣳ हरन्ति सर्वे उदरसर्पिणः । तत्ते प्रेरते त्वयि संविशन्ति त्वयि नस्सतस्त्वयि सन्नो वर्षाभ्यो नः परिदेहि । नमो अस्तु सर्पेभ्य इति तिस्रः । नमो अस्तु सर्पेभ्यो ये पार्थिवा य आन्तरिक्ष्या ये दिव्या ये दिश्याः । तेभ्य इमं बलिꣳ हरिष्यामि तेभ्य इमं बलिमहार्षम् । तक्षक वैशालेय धृतराष्ट्रैरावतस्ते जीवास्त्वयि नस्सतस्त्वयि सन्नो वर्षाभ्यो नः परिदेहि । धृतराष्ट्रैरावत तक्षक वैशालेयस्ते जीवास्त्वयि नस्सतस्त्वयि सन्नो वर्षाभ्यो नः परिदेहि । अहिꣳसाऽतिबलस्ते जीवास्त्वयि नस्सतस्त्वयि सन्नो वर्षाभ्यो नः परिदेहि । अतिबलाऽहिꣳसस्ते जीवास्त्वयि नस्सतस्त्वयि सन्नो वर्षाभ्यो नः परिदेहि । ये दन्दशूकाः पार्थिवास्ताग्स्त्वमितः परो गव्यूति निवेशय । सन्ति वै नः शफिनः सन्ति दण्डिनस्ते वो नेद्धिनसान्येद्यूयमस्मान् हिनसात । समीची नामासि प्राची दिग्घेतयो नाम स्थेति द्वादश पर्यायाः । अपश्वेत पदा जहि पूर्वेण चाऽपरेण च । सप्त च मानुषीरिमास्तिस्रश्च राजबन्धवीः । न वै श्वेतस्याध्याचारेऽहिर्जघान कंचन । श्वेताय

वैदर्वाय नमो नमः श्वेताय वैदर्वाय ॥ ०। ०। २। १७॥ दिश्या राजबन्धवीर्द्वे च ॥ १७॥

१८ परमेष्ठ्यसि परमां माग् श्रियं गमय प्रत्यवरूढो नो हेमन्तः । प्रति क्षत्रे प्रति तिष्ठामि राष्ट्रे प्रत्यश्वेषु प्रति तिष्ठामि गोषु । प्रति प्रजायां प्रति तिष्ठामि भव्ये । इह धृतिरिह विधृतिरिह रन्तिरिह रमतिः । स्योना पृथिवि बडित्था पर्वतानामिति द्वे । आ त्वा वहन्तु हरयः सचेतसः श्वेतैरश्वैः सह केतुमद्भिः । वाताजिरैरायाहि मम हव्याय शर्वोप स्पृशतु मीढ्वान्मीढुषे स्वाहोपस्पृशतु मीढुषी मीढुष्यै स्वाहा जयन्तोपस्पृश जयन्ताय स्वाहा भवाय देवाय स्वाहा शर्वाय देवाय स्वाहेशानाय देवाय स्वाहा पशुपतये देवाय स्वाहा रुद्राय देवाय स्वाहोग्राय देवाय स्वाहा भीमाय देवाय स्वाहा महते देवाय स्वाहा भवस्य देवस्य पत्न्यै स्वाहा शर्वस्य देवस्य पत्न्यै स्वाहेशानस्य देवस्य पत्न्यै स्वाहा पशुपतेर्देवस्य पत्न्यै स्वाहा रुद्रस्य देवस्य पत्न्यै स्वाहोग्रस्य देवस्य पत्न्यै स्वाहा भीमस्य देवस्य पत्न्यै स्वाहा महतो देवस्य पत्न्यै स्वाहा जयन्ताय स्वाहाऽग्नये स्विष्टकृते सुहुतहुदाहुतीनां कामानाँ समर्धयित्रे स्वाहा । स्वस्ति नः पूर्णमुखः परिक्रामतु गृहपोपस्पृश गृहपाय स्वाहा गृहप्युपस्पृश गृहप्यै स्वाहा घोषिण उपस्पृशत घोषिभ्यः स्वाहा श्वासिन उपस्पृशत श्वासिभ्यः स्वाहा विचिन्वन्त उपस्पृशत विचिन्वद्भ्यः स्वाहा प्रपुन्वन्त उपस्पृशत प्रपुन्वद्भ्यः स्वाहा समश्नन्त उपस्पृशत समश्नद्भ्यः स्वाहा देवसेना उपस्पृशत देवसेनाभ्यस्स्वाहा या आख्याता याश्चानाख्याता देवसेना उपस्पृशत देवसेनाभ्यः स्वाहा द्वारपोपस्पृश द्वारपाय स्वाहा द्वारप्युप स्पृश द्वारप्यै स्वाहाऽन्वासारिण उपस्पृशतान्वासारिभ्यः स्वाहा निषङ्गिन्नुपस्पृश निषङ्गिणे स्वाहा नमो निषङ्गिण इषुधिमते क्षेत्रस्य पतिना वयमिति द्वे ॥ ०। ०। २। १८॥ परमेष्ठ्यसि परमामष्टौ ॥ १८॥

१९ यन्मे माता प्रलुलोभ चरत्यननुव्रता । तन्मे रेतः पिता वृङ्क्तां माभुरन्योऽवपद्यताममुष्मै स्वाहा । यास्तिष्ठन्ति या धावन्ति या आर्द्रोघ्नीः परितस्थुषीः । अद्भिर्विश्वस्य भर्त्रीभिरन्तरन्यं पितुर्दधेऽमुष्मै स्वाहा । यन्मे पितामही प्रलुलोभ चरत्यननुव्रता । तन्मे रेतः पितामहो वृङ्क्तां माभुरन्योऽवपद्यताममुष्मै स्वाहा । अन्तर्दधे पर्वतैरन्तर्मह्या पृथिव्या । आभिर्दिग्भिरनन्ताभिरन्तरन्यं पितामहाद्दधेऽमुष्मै स्वाहा । यन्मे प्रपितामही प्रलुलोभ चरत्यननुव्रता । तन्मे रेतः प्रपितामहो वृङ्क्तां माभुरन्योऽवपद्यताममुष्मै स्वाहा । अन्तर्दध ऋतुभिरहोरात्रैस्स सन्धिभिः । अर्धमासैश्च मासैश्चान्तरन्यं प्रपितामहाद्दधेऽमुष्मै

स्वाहा । ये चेह पितरो ये च नेह याग्श्च विद्म याꣳ उ च न प्रविद्म । अग्ने तान्, वेत्थ यदि ते जातवेदस्तया प्रत्त२ꣳ स्वधयामदन्तु स्वाहा । स्वाहा पित्रे । पित्रे स्वाहा । स्वाहा पित्रे । पित्रे स्वाहा । स्वधा स्वाहा । अग्नये कव्यवाहनाय स्वधा स्वाहा । एष ते तत मधुमाꣳ ऊर्मिः सरस्वान् यावानग्निश्च पृथिवी च तावत्यस्य मात्रा तावतीं त एतां मात्रां ददामि यथाऽग्निरक्षितोऽनुपदस्त एवं मह्यं पित्रेऽक्षितोऽनुपदस्तः स्वधा भव तां त्व२ꣳ स्वधां तैस्सहोपजीवर्चस्ते महिमैष ते पितामह मधुमाꣳ ऊर्मिस्सरस्वान् यावान् वायुश्चान्तरिक्षं च तावत्यस्य मात्रा तावतीं त एतां मात्रां ददामि यथा वायुरक्षितोऽनुपदस्त एवं मह्यं पितामहायाक्षितोऽनुपदस्तः स्वधा भव तां त्व२ꣳ स्वधां तैस्सहोपजीव सामानि ते महिमैष ते प्रपितामह मधुमाꣳ ऊर्मिस्सरस्वान् यावानादित्यश्च द्यौश्च तावत्यस्य मात्रा तावतीं त एतां मात्रां ददामि यथाऽऽदित्योऽक्षितोऽनुपदस्त एवं मह्यं प्रपितामहायाक्षितोऽनुपदस्तः स्वधा भव तां त्व२ꣳ स्वधां तैस्सहोपजीव यजूꣳषि ते महिमा ॥ ०। ०। २। १९॥ अमुष्मै स्वाहा स्वधा स्वाहैकं च ॥ १९॥

२० पृथिवी ते पात्रं द्यौरपिधानं ब्रह्मणस्त्वा मुखे जुहोमि ब्राह्मणानां त्वा प्राणापानयोर्जुहोम्यक्षितमसि मैषां क्षेष्ठा अमुत्राऽमुष्मिन्लोके । मार्जयन्तां मम पितरो मार्जयन्तां मम पितामहा मार्जयन्तां मम प्रपितामहा मार्जयन्तां मम मातरो मार्जयन्तां मम पितामह्यो मार्जयन्तां मम प्रपितामह्यः । एतत्ते ततासौ ये च त्वामन्वेतत्ते पितामहासौ ये च त्वामन्वेतत्ते प्रपितामहासौ ये च त्वामन्वेतत्ते मातरसौ याश्च त्वामन्वेतत्ते पितामह्यसौ याश्च त्वामन्वे तत्ते प्रपितामह्यसौ याश्च त्वामनु । मार्जयन्तां मम पितर इत्येते । ये च वोऽत्र ये चास्मास्वाशꣳसन्ते याश्च वोऽत्र याश्चास्मास्वाशꣳसन्ते ते च वहन्तां ताश्च वहन्तां तृप्यन्तु भवन्त स्तृप्यन्तु भवत्य स्तृप्यत तृप्यत तृप्यत । पुत्रान्पौत्रानभि तर्पयन्तीरापो मधुमतीरिमाः । स्वधां पितृभ्यो अमृतं दुहाना आपो देवीरुभयाग्स्तर्पयन्तु । तृप्यत तृप्यत तृप्यत । प्राणे निविष्टोऽमृतं जुहोमि ब्रह्मणि म आत्माऽमृतत्वाय । यां जनाः प्रतिनन्दन्ति रात्रिं धेनुमिवायतीम् । संवथ्सरस्य या पत्नी सा नो अस्तु सुमङ्गली स्वाहा । वह वपां जातवेदः पितृभ्यो यत्रैनान् वेत्थ निहितान्पराके । मेदसः कूल्या उप तान्क्षरन्तु सत्या एता आशिषस्सन्तु कामैस्स्वाहा । यां जनाः प्रतिनन्दन्तीत्येषा । इयमेव सा या प्रथमा व्यौच्छदिति तिस्रः । एकाष्टकां पश्यत दोहमानामन्नं मा ꣳसवद् घृतवथ्स्वधावत् । तद्ब्राह्मणैरति पूतमनन्तमक्षय्यममुष्मिन्

लोके स्फीतिं गच्छतु मे पितृभ्यः स्वाहा । औलूखला ग्रावाणो घोषमक्रत हविः कृण्वन्तः परिवथ्सरीणम् । एकाष्टके सुप्रजा वीरवन्तो वय२ँ स्याम पतयो रयीणाम् । एकाष्टका तपसा तप्यमाना संवथ्सरस्य पत्नी दुदुहे प्रपीना । तं दोहमुप जीवाथ पितरः सहस्रधारममुष्मिन् लोके स्वाहा ॥ ०। ०। २। २०॥
आयतीं प्रपीनैकं च ॥ २०॥
२१ उक्थ्यश्चाऽस्यतिरात्रश्च साद्यस्क्रीश्छन्दसा सह । अपूपघृताहुते नमस्ते अस्तु माँ सपिप्पले स्वाहा । भूः पृथिव्यग्निनर्चाऽमुं मयि कामं नियुनज्मि स्वाहा । भुवो वायुनाऽन्तरिक्षेण साम्नाऽमुं मयि कामं नियुनज्मि स्वाहा । स्वर्दिवाऽऽदित्येन यजुषाऽमुं मयि कामं नियुनज्मि स्वाहा । जनदद्भिरथर्वाङ्गिरोभिरमुं मयि कामं नियुनज्मि स्वाहा । रोचनायाजिरायाग्नये देवजातवे स्वाहा । केतवे मनवे ब्रह्मणे देवजातवे स्वाहा । स्वधा स्वाहाऽग्नये कव्यवाहनाय स्वधा स्वाहा । अन्नमिव ते दृशे भूयासं वस्त्रमिव ते दृशे भूयासं वित्तमिव ते दृशे भूयास माशेव ते दृशे भूयास२ँ श्रद्धेव ते दृशे भूयास ँ स२ँ स्रवन्तु दिशो महीः समाधावन्तु सूनृताः । सर्वे कामा अभियन्तु मा प्रिया अभिरक्षन्तु मा प्रियाः । यशोऽसि यशोऽहं त्वयि भूयासमसौ । अङ्कौ न्यङ्कावभित इत्येषा । अध्वनामध्वपते स्वस्ति मा संपारय । अयं वामश्विना रथो मा दुःखे मा सुखे रिषत् । अरिष्टस्स्वस्ति गच्छतु विविघ्नन्पृतनायतः । अश्वोसि हयोऽस्यत्योसि नरोस्यर्वाऽसि सप्तिरसि वाज्यसि वृषाऽसि नृमणा असि ययुर्नामास्याऽदित्यानां पत्वाऽन्विहि । हस्तियशसमसि हस्तियशसी भूयासं वह कालवह श्रियं माऽभिवह । इन्द्रस्य त्वा वज्रेणाभि निदधाम्यसौ । अव जिह्वक निजिह्वकाव त्वा हविषा यजे । तथ्सत्यं यदहं ब्रवीम्यधरो मदसौ वदाथ्स्वाहा । आ ते वाचमास्यां दद आ मनस्याँ हृदयादधि । यत्रयत्र ते वाङ्निहिता तां त आददे । तथ्सत्यं यदहं ब्रवीम्यधरो मत्पद्यस्वासौ ॥ ०। ०। २। २१॥ सूनृता हविषा यजे चत्वारि च ॥ २१॥
२२ या त एषा रराट्या तनूर्मन्योर्मृध्रस्य नाशिनी । तां देवा ब्रह्मचारिणो विनयन्तु सुमेधसः । यत्त एतन्मुखेऽमतँ रराटमुदिव विध्यति । वि ते क्रोधं नयामसि गर्भमश्वतर्या इव । अव ज्यामिव धन्वनो हृदो मन्युं तनोमि ते । इन्द्रापास्य पलिगमन्येभ्यः पुरुषेभ्योऽन्यत्र मत् । यदहं धनेन प्रपण२ँश्चरामि धनेन देवा धनमिच्छमानः । तस्मिन्थ्सोमो रुचमादधात्वग्निरिन्द्रो बृहस्पतिश्च स्वाहा । परि त्वा

गिरेरमिहं परि भ्रातुः परिष्वसुः । परि सर्वेभ्यो ज्ञातिभ्यः परिषीतः क्वेष्यसि । शश्वत्परिकुपितेन संक्रामेणाऽविच्छिदा । उलेन परिषीतोसि परिषीतोस्युलेन । आवर्तन वर्तयेत्येषा । आवर्तने निवर्तन आवर्तन निवर्तनाय स्वाहा । अनु पोऽह्वदनुह्वयो निवर्तो पोन्यवीवृतत् । ऐन्द्रः परिक्रोशो वः परिक्रोशतु सर्वतः । यदिमामति मन्याध्वा अदेवा देववत्तरम् । इन्द्रः पाशेन सित्का वो मह्यमिद्वशमानयाथ्स्वाहा । यदि वृक्षाद्यद्यन्तरिक्षात् फलमभ्यपतत्तदु वायुरेव । यत्रास्पृक्षत्तनुवं यत्र वास आपो बाधन्तां निर्ऋतिं पराचैः । ये पक्षिणः पतयन्ति बिभ्यतो निर्ऋतैः सह । ते मा शिवेन शग्मेन तेजसोन्दन्तु वर्चसा । दिवो नु मा बृहतो अन्तरिक्षादपाग् स्तोको अभ्यपतच्छिवेन । समहमिन्द्रियेण मनसाऽहमागां ब्रह्मणा संपृचा नः सुकृता कृतेन । इमं मे वरुण तत्त्वा यामि त्वं नो अग्ने स त्वं नो अग्ने त्वमग्ने अयाऽसि प्रजापते । संराजं च व्याहृतीर्विहृताः । इमं जीवेभ्यः परिधिं दधामि मैषां नु गादपरो अर्थमेतम् । शतं जीवन्तु शरदः पुरूचीस्तिरो मृत्युं दधतां पर्वतेन ॥ ०। ०। २। २२॥ क्वेष्यसि पराचैरष्टौ च ॥ २२॥

उष्णेन पञ्चदशायुर्दा एकविꣳशतिरागन्नादश योगे योगे त्रयोदश सुश्रवः सुश्रवसमष्टौ परित्वाग्न इमर२ꣳ स्तोममायुष्यमेकान्न विꣳशतिरेकान्न विꣳशतिर्मयि पर्वत पूरुषꣳ षोडश त्रय्यै विद्याया अष्टादश धाता ददातु नो रयिमेक विꣳशतिरश्मा भव षोडश मा ते कुमारं त्रयोविꣳशतिर्नक्तं चारिणश्चतुर्दश यद्भूमेः षड्विꣳशतिः कूर्कुरः पंचविꣳशतिरिन्द्र जहि द्वाविꣳशतिः परमेष्ठ्यसि परमामष्टौ यन्मे माता पृथिवी ते पात्रमेक विꣳशतिरुक्थ्यश्च त्रयोविꣳशतिर्या त एषाऽष्टाविꣳशतिर्द्वाविꣳशतिः ॥ २२॥

उष्णेन धातोक्थ्यश्च द्वाविꣳशतिः ॥ २२॥

उष्णेन पर्वतेन ॥

इति एकाग्नि-काण्डम् ॥

आभिर्गीर्भिर्यदतो न ऊनमाप्यायय हरिवो वर्धमानः । यदा स्तोतृभ्यो महि गोत्रा रुजासि भूयिष्ठभाजो अध ते स्याम ॥

ब्रह्म प्रावादिष्म तन्नो मा हासीत् ॥

ओं शान्तिः शान्तिः शान्तिः ॥

॥ हरिः ओ(३)म् ॥

॥ श्री कृष्णार्पणमस्तु ॥

Note on the use of th in apashyamahametAnthsapta in .. 0. 1. 7. 21.. . See top right

https://archive.org/details/taittiriya/taittiriya$_{a}ranyaka_{b}haskara_{0}1/page/n50/mode/1upIt$
$pratisakhyahttps://archive.org/details/in.ernet.dli.2015.553666/page/n161/$

Rule 1 (a and b) a. if ङ् followed by स् , ष् then क् is Agama eg - प्रत्यङ् सोमो => प्रत्यङ्+क्+सोमो eg - प्रत्यङ् षडहो => प्रत्यङ् +क् +षडहो

b. if ट् , न् followed by स् , ष् ) then त् is Agama eg - विद्वान् सोमेन => विद्वान् + त् +सोमेन our eg एतान् सप्त => एतान् + त् +सप्त वट् स्वयमभि => वट् + त् + स्वयमभि

Rule 2 First letter in group followed by ऊष्म - becomes second in the respective group eg - प्रत्यङ्+क्+सोमो => प्रत्यङ्+ ख् +सोमो विद्वान् + त् +सोमेन => विद्वान् + थ् +सोमेन our eg एतान् + त् +सप्त => एतान् + थ् +सप्त

See pratishakhya reference page 164 This is the reason many books also use saMvathsara in place of saMvatsara etc.

BTW वर्धन as वर्द्धन is also documented as द्विवर्णम् page 162 onwards in the same pratishAkhya reference (sutra 1 and 5 for वर्द्धन)

These specifics are emphasized in some vedic books to remind उच्चारण although some books are liberal and expect students to learn from parampara.

- Muralidhara muraliba at gmail.com

Encoded and proofread by Muralidhara B A muraliba at gmail.com Shri muralidhar has studied kRRiShNayajurveda from his father Anathakrishna, Proffessor in Chamarajendra Sanskrit College, Chamarajpet, Bangalore. Muralidhar received MA from Karnataka Samskrit University.

*Taittiriya AraNyaka*

pdf was typeset on August 6, 2023

Please send corrections to *sanskrit@cheerful.com*